# जैनरामायणम् ।

## श्रीहेमचन्द्राचार्य्य विरचितम् ।

---

फोर्ट-उइलियम कालेजस्थ पण्डित

श्रीजगन्नाथशुक्लेन परिशोधितम् ।

---

उसाबाल श्रावकमतावलम्बिन

आजिमगञ्ज निवासिन:

श्रीयुतराय धनपतिसिंहवाहादुरस्याज्ञया

कलिकातानगरे

जैनाख्ययन्त्रे

१९३० संवत्सरे ।

मुद्रितम् ।

श्रीजिनाय नमः।

पुरे वालूचराख्ये च मुर्शिदावादसन्निधौ।
आसन्दूगरगोत्रीयाः सोदराभ्रातरस्त्रयः ।१।
उसावालेति विख्याताः स्वधर्म्मनिरताः सदा।
बुधसिंहाभिधस्तेषां ज्येष्ठः श्रेष्ठगुणोऽग्रणीः ।२।
मध्यमो नथमल्लनामा यवीयान् रणसिंहकः।
बुधसिंहाभिधस्यासीज्जन्मपौष्यां विधोस्तिथौ ।३।
द्वीपरामाब्धिचन्द्राब्दे द्विलक्षाधिपतेरथ।
कौशेयविद्रुमयोः स व्यवसायं तदाऽकरोत् ।४।
सोऽगाच्चापुनरावाप्तिं बुधसिंहस्तु सन्मनः।
रन्ध्ररामगजक्ष्मापाब्दे वर्षे विषय निस्पृहः ।५।
बुधसिंहाभिधस्यास्तां पुत्रौ परमधार्मिकौ।
वाहादुरसिंहको ज्येष्ठः प्रतापसिंहः कनिष्ठकः ।६।
ययोः प्रतापस्त्वद्यापि प्रचकास्ति दिगन्तरम्।
प्रतापश्च तयोर्मध्ये तपनोऽभूद्द्वितीयकः ।७।
तस्याप्यास्तां शुभौ सूनू ज्येष्ठो लक्ष्मीपतिस्तयोः।
आसीत् कनिष्ठो धनपतिर्द्वौ च शील गुणान्वितौ ।८।
नाम्ना धनपतिसिंहो यः सूनुस्तस्य महीयसः।
प्रतापसिंहाख्यस्य लघु धर्मिकः शीलसंयुतः ।९।

निरतः श्रावके धर्मे नयशाली जितेन्द्रियः ।
हेमाचार्य्यकृतं यस्तु रामायणममुद्रयत् ॥१०॥
यस्तात्तधर्मदृढ्ढयर्थं धर्मग्रन्थरुचिं गतः ।
बभौ धनपतिस्तेन धनपतेरधिको भुवि ॥११॥
हेमाचार्यकृतं यस्मात् मुद्रणेनाधिकं कृतम् ।
रामायणं यदालोक्य स्त्रीयुर्यतयो मुदम् ॥१२॥

खरामरन्ध्रेन्दुमितेच फाल्गुणे
शितेतिथौ पूर्ण मभूद्धिं विधोः ।
श्री विक्रमादित्य नृपोत्तमाऽब्दे
मुद्राक्षरै मुंद्रित मेतदेव ॥१३॥

# अथ रामायणम् ।

अथ श्रीसुव्रतस्वामी जिनेन्द्रस्यान्तरद्युतेः ।
हरिवंशमृगाङ्कस्य तीर्थे सञ्जातजन्मनः ॥१॥
बलदेवस्य पद्मस्य विष्णोर्नारायणस्य च ।
प्रतिविष्णो रावणस्य चरितं परिकीर्त्त्यते ॥२॥
अस्यैव जम्बूद्वीपस्य दक्षिणे भरते पुरी ।
नाम्ना ख्याता विनीतेति शिरोमणिरिवावने ॥३॥
अस्यामिक्ष्वाकुवंशस्य विततच्छत्रसन्निभः ।
विश्वसन्तापहरणश्चक्रभृत्सगरोऽजनि ॥४॥
सोऽपरेद्युः समम्भूपैर्बाह्याल्यां वाहकेलये ।
एकं शूकलमारुह्य ययौ सर्व्वकलानिधिः ॥५॥
तत्र विक्रमयामास चतुरन्तं तुरङ्गमम् ।
उत्तरोत्तरधारासु क्रमेणारोपयन्नसः ॥६॥
आरूढः पञ्चमीधारामुत्पपात नभस्तले ।
वल्गादिसंज्ञानभिज्ञो भूतोभूतैरिवाश्रितः ॥७॥
सगरं सोऽपहृत्याऽश्वोऽश्वरूप इव राक्षसः ।
महारण्ये प्रचिक्षेप कालाक्षेपेण रंहसा ॥८॥

वल्गां सामर्षमाकृष्योरुभ्याञ्चाक्रम्य पार्श्वयोः ।
दधार सगरोऽश्वन्तं उर्पां दत्त्वोत्ततारच ॥९॥
विधुरस्तुरगः सोपि पपात पृथिवीतले ।
पृथ्वीनाथोपि पादाभ्यामेवगन्तुं प्रचक्रमे ॥१०॥
यावत्किञ्चिद्ययौ तावद्ददर्शैकं महासरः ।
आदित्यकरपर्यस्तां भूभ्रष्टामिवचन्द्रिकाम् ॥११॥
तत्र श्रमापनोदाय सस्नौ वन्य इव द्विपः ।
स्वादु स्वच्छं पद्मगन्धि शीतञ्च सपयःपपौ ॥१२॥
निर्ययौ सरसस्तस्मात्सताभ्यो तीरसोर्मनि ।
ददर्श चैकां युवतिंजलदेवीमिवाऽग्रतः ॥१३॥
तां नवाम्भोजवदनां नीलोत्पलविलोचनाम् ।
तरङ्गायित लावण्य जलाञ्चक्रायुगस्तनी ॥१४॥
स्मेरकोकनदोद्दाम पाणिपादमनोरमाम् ।
शरीरिणीं सरो लक्ष्मीं स पश्यन्नित्यचिन्तयत् ॥१५॥
अप्सराः किं व्यन्तरी किं किमाद्यौ नागकन्यका ।
विद्याधरी चा किमियं न सामान्येदृशीभवेत् ॥१६॥
न तथा हृदयानन्दं करोति सरसी जलम् ।
यथा दर्शनमेतस्याः सुधादृष्टिसहोदरम् ॥१७॥
तथापि ददृशे राजा राजीवदलचक्षुषा ।
ततः सञ्चरितेनेवाऽनुरागेण तदैव हिं ॥१८॥

सद्योपि कामविधुरा सा सखीभिः कथञ्चन।
संस्थाप्यौ नीयतावास स्नानायाय मिवाब्जिनी ॥१९॥
सगरोपि सरस्तीरे शनैर्गच्छन् स्मरातुरः।
एत्य कञ्चुकिना नत्वा चैव मूचे कृताञ्जलिः ॥२०॥
स्वामिन्निहैवभरतक्षेत्रे वैताढ्यपर्वते।
वल्लभं सम्पदामस्ति पुरं गगनवल्लभम् ॥२१॥
विद्याधरपतिस्तत्र ख्यातो नाम्ना सुलोचन।
त्रिलोचन सखः पुर्यामलकायामिवाऽभवत् ॥२२॥
सहस्रनयनोनाम तस्यास्ति तनयेनयी।
सुकेशा दुहिता चेयं विश्वस्त्रैणशिरोमणिः ॥२३॥
नैमित्तिकेन चैकेन जाता मात्रापि वर्णिता।
स्त्रीरत्नमेषा महिषी भवित्री चक्रवर्त्तिनः ॥२४॥
इतश्च पूर्णमेघेन रथनूपुर भूभुजा।
भूयोभूयोऽयाचितेय मुद्वोढुमनुरागिणा ॥२५॥
तामितयेददाने च हर्तुकामोहठादपि।
पूर्णमेघो मेघ इव गर्जन् योद्धुमुपाययौ ॥२६॥
पूर्णमेवञ्चिरतरं योधयित्वा सुलोचनम्।
चक्रे दीर्घभुजोदीर्घ निद्रामुद्रितलोचनम् ॥२७॥
स्वधनं तद्धन इवोपादायभगिनीमिमाम्।
सहस्रनयनोत्रागान्महान्त्विमिहावनौ ॥२८॥

सरोवरे नयास्येह क्रीडन्त्यात्वमशीत्थितः ।
शिञ्जिताचाशुकामेन विकारं वेदनामयम् ॥२९॥
घर्मार्त्तेव स्वेदवती स्तब्धापाञ्चालिकेवच ।
शीता त्तेनपरैश्वं वा श्लेष्मले रखलखरा ॥३०॥
क्षणादस्वास्थमेवेयं भानुमानिव पद्मिनि ।
उदस्थु शोकमग्नेव भोगिनीव मतिस्थिता ॥३१॥
क्षणादव स्थावैदित्यप्रपदे तवदर्शनात् ।
तत्राथ स्वजरांज्ञात्यभ्मयावत्सा विषद्युते ॥३२॥
सौविदल्लैवपदस्येषद मस्वतदुनोपि सः ।
आययौ नभस्य तं नभस्वक्रेथ चक्रिणम् ॥३३॥
सोनुमान्य निजावासे ह्यपीत् सगरचक्रिणः ।
स्त्रीरत्नमसुकेशा या दानाद्भुतमतोषयन् ॥३४॥
ततश्च तौ विमानेन सहस्त्रैच्चणचक्रिणौ ।
वैताढ्यशैलेय यतुः पुरं गगनवल्लभम् ॥३५॥
निवेश्य पैत्रिके राज्ये सहस्त्रनयनं ततः ।
सर्वविद्याधराधीशं व्यधत्तधरणीधरः ॥३६॥
स्त्रीरत्नं तदुपादायसगरश्चक्रवर्त्यपि ।
जगाम साकेतु पुरं पुरन्दरपराक्रमम् ॥३७॥
सङ्गीतकैर्नाटिकैश्च विनोदैरपरैरपि ।
ततश्चारंस्त सगरः साम्राज्यश्रीलताफलैः ॥३८॥

अथ साकेत नगरोद्याने जितजिनेश्वरः ।
भगवान् समवासार्षीत्सेव्यमानः सुरासुरैः ॥३९॥
वासवादिषु देवेषु सगरादिषु राजसु ।
आसीनेषु यथा स्थानं विदधौ देशनां विभुः ॥४०॥
तदा च वैताढ्यगिरौ पूर्णमेघं सहस्रदृक् ।
स्मरन् पितृवधं क्रुद्धोऽवधीतार्क्ष्यइवोरगम् ॥४१॥
पूर्णमेघात्मजस्तस्मान्नष्टोऽथ घनवाहनः ।
तत्वा जगाम समवसरणं शरणेच्छया ॥४२॥
सत्रिः प्रदक्षिणीकृत्य भगवन्तं प्रणम्य च ।
उपपादमुपाविक्षद्रुपवृक्षमिवाध्वगः ॥४३॥
तस्यानुपदमेवाथ सहस्राक्षदुदायुधः ।
आगात्समवसरणेऽपश्यच्च घनवाहनम् ॥४४॥
प्रशान्तकोपस्त्यक्त्वा स्वोःप्रभावात्परमेष्ठि तुः ।
नत्वा प्रदक्षिणापूर्वं यथा स्थातुमुपाविशत् ॥४५॥
सदरश्चक्रभृदथ पप्रच्छ परमेश्वरम् ।
किं वैरकारणं स्वामिन् पूर्णमेघसुनेत्रयोः ॥४६॥
आचख्यौ भगवानेव मादित्याते पुरे पुरा ।
अभवद्भावनोनामद्रव्यकोटीश्वरो वणिक् ॥४७॥
स्वसूनोर्हरिदासस्य सार्पयित्वा खिलं धनम् ।
देशान्तरं वणिज्यायै जगाम श्रेष्ठिभावनः ॥४८॥

विदेशे द्वादशाब्दानि स्थित्वोपार्य्यमिहद्धनम् ।
आययौ भावनः श्रेष्ठी तस्थौ च नगराद्बहिः ॥४६॥
तत्र मुक्त्वा पुरीवारं मेकाक्यपि हि भावनः ।
निश्यायया निजे सद्मन्युत्कण्ठाहिवलीयसी ॥५०॥
प्रविशत् हरिदासेन चौरोऽसाविति शङ्कया ।
निहतः खड्गघातेन विमर्षः क्वाल्पमेधसाम् ॥५१॥
स्वस्य व्यापादकं ज्ञात्वा तदानीमपिभावनः ।
तत्कालकलितद्वेषः कामधर्ममुपाययौ ॥५२॥
स ज्ञात्वा पितरं पश्चात्पश्चात्तापकदर्षितः ।
चकार प्रेतकार्य्याणि सशल्यस्तेन कर्मणा ॥५३॥
विपेदे हरिदासोपि गते काले क्रियत्यपि ।
दुःखदान् द्वावपतितोद्भ्रमतुः कतिचिद्भवान् ॥५४॥
किञ्चिच्च सुकृतं कृत्वा जीवोऽभूद्भावनस्य तु ।
पूर्णमेघो हरिदासजी वस्यासीत् सुलोचनः ॥५५॥
इति प्राग्जन्मसंसिद्धं पूर्णमेघसुनेत्रयोः ।
वैरं प्राणान्तिकं राजन्नैहिकं त्वानुषङ्गिकम् ॥५६॥
भूयोपि सगरोऽपृच्छत्तस्मन्योर्ह्यनयोर्मिथः ।
को वैरहेतुः स्नेहस्य सहस्राक्षे कुतो मम ॥५७॥
स्वाम्यूचे दानशीलस्त्वं परिव्राट् रम्भिकाभिधः ।
प्राग्भवेभूस्तथा भूतां शिष्यौ शश्यावलीत्विमौ ॥५८॥

अभूच्चातिविनीतत्वादावलिस्तेतिवल्लभः ।
गोधेनुमेकामक्रीणादन्यदा द्रविणेन सः ॥ ५९ ॥
वेगन्धो स्वामिनः श्रुत्वा कठोरहृदयः शशी ।
अन्तराले पतित्वैव तां क्रीणातिस्म धेनुकाम् ॥ ६० ॥
केशाकेशि मुष्टामुष्टि दण्डादण्डितयो स्ततः ।
युद्धं प्रवृत्ते घोरं शशिना चावलिर्हतः ॥ ६१ ॥
शशीचिरं भवं भ्रान्त्वा वज्रेसौ मेघवाहनः ।
आवलिस्तु सहस्रान्तस्तदिदं वैरकारणम् ॥ ६२ ॥
भ्रान्तादान प्रभावेन रंभकोपि गतीं शुभाम् ।
चक्रस्त्वं च सहस्राच्च स्नेहः प्रागजन्मभूस्वते ॥ ६३ ॥
अथ रक्षपतिर्भीमो निषण्णस्तत्र पर्षदि ।
उच्छायालिङ्ग्य रभसान्मेघवाहनमब्रवीत् ॥ ६४ ॥
पुष्करद्वीपभरतक्षेत्रे वेताढ्यपर्वते ।
प्राग्भवे काञ्चनपुरे विद्युद्दंष्ट्रो नृपो भवम् ॥ ६६ ॥
तस्मिन् भवे ममा भूस्त्वं तनयो रतिवल्लभः ।
अत्यन्तं वल्लभोवत्स साधुदृष्टोसि सम्प्रति ॥ ६७ ॥
तादेवं संप्रत्यपि मे पुत्रोसि परिगृह्यताम् ।
सैन्यं मदीयं त्वदीयमथान्यदपि यन्ममः ॥ ६८ ॥
लवणोदे पयोराशौ दुर्जयोद्य सदामपि ।
योजनानां सप्तशतीं दिक्षु सर्वा सुविस्तृतः ॥ ६९ ॥

राक्षसद्वीप इत्यस्ति सर्वद्वीपशिरोमणि ।
तदन्तरे त्रिकूटाद्रिर्भूमिनाभो सुमेरुवत् ॥७०॥
मह्द्विवलयाकारो योजनानि नवोन्नतः ।
पञ्चाशतं योजनानि विस्तीर्णोऽस्त्यतिदुर्गमः ॥७१॥
तस्योपरिष्टान् सौ वर्णप्राकारागृह्य तोरणा ।
मया लङ्केतिनाम्ना पूर ध्रुनैर्वास्तिकारिता ॥७२॥
षड्योजनानि भूमध्य मतिक्रम्य चिरन्तनी ।
शुद्धस्फुटिकवप्राङ्का नानारत्नमलालया ॥७३॥
सपादयोजनशतं प्रमाणाप्रवरापुरी ।
मम पाताललङ्केति विद्यते चातिदुर्गमा ॥७४॥
पुरीद्वयमिदं वत्साद्दत्तत्वं नृपतिर्भव ।
भवत्वाद्येवते तीर्थनाथदर्शन जं फलम् ॥७५॥
इत्युक्त्वा राक्षसपतिर्माणिक्यैर्नवभिः कृतम् ।
ददौ तस्मै महाहारं सद्योविद्याच राक्षसीम्॥७६॥
भगवन्त नमस्कृत्य तदैव घनवाहनः ।
आगत्य राक्षसद्वीप राजाभूल्लङ्कयो स्तयोः ॥७७॥
राक्षसद्वीपराज्येन राक्षस्याविद्ययापि च ।
तदादि तस्य वंशोपि ययौ राक्षसवंशताम् ॥७८॥
विस्मृविता मित्रबलः सुत्रामेवैकविक्रमः ।
व्यधत्त लङ्कयोराज्यं सुचिरं घनवाहनः ॥७९॥

समहारक्षसे राज्यं सुधीर्दत्वा स्वसूनवे ।
अजितस्वामिपादान्ते परिव्रज्य ययौ शिवम् ॥८०॥
महारक्षा अपि चिरं राज्यं भुक्त्वा स्वनन्दने ।
देव रक्षसि संस्थाप्य प्रव्रजाच ययौ शिवम् ॥८२॥
रक्षो द्वीपाधिपेष्वेऽवमसंख्येषु गतेषु तु ।
श्रेयांस तीर्थे भूत्कीर्त्तिधवलो राक्षसेश्वरः ॥
तदा च वैताढ्यगिरौ पुरे मेघपुराभिधे ।
विद्याधरनरेन्द्रो भूदतीन्द्रो नामविश्रुतः ॥८३॥
श्रीमत्यां तस्य कान्तायां श्रीकण्ठोनाम नन्दनः ।
देवीति नाम्ना दुहिता चाभूद्देवीवरूपतः ॥८४॥
विद्याधरेन्द्र स्तां पुष्पोत्तरो रत्नपुरेश्वरः ।
सूनोः पद्मोत्तरस्यार्थे ययाचे चारुलोचनाम् ॥८५॥
गुणिने श्रीमतेप्यस्मैतामतीन्द्रो ददौ नहि ।
ददौ कीर्त्तिधवलाय किन्तु दैवनियोगतः॥८६॥
तां कीर्त्तिधवलोढ़ान्तु श्रुत्वा पुष्पोत्तरो नृपः ।
वैरायते स्मातींद्रेण श्रीकण्ठे न च मानदः ॥८७॥
श्रीकण्ठेनैकदामेरो निंवृत्तेन व्यहैत्यत ।
पुष्पोत्तरस्य दुहिता पद्मा पद्मे वरूपतः ॥८८॥
मनोभवविकाराब्धि समुल्लासन दुर्दिनम् ।
अन्योन्यमनुरागो भूत्तयोः श्रीकण्ठपद्मयोः॥८९॥

तिष्ठतेस्म कुमारी सा श्रीकण्ठायोन्मुखाम्बुजा ।
स्वयम्बरस्रजमिवः क्षिपन्तीस्निग्धया दृशा ॥८०॥
विज्ञाय तदभिप्रायं श्रीकण्ठस्तां स्मरातुरः ।
आदाय व्योममार्गेण गन्तुं प्रवृत्ते द्रुतम् ॥८१॥
पद्मां हरति कोपीति पूत्कुर्वन्तिस्म चेटिका ।
पुष्पोत्तरोपि सन्नह्यत्वधावत्सबलो बली ॥८२॥
श्रीकण्ठोपि द्रुतं कीर्त्ति धवलं शरणं ययौ ।
पद्माहरणवृत्तान्तं कथयामास चाखिलम् ॥८३॥
पुष्पोत्तरोपि तत्राशु प्राप सैन्यैर्निरन्तरैः ।
आशाः प्रच्छादयन्नश्रिर्युगान्त इव सागरः ॥८४॥
दूतेन कीर्त्तिधवलः पुष्पोत्तरमभाषतः ।
अविमृश्य प्रयासोयं मुधावः सांपरायिकः ॥८५॥
कन्याह्यवश्यं दातव्या कस्मैचन तया यदि ।
स्वयं वृतोऽसौ श्रीकण्ठस्तदासौ नापराध्यति ॥८६॥
नतद्वो युज्यते योद्धुं बुद्धास्वदुहितुर्मनः ।
कर्तुं वधूवरोद्वाह कृत्यमेवतु सांप्रतम् ॥८७॥
दूतीमुखेन पद्मापि तदेवेति व्यजिज्ञपत् ।
वृतो मया स्वयमयं हृताहं नामुना पुन. ॥८७॥
इति पुष्पोत्तरं श्रुत्वा शान्तकोपो भवत्क्षणात् ।
प्रायो विचार चञ्चूनां कोपः सुप्रशमः खलु ॥८८॥

श्रीकण्ठपद्मयो स्तत्रैवोत्सवेन महीयसा ।
कृत्वा विवाहं प्रययौ निजं पुष्पोत्तरः पुरम् ॥१००॥
श्रीकण्ठकीर्त्तिधवलोऽब्रवीद्त्रैव तिष्ठयत् ।
तात्यशैले युष्माकं भूयांसो विद्विषोऽधुनाः ॥१॥
अस्यैव राक्षसद्वीपं स्यादूरेण महद्विषि ।
विद्यते वानरद्वीपो योजनत्रिशतीमितः ॥२॥
अन्येपि बर्वरकूलसिंहलप्रमुखाः सर्व्वे ।
द्वीपा मदीयास्तिष्ठन्ति भूष्टस्वः खण्डसन्निभाः ॥३॥
तेषामेकतत्रकुत्रापि राजधानीं निधाय भोः ।
सुखमाः स्वाविदूरत्वादवियुक्तो मया समम् ॥४॥
न यद्यपि द्विषद्भ्यस्ते भयमस्ति मनागपि ।
तथाप्यस्मद्विप्रयोगभयान्नोगन्तु मर्हसि ॥५॥
सस्नेहमिति तेनोक्त स्तद्वियोगातिकातरः ।
श्रीकण्ठोवानरद्वीपनिवासं प्रत्युपद्यत ॥६॥
कृत्वाऽधिवानरद्वीपं किष्किन्धाद्रौ महापुरीम् ।
किष्किन्धानामतद्राजेत्र तं कीर्त्तिधवलोन्यधात्॥७॥
अद्राक्षीद्भ्राम्यत स्तत्र महादेहान्फलाशिनः ।
भूयं सो वानरान् रम्यान् श्रीकण्ठपृथिवीपतिः ॥८॥
तेषाममारिमाघोष्य सोन्नपानाद्य दापयन् ।
सचक्रुस्तानयान्येपि यथा राजा तथा प्रजाः ॥९॥

चक्रुस्थिते वले ध्येवं ध्वजच्छत्रादि लक्ष्मसु ।
विद्याधर वानरास्ते तदा प्रभृति कौतुकात् ॥१०॥
वानरद्वीपराज्येन वानरैर्लक्ष्मभि स्तथा ।
वानरा इति कीर्त्त्यन्ते तथा विद्याधरा अपि ॥११॥
श्रीकण्ठस्य सुतोजज्ञे वज्रकण्ठोभिधानतः ।
सोत्कण्ठासु विशालासु सर्वदा कुण्ठविक्रमः ॥१२॥
नन्दीश्वरेथ श्रीकण्ठोर्यात्रायैशाश्वतार्हताम् ।
अमरान् गच्छतोऽद्राक्षीदाश्वानीमाश्रितोनिजाम् ॥१
वाजीव ग्रामपट्टस्थो वाजिनां मार्ग यायिनाम् ।
तेषां दिविषदां सोथाऽन्वचालीभक्तितद्गनः[1] ॥१४॥
विमानं गच्छतस्तस्य स्खलितं मानुषोत्तरे ।
तरङ्गिणी वेगइव मार्गवर्त्तिनि पर्वते ॥१५॥
प्रागजन्मनि मया तेपे तपोऽल्पं खलु तेनमे ।
नन्दीश्वरार्हद्यात्रायां नापूर्य्यत मनोरथः ॥१६॥
इति निर्वेदमापन्नः प्राव्राजीत्सद्य एव सः ।
तपस्तीव्रतरं तप्त्वा सिद्धिक्षेत्रमियायच ॥१७॥
श्रीकण्ठतो वज्रकंठादिष्वतीतेष्वऽनेकशः ।
मुनिसुव्रततीर्थेऽभूद्यतोदधि रथोनृपः ॥१८॥

---

(१) अन्वगाद्भक्तियुतः । इति वा पाठः ।

लङ्कापुर्यामपि तदा समभूद्राक्षसेश्वरः ।
तडित्केश इति नाम्ना जज्ञे स्नेह तयोरपि ॥१९॥
अपरेद्युः स्तडित्केशः सान्तःपुरवधूजनः ।
ययौ क्रीडितु मुद्याने वरे नन्दननामनि ॥२०॥
क्रीडासक्ते तडित्केशे कोप्युत्तीर्य कपिर्द्रुमात् ।
श्रीचन्द्रायास्तन्महिष्या विलिलेख नखैः कुचौ ॥२१॥
रोषोच्छ्वसितकेश स्तं तडित्केशः प्लवङ्गमम् ।
जघानैकेन बाणेनाऽसह्यो हि स्त्री पराभवः ॥२२॥
बाणप्रहारविधुरः किञ्चिद्गत्वा प्लवङ्गमः ।
एकस्य प्रतिमास्थस्य साधोरग्रे पपात सः ॥२३॥
सोदात्तस्मै नमस्कारं परलोकाध्वशं बलम् ।
हृत्वा च तत्प्रभावेणाब्धि कुमारो बभूव सः ॥२४॥
प्रागजन्मसोऽवधेर्ज्ञात्वाभ्येत्यावं दिष्ट तं मुनिम् ।
वन्दनीयः सतां साधुर्ह्युपकारी विशेषतः ॥२५॥
अन्यानपि तडित्केश भटैस्तत्र प्लवङ्गमान् ।
हन्यमानात्सपेचित्ष्ट सद्यः कोपेन चा ज्वलत् ॥२६॥
महाप्लवङ्गरूपाणि विकृत्यानेकशश्च सः ।
वर्षं स्तरुशिलाजालै रुपदुद्राव राक्षसान् ॥२७॥
ज्ञात्वा दिव्यप्रयोगन्तु तडित्केशस्तमुच्चकैः ।
आनर्चोवाच कोसीति किमुपद्रवसीति च ॥२८॥

ततः सोऽब्धि कुमारोऽपि शान्तकोपस्तदर्चया ।
स्ववधञ्च नमस्कार प्रभावञ्च शशंसतम् ॥२९॥
लङ्केश स्तेन देवेन सहैवोपेत्य तं मुनिम् ।
इत्यप्रच्छत्प्रभो वैर हेतुः कः कपिना मम ॥३०॥
आचख्यौ मुनिरप्येवं श्रावस्त्यां मन्त्रिनन्दनः ।
दत्तो नाम पुराभूत्त्वं काश्यामेषतु लुब्धकः ॥३१॥
त्वमुपात्तपरिव्रजग्रोन्येद्युर्वाराणसीमगाः ।
दृष्टोऽनेनापशकुन मित्याहत्य निपातितः ॥३२॥
माहेन्द्रकल्पदेवोऽभू स्त्वमृत्वा चेद्गिरिहाभवः ।
भ्रान्त्वा नरकमेषोऽभूत्कपिस्त द्वैरकारणम् ॥३३॥
वन्दित्वा तं महासाधु मसामान्योपकारिणम् ।
अनुज्ञाप्य च लङ्केशं सोऽयदेवस्तिरोदधे ॥३४॥
तदाकर्ण्य तडित्केशः सुकेशे तनये निजम् ।
राज्यं न्यस्य प्रवव्राज वव्राज च परं पदम् ॥३५॥
किष्किन्धाराज्यमाधाय पुत्रे किष्किन्धनामनि ।
दीक्षां घनोदधिरधोऽप्यादाये सायनिर्वृतिम् ॥३६॥
इतश्च वैताढ्यगिरौ नगरे रथनूपुरे ।
अभूत्तदानीमशनि वेगो विद्याधरेश्वरः ॥३७॥
तस्यापि सूनुर्विजय सिंह इत्यभवज्जयी ।
विद्युद्वेगो द्वितीयस्तु तद्दोर्दण्डविवापरौ ॥३८॥

गिरौ तत्रैव चादित्यपुरे मन्दिरमाल्य भृत् ।
विद्याधरनृपस्तस्य श्रीमालेति च कन्यका ॥३९॥
तस्या स्वयम्बरे तेना हूताविद्याधरेश्वराः ।
ज्योतिषीवाधिविमान मधिमञ्च मुपाविशन् ॥४०॥
कथ्यमानान् प्रतीहार्या तान् विद्याधरपुङ्गवान् ।
पश्यन्ती दृष्ट्या श्रीमाला कुल्याष्टत्तानिवाम्भसा ॥४१॥
अन्यविद्याधरान् सर्वानतिक्रम्य क्रमेण सा ।
गत्वा च तस्थे किष्किन्धे जाह्नवीव पयोनिधौ ॥४२॥
तस्य कंठे निचिक्षेप श्रीमाला वरमालिकाम् ।
भविष्यदोल्लता स्नेष सत्यं कारमिवानवम् ॥४३॥
उच्चैर्विजयसिंहोथ सिंहवत्प्रियसाहसः ।
भृकुटीभीषणमुखः सरोषमिदमभ्यधात् ॥४४॥
निर्वासिता पुराप्येते सदा दुर्नयकारिणः ।
वैताढ्यराजधानीतः सुराजरादिकद्रवः ॥४५॥
तत्कोनाम इहा नीता दुर्नीता कुलपांशुना ।
न दद्या पुनराहत्तैरनिहन्म्येतान् पशूनिव ॥४६॥
इत्युदीर्य महावीर्य समुत्थाय यमोपमः ।
चचालकिष्किन्धिनृप वधायायुधमुत्क्षिपन् ॥४७॥
किष्किन्धिनः सुकेशाद्या अन्ये विजयसिंहतः ।
रणायोत्तस्थिरे विद्याधराः पौरुषदुर्द्धराः ॥४८॥

दन्तादन्तिप्रवृत्ते मे स्फुलिङ्गीकृताम्बरः ।
कुन्ताकुन्तिमिलत्सादी शराशरिमिलद्रथी ॥४६॥
खड्गाखड्गापतत्पत्ति रक्ताक्तं किलभूतलः ।
रणस्ततः प्रवृत्ते कल्पान्त इव दारुणः ॥५०॥ युग्मं॥
चिरं युद्वाथबाणेन किष्किन्ध्यवरजोऽन्धकः ।
शिरोविजयसिंहस्यापातयत्फलवत्तरोः ॥५१॥
नेमुश्च विजयसिंहगृह्याविद्याधरेश्वराः ।
निर्नायानां कुतः शौर्य्यं हतं सैन्यं ह्यनायकम् ॥५२॥
श्रीमालां समुपादाय जयश्रियमिवाङ्गिनीम् ।
ययावुत्पत्यकिष्किन्धिः किष्किन्धां सपरिच्छदः ॥५३॥
श्रुत्वा पुत्रबधोदन्तमकाण्डाशनि पातवत् ।
वेगेनाशनिवेगोगादधिकिष्किन्धिपर्व्वतम् ॥५४॥
किष्किन्धां नगरीं सैन्यैः सचावेष्टदनेकशः ।
महाद्वीपस्थलीं द्वीपवतीपूर इवाम्बुभिः ॥५५॥
गुहाया इव पञ्चास्यो योद्धुकामौ सहान्धकौ ।
वीरौ सुकेशकिष्किन्धौकिष्किन्धायानिरीयतुः ॥५६॥
ततः सर्वाभिसारेण शनिवेगोऽत्यमर्षणः ।
योद्धुं प्रवृत्ते वीर स्तृणवद्गणयन्परान् ॥५७॥
ततो विजयसिंहेभ सिंहस्याजिमुखेऽच्छिदत् ।
शिरोऽन्धकस्य रोषान्धोऽशनिवेगो महाभुजः ॥५८॥

ततो वानरसैन्यानि सदैन्यानि दिशोदिश ।
पवनास्फालिताम्भोद पटलानीवदुद्रुवुः ॥५६॥
सान्तःपुरपरीवारौ लङ्काकिष्किन्धनायकौ ।
पाताललङ्का ययतुः क्वाप्युपायोपसर्पणम् ॥६०॥
निहत्यसतहन्तारमाराधरमिवद्विपः ।
प्रशान्तकोपः समभूद्रथनूपुरपार्थिवः ॥६१॥
मुदितोवैरिनिर्घातान्निर्घातं नामखेचरम् ।
सराजस्थापनाचार्योलङ्काराज्येन्यवेशयत ॥६२॥
ततो निवृत्यवैताढ्ये स्वपुरे रथनूपुरे ।
अमरेन्द्रोऽमरावत्यामिवागादशनिर्नृपः ॥५३॥
अन्येद्युर्जातसम्वेगोऽशनिवेगनृपः स्वयम् ।
सहस्रारेसुते राज्यं न्यस्य दीक्षामुपाददे ॥६४॥
पुर्यां पातालङ्कायां सुकेशस्यापि सूनवः ।
इन्द्राण्यामभवन्मालीसुमाली माल्यवानिति ॥६५॥
श्रीमालायां च किष्किन्धे द्वौ बभूवतु रात्मजौ ।
नाम्नादित्यरजाश्चारुक्षरजाश्चेति महाभुजौ ॥६६॥
अपरेद्युश्च किष्किन्धिः सुमेरौशाश्वतार्हताम् ।
यात्रां कृत्वा निवृत्तः सन्नपश्यन् मधुपर्वतम् ॥६७॥
किष्किन्धेर्विष्वगुद्याने तत्र मेराविवापरे ।
मनोरमे मनोरन्तुं विश्रामाधिकाधिकम् ॥६८॥

निधायकिष्किन्ध्यपुरं तस्योपरि पराक्रमी ।
न्यवासीत्सपरीवारः कैलाश इव यक्षराट् ॥ ६९ ॥
पुत्रास्तेपि सुकेशस्य राज्यं श्रुत्वारिनिर्हृतम् ।
क्रुधा त्रयोऽग्नय इव जज्वलुर्वीर्यशालिनः ॥ ७० ॥
ते समागत्य लङ्कायां निर्घातं खेचरं रणे ।
न्यगृह्णन् म्हत्यवेक्षिस्या द्वोरैर्वैरं चिरादपि ॥ ७१ ॥
ततश्च पुर्यां लङ्कायां राजा माली तदा भवत् ।
राक्षसद्वीपमुख्यानां द्वीपानामेकशासिता ॥ ७२ ॥
इतश्च वैताढ्यगिरौ नगरे रथनूपुरे ।
सहस्रारनरेन्द्रस्याशनिवेगाङ्गजन्मनः ॥ ७३ ॥
भार्य्यायाश्चित्रसुन्दर्या गर्भे कश्चित्सुरोत्तमः ।
प्रच्युत्यावातरत्सद्योदृष्टे स्वप्नमङ्गले ॥ ७४ ॥ युग्मं ॥
काले च दोहदस्तस्याः शक्रसम्भोगलक्षणः ।
दुष्पूरोदुर्वचश्चाभूद्देहदौर्बल्यकारणम् ॥ ७५ ॥
निर्बन्धेन तु सापृष्टा कथञ्चिदपिदोहदम् ।
कथयामासतं पत्ये लज्जावनमदानना ॥ ७६ ॥
सहस्रारः सहस्राक्ष रूपं निर्मायविद्यया ।
सहस्राक्ष इतिज्ञातः पूरयामासदोहदम् ॥ ७७ ॥
असूत समये सूनु मनूनभुजविक्रमम् ।
इन्द्र इत्युक्तनामानमिन्द्रसम्भोगदोहदात् ॥ ७८ ॥

सम्प्राप्त यौवनायास्मै विद्याविनयशीलता ।
ददौ राज्यं सहस्रारः स्वयं धर्मरतोभवत् ॥७९॥
सर्वान् ससाधयामास विद्याधरनरेश्वरान् ।
इन्द्रमन्यश्च समभूदिन्द्रदोहदजन्मतः ॥८०॥
दिक्पालांश्चतुरश्चक्रे सप्तानीकान्यनीकपान् ।
तिस्रः परिषदो वज्रमस्त्रमैरावणं द्विपम् ॥८१॥
रम्भादिका वारवधूर्मन्त्रिणञ्च बृहस्पतिम् ।
नैगमेषिसमाख्यञ्च पत्त्यनीकस्य नायकम् ॥८२॥ युग्मं
एवं विद्याधरैरिन्द्रपरिवाराभिधाधरैः ।
इन्द्रोहमेवेतिधिया सोऽखण्डं राज्यमन्वसात् ॥८३॥
माकरध्वजिरादित्यकीर्त्तिकुक्षिसमुद्भवः ।
तत्राभूत्सोमदिक्पालः प्राच्यां ज्योतिःपुरेश्वरः ॥८४॥
वरुणामेघरथयोः पुत्रः पश्चिमदिक्पतिः ।
बभूववरुणो विद्याधरो मेघपुरेश्वरः ॥८५॥
तनयः सूरकनकावल्योरुत्तरदिक्पतिः ।
कुबेर इति विख्यातोभूत्काञ्चन पुरेश्वरः ॥८६॥
कालाग्नि श्रीप्रभासूनु र्किष्किन्ध नगराधिपः ।
अभूदप्राच्यां दिक्पालो यम इत्यभिधानतः ॥८७॥
विद्याधरेन्द्रमिन्द्रतमिन्द्रोहमितिमानिनम् ।
गन्धेभोऽन्यमिभमिव नसेहे मालिभूपतिः ॥८८॥

भ्रातृभिश्च मन्त्रिभिश्च मित्रैश्चातुलविक्रमैः ।
सच चालेन्द्रयुद्धाय नान्यो मन्त्रोहि दोष्मताम् ॥८६॥
सिंहद्विपाश्च महिषवराहवृषभादिभिः ।
यानैः प्रचेलुः सैन्येऽपिरक्षोवीराः सवानराः ॥६०॥
रिष्टाः खराः फेरवश्च सारसाश्च ववासिरे ।
दक्षिणस्था अपि फले तेषां वा मलधारिणः ॥६१॥
अन्यान्यप्यशकुनानि दुर्निमित्तानि चा भवत् ।
माली सुमालिनावारिप्रयाणाच्च सुमेधसा ॥६२॥
अवज्ञायवचस्तस्य मालीदोर्बलगर्वितः ।
जगाम वैताढ्यगिराविन्द्रमाह्वास्त चाजये ॥६२॥
इन्द्रोप्यैरावणारूढः पाणिनोल्लालयन्पविम् ।
सेनानाथैर्नैगमेषि प्रमुखैः परिवारितः ॥६४॥
सोमाद्यैर्लोकपालैश्च विविधायुधधारिभिः ।
विद्याधरभटैश्चान्यै रणक्षेत्रमुपाययौ ॥६५॥युग्मं॥
इन्द्रराक्षससैन्यानां सम्फेटोऽभूत्परस्परम् ।
तडिन्निभास्त्र भीष्माणामम्भोदानामिवाम्बरे ॥६६॥
निपेतुः स्यन्दनाः क्वापि शिखराणीवभूभृताम् ।
पलायं तगजाः क्वापि वातोद्धूता इवाम्बुदाः ॥६७॥
पेतुर्भटानां मूर्द्धानोराहुशङ्काप्रदाः क्वचित् ।
छतैकपादा क्वाप्यश्वाश्चेलुः सन्धानता इव ॥६८॥

अमर्षादिन्द्रसैन्येन मालिसैन्यमभज्यतत् ।
बलवानपि किं कुर्यात् प्राप्तः केशरिणा करी ॥९९॥
अथ रक्षः पतिर्माली सुमालिप्रमुखैर्वृतः ।
सयूथ इव वन्येभः ससंरम्भोऽभ्यधावत ॥२००॥
गदामुद्गरनाराचैः करकैरिव वारिदः ।
उपदुद्रावेन्द्रचमूं सवीर्यद्रविणेश्वरः ॥१॥
सलोकपालः सानीकः सानीकपतिरुच्चकैः ।
इन्द्रोऽप्यैरावणारूढोऽडुढौके रणकर्मणा ॥२॥
स इन्द्रो मालिना लोकपालप्रभृतयः पुनः ।
सुमालिप्रमुखैः सार्द्धं योद्धुमारेभिरे भटाः ॥३॥
तेषां चिरमभूद्युद्धं प्राणसंशयकृन्मिथः ।
जयाभिप्रायिणां प्रायः प्राणाहि तृणसन्निभाः ॥४॥
इन्द्रोद्रागथनिर्दम्भरणो दम्भोलिनावधीत् ।
विद्युते वाम्बुदोगोधां मालिनं वीर्यमालिनम् ॥५॥
हतेमालि निविन्नेष्टू राक्षसावानरास्तते ।
सुमाल्यधिष्ठितास्त्रेयुर्लङ्कां पातालवर्त्तिनीम् ॥६॥
विश्रवः सूनवेसद्यः कौशिकाकुक्षिजन्मने ।
लङ्कां वैश्रवणायादादिन्द्रः स्वञ्च पुरं ययौ ॥७॥
पुर्यां पाताललङ्कायां तिष्ठतस्त्र सुमालिनः ।
प्रीतिमत्यां सधर्मिण्यां जज्ञेरत्नश्रवा सुतः ॥८॥

संप्राप्तयौवनो रत्न श्रवा रम्य मथान्यदा ।
जगाम कुसुमोद्यानं विद्यासाधनहेतवे ॥९॥
तत्रैकत्र रहस्थाने सोऽक्षमालाधरो जपन् ।
नासाग्रन्यस्त दृक्तत्स्था वालेखित इव स्थिरः ॥१०॥
इत्यञ्च तस्थुषे तस्मैकापि तस्थौ समीपतः ।
विद्याधार्य न विद्याङ्गी कुमारी पितृशासनात् ॥११॥
तदानीञ्च महाविद्या नाम्ना मानवसुन्दरी ।
अस्मिसिद्धातवेत्युच्चै रत्नश्रवसमभ्यधात् ॥१२॥
रत्नश्रवाः सिद्धविद्यो जपमालां मुमोच च ।
ददर्श च पुरस्थां त्वां विद्याधरकुमारिकाम् ॥१३॥
इहागाद्धेतुना केन कस्यवा कासिवेति च ।
रत्नश्रवा बभाषेतां साप्येवं प्रत्यभाषत ॥१४॥
अनेक कौतुकागारे पुरे कौतुकमङ्गले ।
विद्याधरपतिर्व्योम विन्दुर्नामास्ति विश्रुतः ॥१५॥
तस्यास्ति ज्यायसी पुत्री कौशिका नाम मेस्वसा ।
ऊढा यक्षपुरेशेन राज्ञाविश्रवसा तु सा ॥१६॥
तस्या वैश्रवणोनाम बभूव तनयो नयी ।
राज्यं करोति लङ्कायां योधुनाशक्रशासनात् ॥१७॥
अहन्तु कैकसी नाम कौसिकायाः कसीयसी ।
नैमित्तिकगिरा पित्रा दत्ता तुभ्यमिहागमम् ॥१८॥

आहूतबन्धुस्तत्रैवो पयेमे तां सुमालिसूः ।
पुष्पान्तकं पुरं न्यस्य चाऽस्थात् क्रीडं स्तया सह ॥१९॥
अन्यदा कैकसी स्वप्ने विशन्तं स्वमुखे निशि ।
कुम्भिकुम्भस्थलीभेद प्रसक्तं सिंहमैक्षत ॥२०॥
तया तं स्वप्नमाख्यातं व्याख्याद्रत्नश्रवाः प्रगे ।
स्वच्छस्ते विश्वशौण्डीरोभविष्यति महाभुजः ॥२१॥
तस्मादैनतरं स्वप्नाच्चैत्यपूजां चकार सा ।
बभारच महासारं गर्भं रत्नश्रवः प्रिया ॥२२॥
तस्य गर्भस्य सम्भूतेः प्रभृत्यऽत्यन्त निष्ठुरा ।
वाणी बभूवाकैकस्या दृढञ्चाङ्गं जितश्रमम् ॥२३॥
दर्पणे विद्यमानेपि सा खड्गेप्रस्व दाननम् ।
आज्ञां दातुमभिप्रैषीत्सुरराज्येप्यशङ्कितम् ॥२४॥
विनापिहेतुं हुङ्कारमुखरं सादधौमुखम् ।
अनामयच्च मूर्द्धानं कथंचिन्न गुरुष्वपि ॥२५॥
विद्विषां मूर्द्धसुचिरं पादं दातुमियेष सा ।
इत्यादिदारुणान् भावान् दध्रेगर्भप्रभावतः ॥२६॥
प्रतिपच्चासनोत्कंपं कुर्वाण स्तनयस्तथा ।
सोधिकः द्वादशसमा सहस्रायुरजन्यतः ॥२७॥
उदत्तस्तूतिकातपल्लेष ल्यौजाः कं पयन्महीम् ।
उत्तानशयउद्दामपादकोकनदोऽश्र सः ॥२८॥

भीमेन्द्रेण पुरा दत्तं नवमाणिक्यनिर्मितम् ।
च कर्ष पाणिनाहारं पार्श्वस्थितकरण्डकात् ॥२९॥
कंठे चिक्षेपतं हारं बालः सहजचापलात् ।
जगाम विस्मये तेन कैकसी सपरिच्छदः ॥३०॥
रत्न एव च समाख्यौ राक्षसेन्द्रेण यः पुरा ।
मेघवाहनराजाय दत्तस्त्वत्पूर्वजन्मने ॥३१॥
अद्य यावद्देव तावद्योऽपूजि तव पूर्वजैः ।
न शाक्यावोढुमान्ये यो नवमाणिक्यनिर्मितः ॥३२।
यश्च नागसहस्रेण निधानमिवरक्ष्यते ।
हार आकृष्यकंठेसौ सोक्षेपि शिशुनातव॥३३॥ त्रिभिर्विशेषकं
नवमाणिक्यसंक्रांत तत् क्षणमुखत्वात्तस्य ।
नामधेयं दशमुख इतिरत्नश्रवाव्यधात् ॥३४॥
शशंसचैव यन्मेरौ चैत्यवन्दनहेतवे ।
सुमालिना गतवता पृष्टस्ता तेन कोप्यृषिः ॥३५॥
चतुर्ज्ञानभृदित्याख्य हारन्त्वत्पूर्वजन्मना ।
यो वोढा नवमाणिक्यं सोर्द्धचक्रीभविष्यति ॥३६॥
कैकसी सुषुपेनाथ भानुस्वप्ने न सूचितम् ।
भानुकर्ण इतिः सूनुं कुम्भकर्णापराभिधाम् ॥३७॥
चन्द्रतुल्यनखत्वेन नाम्ना चन्द्रनखा पुनः ।
ख्यातं सूर्पनखालोके कैकसी सुषुवेसुताम् ॥३८॥

विपाके विगते काले पुनस्साप्तूत कैकसी ।
पुत्रं विभीषणं नाम्ना शशाङ्कसमसूचितम् ॥३९॥
सार्घषोडशधनुः समुन्नतास्तै त्रयोऽह्र्निशं सुतातथा।
रेमिरे गतभयायथासुखं क्रीडयाद्यवसोऽनुरूपया॥४०

इत्याचार्य्य श्रीहेमचन्द्रविरचिते त्रिषष्टिशलाका पुरुषचरिते महाकाव्ये सप्तमे पर्व्वणिराक्षस वंशवानरवंशोत्पत्तिरावणजन्मवर्णनो नाम प्रथमः सर्गः ।

द्वितीयः सर्गः ।

अथान्येद्युर्दशमुखः सानुजोऽपश्यदम्बरे ।
विमानारूढमायान्तमृद्धं वैश्रवणं नृपम् ॥१॥
कोयमित्यनुयुक्तं तं तेन माता ब्रवीदिति ।
कौशिकाया मम ज्येष्ठभगिन्या ह्येष नन्दनः ॥२॥
विश्रवोनामधेयस्य विद्याधरपतेः सुतः ।
सर्व्वविद्याधरेन्द्रस्येन्द्रस्याग्रसुभटोह्ययम् ॥३॥
भवत्पितामहजेतष्ठं हत्वेन्द्रोमालिनं रणे ।
लङ्कां स राक्षसद्वीपां ददावस्मैच नः पुरीम् ॥४॥

ततः प्रभृति लङ्कायाः प्राप्तैरकृत मनोरथः ।
इहास्तितोऽवपितावत्स्य युक्तं शक्रो द्विषिद्ध्वदः ॥५॥
लङ्कां सराक्षसद्वीपां सह पाताललङ्कया ।
विद्यां च राक्षसीं नाम पूर्वजन्मात्मजन्मने ॥६॥
रक्षो वंशादिकं दाय मेघवाहनभूभुजे ।
राक्षसेन्द्रो ददौ भीमः प्रतीकाराय विद्विषाम् ॥७॥ युग्मम्
तस्यां हृतायां माम्नाय राजधान्याऽमरातिभिः ।
पितामह तिष्ठति ते पितापि च परासुवत् ॥८॥
अरक्षके त्वेल इवो त्वाणस्तस्यामरातयः ।
स्वैरञ्चरन्तीति सदा जीवत्काश्यिल्यं पितुस्तव ॥९॥
कदाचत्तु सानुजस्तत्र गत्वा पैतामहासने ।
आसीनोऽद्रक्ष्यसे वत्स मयाका मन्दभाग्यया ॥१०॥
विलोक्य लङ्कालुराठाकां स्वत्कारायान्नियंत्रितान् ।
शिरोमणिर्भविष्यामि कदा पुत्रवतीष्वहम् ॥११॥
एवं मनोरथैर्वत्स खपुष्पावचयोपमैः ।
क्षामीभवाम्यऽहरहर्म्मरालीवमरौ गता ॥१२॥
अथैवमवदद्रोषभीषणाक्षो विभीषणः ।
अलमातर्विषादेन नवेत्सि सुतविक्रमम् ॥१३॥
आर्यस्य दशकण्ठस्य पुरस्तादेवदोष्मतः ।
क इन्द्रो वैश्रवणः कः केऽन्ये विद्याधरा अपि ॥१४॥

अज्ञातपूर्व्विणा लङ्काराजं र सोढं द्विषामिदम् ।
दशास्येन प्रसुप्तेन सिंहेनेवैभगर्ज्जितम् ॥ १५॥
आस्तामार्य्यो दशग्रीवः परानतिभटानपि ।
अप्यार्यकुम्भकर्णोयं निःशेषी कर्तुमीश्वरः ॥१६॥
अस्त्वार्यकुम्भकर्णोऽपि तदादेशात्करोम्यहम् ।
द्विषामकाण्डे संहारं मातः पातः पवेरिवः ॥१७॥
अथोचे रावणोप्येवं दशनैरधरं दशन् ।
त्वं वज्रकठिनाऽस्यंऽम्बयद्दुःशल्यमधाश्चिरम् ॥ १८॥
अप्येकबाहुस्याम्नातान् हन्यामिंद्रादिकान् द्विषः ।
शस्त्रशक्तिकथाप्यस्तु वस्तुतस्ते तृणं ह्रिमे ॥१९॥
दोर्वीर्य्येणापि निर्ज्जेन्तुं यद्यप्यलमहं परान् ।
तथापि हि प्रयोक्तव्या विद्याशक्तिः क्रमागताः ॥२०॥
तद्विद्याः साधययिष्यामि निरवद्याः समन्ततः ।
अनुजानीहि यास्यामि तत्सिद्ध्यै सानुजोऽप्यहम् ॥॥
एवमुक्त्वा नमस्कृत्य पितरौ सानुजोपि सः ।
ताभ्यां च चुम्बितो मूर्ध्नि भीमारण्यमुपाययौ ॥२२॥
शयानः शयुनिःश्वास कम्पमानान्तिकद्रुमम् ।
दृप्तशार्दूल लाङ्गूलाच्छोटस्फोटितभूतलम् ॥२३॥
अस्तोकघूक घूत्कारघोर भूरुहगह्वरम् ।
नृत्यद्भूतपदाघात पतद्गिरि तटोपलम् ॥२४॥

भयङ्करं द्विविषदामप्येकं पदमापदाम् ।
भ्रातृभ्यां सहितस्ताभ्यां तदरण्यं विवेशसः ॥२५॥ वि०
ते जटामुगुटान्मूर्ध्नि धारयंतस्तपस्विवत् ।
अक्षसूत्रधरा नाशावंशाग्रन्यस्तदृष्टयः ॥२६॥
श्वेतांशुकस्ततोयामद्वितयेन लयोपि हि ।
सर्वकामप्रदामष्टाक्षरां विद्यामसाधयन् ॥२७॥
दशकोटीसहस्राणि जपौ यस्य फलप्रदः ।
आरेभिरे ते जपितुं तं मन्त्रं षोडशाक्षराम् ॥२८॥
तदाश्वनादृतो नाम जम्बूद्वीपपतिः सुरः ।
सान्तःपुरं क्रीडनाय तत्रायातो ददर्शतान् ॥२९॥
विद्यासाधनविघ्नाय तेषां यक्षाधिपः सतु ।
अनुकूलोपसर्गायप्रजिघाय स्वयोषितः ॥३०॥
तेषां क्षोभार्थमायाता स्तद्रूपै रतिसुन्दरैः ।
ताः क्षोभं स्वयमेवेयुर्विस्मृतस्वामिशासनाः ॥३१॥
निर्विकारान् स्थिराकारां स्तूष्णीकानवलोक्यतान् ।
अक्षलिमस्मरवेशविवशा स्ता बभाषिरे ॥३२॥
भो भो ध्यानजडा यूयं यत्नतः पश्यताग्रतः ।
देव्योपि च वशीभूताः का वः सिद्धिरतः परा ॥३३॥
किं विद्यासिद्धये यत्नस्त्क्लेशेनामुनाक्ततम् ।
किं करिष्यथ विद्याभिर्देव्यः सिद्धा वयं हि वः ॥३४॥

एमध्वं स्वैरमस्माभिस्त्रयाणां जगतामपि।
रम्य रम्य प्रदेशेषु सुरदेश्या यथारुचि॥३५॥
सकाममिति जल्पन्त्योऽनल्पधैर्यैषु तेषु ताः।
विलक्षाजग्मिरे यक्षा स्तालिकानैकहस्तिका॥३६॥
जम्बूद्वीपपति र्यक्ष स्ततस्तानऽब्रवीदिति।
मुग्धैः किमेतदारब्धं युष्माभिः कष्टचेष्टितम्॥३७॥
मन्ये पाषण्डिना केनाप्यकाण्डे मृत्युहेतवे।
पाषण्डं शिक्षितायूयमनाप्तेन दुरात्मनी॥३८॥
यातयाताधुनाप्येनं मुक्त्वा ध्यानदुराग्रहम्।
ब्रूताहमपि यच्छामि वाञ्छितं वः कृपापरः॥३९॥
इत्युक्तेपि हि तुष्णीकां स्तान् क्रुद्धः सोऽब्रवीदिति।
मुक्त्वा प्रत्यक्षदेवं मां किमन्यं ध्यायथाऽपरम्॥४०॥
इति सक्रूरवाग्यक्षस्तत्परिक्षो भहेतवे।
भूसंज्ञायासमादिक्षत् किं कारान् वानमन्तरान्॥
ततः किलकलारापकारिणो वङ्करूपिणः।
उत्पाद्यगिरिशृङ्गाणि तदग्रे केपिचिक्षिपुः॥४२॥
चन्दनद्रुमवत्सर्प्पी भूयतान् केप्यवेष्टयन्।
सिंहीभूयपुरस्तेषां पूच्चक्रुः केपिदारुणाम्॥४३॥
अथभल्ल वृकव्याघ्रविडालादि वपुर्द्धतः।
चक्रुर्विभीषिकां केचिन्नाक्षुभ्यं स्ते तथापिहि॥४४॥

कैकसीं रत्नश्रवसं जामिं चन्द्रनखाञ्च ते ।
विकृत्यवद्‌दाय पुरस्तेषां सपदि चिच्छिपुः ॥४५॥
रत्नश्रवः प्रभृतयस्ते च मायामया स्तदा ।
उदयश्रुनयना एवं चक्रुं दुःकरुणस्वरम् ॥४६॥
वयं हन्यामहेवधातिर्यञ्चो लुब्धकैरिव ।
एभिर्गतघृणैः कैश्चिद् युष्माकं पश्यता मपि ॥४७॥
उत्तिष्ठोत्तिष्ठ वत्सत्वं त्रायस्व दशकन्धर ।
एकान्तभक्तास्तादृक् त्वमस्मात्कथमुपेक्षसे ॥४८॥
यो बलोऽपि महाहारं तं कण्ठेविन्यधास्स्वयम् ।
तस्य बाहुबलं क्वाऽद्य क्वा हुङ्कारस्य ते गतः ॥४९॥
कुम्भकर्णत्वमपि नो नाकर्णयसि किं वचः ।
यदैव मस्मान् दीनास्यानुदासीन इवैक्षसे ॥५०॥
विभीषणक्षणमपि न भक्तिविमुखोभवः ।
किं परावर्त्तित इव दुष्टदैवेन सम्प्रति ॥५१॥
विलपत्स्वपितेष्वेवं नचेलु स्ते समाधितः ।
ततस्तदग्रे तन्मौलींश्चिच्छिदुर्यक्षकिङ्कराः ॥५२॥
अपश्यन्त इवाग्रस्तमपितत्कर्मदारुणम् ।
नमनागप्ययुः क्षोभं ते ध्यानाधीनचेतसः ॥५३॥
रावणाग्रे पातयं स्ते मौली तदनुजन्मनोः ।
दशग्रीवस्य मूर्द्धानं तयोरग्रे तु मायया ॥५४॥

किञ्चिच्चक्षुभतुर्कोपात् कुम्भकर्णविभीषणौ ।
गुरुभक्तिस्तत्र हेतु र्न पुनः स्वल्पसत्वता ॥५५॥
रावणः परमार्थञ्च स्तमनर्थमचिन्तयन् ।
विशिष्टध्याननिष्ठोऽभूद्गिरीन्द्र इव निश्चलः ॥५६॥
साधुसाध्वित्यभूद्वाणी गीर्वाणानामऽथाम्बरे ।
ते च द्रुतमुपासर्प्यंश्चकिता यक्षकिङ्कराः ॥५७॥
इष्टश्चक्रवर्त्तिन्य इति जल्पन्त उच्चकैः ।
विद्याः सहस्रमभ्येयुर्दशास्यं द्योतिताम्बराम् ॥५८॥
प्रज्ञप्तीरोहिणी गौरीगान्धारी च तथा परा ।
नभःसञ्चारिणी कामदायिनी कामगर्व्विणी ॥५९॥
अणिमा लघिमा ऽक्षोभ्या मनस्तंभनकारिणी ।
सुविधानातपोरूपा दहनीविपुलोदरी ॥६०॥
शुभप्रदा रजोरूपा दिनरात्रिविधायिनी ।
वज्रोदरी समाकृष्टिरदर्शन्यजरामरा ॥६१॥
अनलस्तम्भनी तोयस्तम्भनी गिरिदारणी ।
अवलोकनी तु वह्निर्घोराधीरा भुजङ्गिनी ॥६२॥
वारुणी भुवनाबध्या दारुणी मदनाशिनी ।
भास्करीरूपसम्पन्नोरोशानी विजयाजया ॥६३॥
वर्द्धनीमोचनी चैव वाराहीकुटिलाकृतिः ।
चित्तोद्भवकरीशान्तिः कौवेरी वशकारिणी ॥६४॥

योगेश्वरीबलोत्साद्या चण्डाक्षीति प्रधर्षिणी।
दुर्न्निवाराजगत्कम्पकारिणी भानुमालिनी ॥६५॥
एवमाद्यां महाविद्याः पुरासुक्कृतकर्म्मणा।
स्वल्पैरेवदिनैः सिद्धा दशास्यस्य महात्मनः॥६६॥अष्टभि
सम्बृद्धि जृम्भणीसर्व्वाहारिणी व्योमगामिनी।
इन्द्राणीति पञ्चविद्याः कुम्भकर्णस्य चासिधन्॥६७॥
सिद्धार्थ्यशत्रुदमनी निर्व्याघाता खगामिनी।
विद्यास्वतस्त्रः संसिद्धाः कुम्भकर्णानुजन्मनः ॥६८॥
जम्बूद्वीपपतिः सोपि क्षमयामा सरावणम्।
महतामपराधेहि प्रणिपातः प्रतिक्रिया: ॥६९॥
सयक्षोकृत तत्रैव रावणस्य कृते कृती।
स्वयं प्रभं पुरं विप्र प्रायश्चित्तचिकीरिव ॥७०॥
विद्यासिद्धिंतु तां तेषां श्रुत्वा तौ पितरौ स्वसा।
बन्धवश्चाय यक्ष स्तत्र प्रतिपत्तिस्ततैः कृताः॥७१॥
पितौदृशां सुधादृष्टिं बधूनामैकमुत्सवम्।
जनयन्तः सुखं तस्थुर्भ्रातरस्ते त्रयोपेहि ॥७२॥
उपावासैरथोषड्भि श्चन्द्रहासमसिम्बरम्।
दशास्याः साधयामासौपयिकं साधने दिशाम् ॥७३॥
इतश्च वैताढ्यगिरौ दक्षिणश्रेणिभूषणे।
पुरेभूत्सुरसङ्गीते मयो विद्याधरेश्वरः॥७४॥

तस्य हेमवतीनाम गुणानां धामगेहिनी ।
तत्कुक्षिजन्मा दुहिता नाम्नामन्दोदरीत्यभूत् ॥ ७५॥
तां प्राप्तयौवनां प्रेक्ष्य तद्वरार्थी व्यचिन्तयत् ।
विद्याधरकुमाराणां ययराजोगुणागुणान् ॥ ७६॥
अनुरूपमपश्यंश्च वरं मयः नरेश्वरः ।
यावद्विषादमग्नो स्यात्तावन्मन्त्रेव मंब्रवीत् ॥७७॥
स्वामिन्माविषादकिञ्चिदस्त्यस्या उचितोवरः ।
रत्नश्रवः सुतोदोष्मान् रूपवांश्च दशाननः ॥ ७८॥
सिद्धविद्यासहस्रस्याऽकम्पितस्य सुरैरपि ।
विद्याधरेषु नास्यास्ति तुल्योमेरोरिवाद्रिषु ॥७९॥
एव मेतदिति प्रोच्य मयो हर्षमहामनाः ।
सबान्धवः ससैन्यश्च सान्तःपुरपरिच्छदः ॥८०॥
मन्दोदरी मुपादायप्रदातुं दशमौलये ।
पुरुषैर्ज्ञापयित्वा स्वं स्वयं प्रभुपुरं ययौ ॥८१॥
सुमालिप्रमुखास्तत्र गोत्रवृद्धा महाशया ।
मन्दोदरीदशास्याय ग्रहीतुं प्रतिपेदिरे ॥८२॥
विवाहं कारयामासु स्तयोरथ शुभे दिने ।
वैवाहिका सुमाल्याद्यामयप्रभृतयश्च ते॥८३॥
ययुर्मयाद्याः स्वपुरं कृतोद्वाहमहोत्सवाः ।
रावणोपि चिररेमे रमणीवरया तया ॥८४॥

५

रावणः क्रीडयान्येद्युर्ययौ मेघरवं गिरिम् ।
उत्पतन्तमिव पार्श्वावलम्बिभिर्मेघमण्डलैः ॥८५॥
सरस्य पश्यन्सस्नांती स्तत्र खेचरकन्यकाः ।
षट्सहस्रान् सोऽम्बर स इव नीरसरस्वति ॥८६॥
पद्मिन्य इव मार्त्तण्डं स्मेरलोचनपङ्कजाः ।
नाथीयन्त्यः सानुरागा स्तमोचां चक्रिरेऽथताः ॥८७॥
सद्योऽप्यपास्तमन्दाक्ष्य ममन्दस्मरपीडिता ।
भर्त्तानस्त्वमभवेवन्ताः प्रार्थयां चक्रिरे स्वयम् ॥८८॥
तत्र पद्मावतीसर्वश्रीसुरसुन्दरोद्भवा ।
मनोवेगाबुधसुता चान्याशौ कलताभिधा ॥८९॥
अन्याविद्युत्प्रभानाम सुता कनकसंध्ययोः ।
एवमन्या अपि जगत्प्रख्यातान्वयसम्भवाः ॥९०॥
ताः सरागाः सरागेण दशग्रीवेन कन्यकाः ।
गान्धर्व्वेन विवाहेन सर्वा अप्युपयेमिरे ॥९१॥
तत्सौ विदा स्तत्पितृणामिदमेत्य व्यजिज्ञपन् ।
कोप्येष ऽकन्यायौष्माकीः परिणीयाद्य गच्छति ॥९२॥
समं तत्पितृभिर्विद्याधरैरमरसुन्दरः ।
क्रुद्धोन्वधावद्दृभसाज्जिवांसुर्दशकन्धरः ॥९३॥
नवोढा स्ता दशग्रीवमूचुः प्रकृतिकातराः ।
त्वरितं प्रेरय स्वामिन्विमानं माविलम्बयः ॥९४॥

एकोऽप्यजेयोऽयं विद्याधरेन्द्रोऽमरसुन्दरः ।
किं पुनः कनकबुधःप्रमुखैः परिवारितः ॥९५॥
दशास्यस्तद्गिरा स्मित्वा व्याजहारेति सुन्दरीः ।
पश्यताऽयिममामीभिर्गरुडस्योरगैरिव ॥९६॥
इति ब्रुवाणमीयुस्तं कुर्वाणाः शस्त्रदुर्दिनम् ।
घना इव महाशैलं विद्याधरमहाभटाः ॥९७॥
अस्त्राण्यस्त्रैः खंडयित्वा रावणो वीर्य्यदारुणः ।
सद्यः प्रस्वापनास्त्रेणाजिर्वांसु स्तानमोहयेत् ॥९८॥
नागपाशैरबध्नाच्च पशूनिव दशाननः ।
प्रेयसीभिः पितृभिक्षां याचितस्तान्मुमोच च ॥९९॥
ततस्ते स्वपुरं जग्मुः समन्ताभिश्च रावणः ।
स्वयं प्रभुपुरं प्रापद्दत्तार्घोमुदितैर्जनैः ॥१००॥
अथ कुम्भपुरे शस्य महोदरमहीपतेः ।
सुरूपनयनादेवी कुक्षिजां नवयौवना ॥१०१॥
सुतां नाम्ना तडिन्मालां तडिन्मालोपमद्युतिम् ।
पूर्णकुम्भस्तनाभोगां कुम्भकर्ण उपायत ॥२॥ युग्मं ॥
वैताढ्यदक्षिणश्रेण्यां ज्योतिष्पुरपुरे शितुः ।
वीरनाम्नो नन्दवती देवीकुक्षिसमुद्भवाम् ॥३॥
पङ्कजश्रीदसुदृशं नामतः पङ्कजश्रियम् ।
कन्यां सुरस्त्रियमिव पर्य्यणैषीद्बिभीषणः ॥४॥ युग्मं ॥

अथ मन्दोदरीदेवी देवेन्द्रसमतेजसम् ।
पुत्रमिन्द्रजितं नाम सुषुवेऽद्भुतविक्रमम् ॥५॥
कियत्यपिगते काले द्वितीयमपि नन्दनम् ।
मेघवन्नयनानन्दं सुषुवे मेघवाहनम् ॥६॥
आकर्ण्यपितृवैरं तत्कुम्भकर्णविभीषणौ ।
धनदाधिष्ठितां लङ्कां सुपद्रुद्रुवतुः सदा ॥७॥
दूतेन धनदोऽथैव मवोचत् सुमालिनम् ।
निजौ शाधिशिशूहन्त रावणावरजाविमौ ॥८॥
स्वान्यशक्ती नजानीतो दुर्मदौ वीरमानिनौ ।
एतौ पातालल‌ङ्कास्थौ भेकौ कूपोद्भवाविव ॥९॥
अस्मत्पूर्यामवस्कन्दं ददाते छलकर्मणा ।
जितकामितया मत्तौ मया चिरमुपेक्षितौ ॥१०॥
नचेच्छिक्षयसि क्षुद्र तदिमौ मालिवर्त्मना ।
त्वया सहैव नेष्यामित्वां वेत्स्यस्मद्बलं ननु ॥११॥
इत्युक्तौ रावणं क्रुद्धोऽभ्यधादिति महामनाः ।
अरेक एष धनदः करदो यः परस्यहि ॥१२॥
अन्यस्य शासनाल्लङ्कां यः शास्त्यैवं वदन् स किम् ।
नलज्जा ते स्वात्मनोपि तस्य धार्ष्ट्यमहोमहत् ॥१३॥
दूतोसीति न हन्मित्वां याहीतिदशमूलिना ।
विसृष्टो धनदं गत्वा दूतो सद्यथातथम् ॥१४॥

दूतानुपदमेवाथ दशकण्ठः सहोदरः ।
ससैन्यः प्रययौ लङ्कां समर्षेण गरीयसा ॥१५॥
अग्रे गतेन दूतेन तेनाख्यातप्रवृत्तिकः ।
ससैन्यो धनदो लङ्कां नगर्य्यां निर्ययौ युधे ॥१६॥
वन्यामिव महावातः प्रसरन्ननिवारितम् ।
क्षणादभांक्षीद्धनदाक्षौहिणीं दशकन्धरः ॥१७॥
रावणेन बले भग्ने भग्नं मन्यः स्वयं ततः ।
एवं वैश्रवणो दध्यौ विघातक्रोधपावकः ॥१८॥
सरसो लूनपद्मस्य भग्नदन्तस्य दन्तिनः ।
शाखिनश्छिन्नशाखस्य लङ्कारस्य च निर्मणेः ॥१९॥
नष्टज्योत्स्नस्य शशिनस्तोयदस्य गताम्भसः ।
परैश्च भग्नमानस्य मानिनोऽधिगवस्थितिम् ॥२०॥ यु०॥
तस्याथ वास्तऽवस्थानं यतमानस्य मुक्तये ।
स्तोकं विहायवह्निष्णुर्नहि लज्जास्पदं पुमान् ॥२१॥
तदलं ममराज्येनाऽनेकानर्थप्रदायिना ।
उपादास्ये परिव्रज्या द्वारं निर्वाणवेश्मनः ॥२२॥
अप्येतावपकर्त्तारौ कुम्भकर्णविभीषणौ ।
जातौ ममोपकर्त्तारावीदृक्पथ निदर्शनात् ॥२३॥
रावणोऽग्रेऽपि मे बन्धुर्बन्धुः सम्प्रतिकर्मतः ।
विनाशोपक्रममिमं नहि स्यान्मम धीरियम् ॥२४॥

एवं विमृश्य धनदस्त्यक्त्वा शस्त्रादि सर्व्वतः ।
तत्त्वनिष्ठः परिव्रज्यां स्वयमेव समाददे ॥२५॥
तं नत्वा रावणोप्येवमुवाच रचिताञ्जलिः ।
ज्येष्ठो भ्राता त्वमसि मे सहस्वागोऽनुजन्मनः ॥२६॥
राज्यं कुरुष्व निःशङ्को लङ्कायामपि बान्धव ।
वयमन्यत्र यास्याम नहीयत्येव मेदिनी ॥२७॥
तस्मिन्नेवं ब्रुवाणेपि महात्मा प्रतिमास्थितः ।
न किञ्चिदूचे धनदस्तद्भवेपि शिवंगमी ॥२८॥
निरीहं धनदं ज्ञात्वा क्षमयित्वा प्रणम्य च ।
विमानं पुष्पकं तस्य सोऽग्रहीत्सह लङ्कया ॥२९॥
जयलक्ष्मीलतापुष्पं सोऽधिरुह्याथ पुष्पकम् ॥
सम्मेदशैलश्टङ्गेऽर्हत्प्रतिमा वन्दितुं ययौ ॥३०॥
वन्दित्वा प्रतिमा शैलाद्रावणस्यावरोहतः ।
सेनाकलकलेनैको जगर्ज्ज वनकुञ्जरः ॥३१॥
अथ प्रहस्त इत्यूचे प्रतिहारो दशाननम् ।
हस्तिरत्नमसौ देवा देवस्यार्हति योग्यताम् ॥३२॥
ततः पिङ्गोत्तुङ्गदंतं मधुपिङ्गललोचनम् ।
उदयग्रकुम्भशिखरं मदनिर्भरिणीगिरिम् ॥३३॥
सप्तहस्तसमुच्छ्रायं नवहस्तायतञ्च तम् ।
क्रीडापूर्व्वं वशीकृत्याध्यारुरोह दशाननः ॥३४॥यु०॥

चकार तस्य भुवनालङ्कार इतिनाम सः ॥
ऐरावणगजारूढः शक्रलक्ष्मीं विडम्बयन् ॥३५॥
गजमालानितं कृत्वा तत्रैवा वा सतां निशाम् ।
दशास्यः प्रातरध्यष्टादाश्यानीं सपरिच्छदः ॥३६॥
तत्रोपेत्य प्रतीहारविज्ञप्तो घातजर्जरः ।
विद्याधर स्तं पवनवेगो नत्वैव मब्रवीत् ॥३७॥
देवपातालत्लङ्कायाः किष्किन्धिनृपनन्दनौ ।
किष्किन्धायां गतौ सूर्य्यरजास्टच्चरजा अपि ॥३८॥
अभूद्युद्धं तयो स्तत्र यमेन सह भूभुजा ।
यमेनैवातिदुद्धेरेण प्राणसंशयदायिना ॥३९॥
चिरं युद्धायमेनोच्चैर्बद्धाकारानिकेतने ।
क्षिप्ता ष्टच्चरजादित्यराजो सदिदस्युवत् ॥४०॥
विधाय नरकावासां स्तेन वैतरणीयुतान् ।
छेदभेदादि दुःखन्तौ प्राप्यते सपरिच्छदौ ॥४१॥
तौ त्वदीयौ क्रमायातौ सेवकौ दशकन्धरम् ।
आचयत्वमलंध्याज्ञः तवैव सपराभवः ॥४२॥
रावणोऽपि जगादैव मेव मेतदसंशयम् ।
आश्रयस्य हि दौर्बल्यादाश्रितः परिभूयते ॥४३॥
परोक्षतः पत्तायोऽमी यद्वद्वा स्तेन दुर्द्धिया ।
कारायां यत्र निक्षिप्ता एष यच्छामि तत्फलम् ॥४४॥

इत्यदीर्योग्रदोर्वीर्य्यैः सानीको नीकलालसः ।
पुरीं जगाम किष्किन्धां यमदिक्पालपालिताम् ॥४५॥
वपुपानशिलास्फाल पशुच्छेदादिदारुणान् ।
ददर्श नरकां स्तत्र सप्तापि दशकन्धरः ॥४६॥
क्लिश्यमानान्निजान्यत्नीन् दृष्ट्वा रुष्टो दशाननः ।
परमाधार्मिकां स्तत्र त्रासयन्नरुडो हि वत् ॥४८॥
सपत्नीन्मोचयामास तत्रस्थानापरानपि ।
महतामागमोह्याशुक्लेशच्छेदाय कस्य न ॥३८॥
यमाय नरकारक्षा स्तत्र नारकमोक्षणम् ।
क्षणाद्गत्वा समाचाख्युः सपूत्कारोर्द्ध्वबाहवः ॥५०॥
क्रोधारुणाक्षः सद्योपि यमोयम इवापरः ।
नगर्य्यानिर्ययौ योद्धुं यद्धनाटकसूत्रभृत् ॥५०॥
सैन्याःसैन्यैः समं सेनाधिपैः सेनान्य आहवम् ।
चतुर्यमः पुनः क्रुद्धेन दशमौलिना ॥५१॥
शराशरिचिरं कृत्वा यमोऽधाविष्टवेगतः ।
शुण्डादण्डमिव व्यालादण्डमुत्पाद्यदारुणम् ॥५२॥
खण्डशः खण्डयामास नालकाण्डमिवाथतम् ।
क्षुरप्रेण दशग्रीवः पशुवद्गणयन्परान् ॥५३॥
यमः पृष्ठत्कैर्भूयोपिच्छादयामास रावणम् ।
अवारयद्रावणस्तान् लोमः सर्वगुणानि वः ॥५४॥

युगपद्भूयसो बाणान् वर्षन्नथ दशाननः।
यमं जर्ज्जरयां चक्रे जरेव बलनाशकृत् ॥५५॥
अथ प्रणश्य संग्रामाद्यमस्त्वरितमभ्यगात्।
रथनूपुरानतारमिन्द्रं विद्याधरेश्वरम् ॥५६॥
यमः शक्रं नमस्कृत्य जगादेति कृताञ्जलिः।
जलाञ्जलिर्मयादायि यमत्वाय प्रभोऽधुना ॥५७॥
रुष्य वा तुष्य वा नाथ करिष्ये यमतां नहि।
उत्थितो हि दशग्रीवो यमस्यापि यमोऽधुना ॥५८॥
विद्राव्य नरकारक्षान्नारकास्ते न मोचिताः।
व्रणव्रतधनैर्नोच्चैर्ज्जीवन्मुक्तोऽस्मि चाहवात् ॥५९॥
निर्जित्यधनदं तेन लङ्कापिजगृहे युधि।
तद्विमानं पुष्पकञ्च जितश्वसुरसुन्दरः ॥६०॥
क्रुद्धोऽथ शक्रो युद्धेच्छुर्निषिद्धः कुलमन्त्रिभिः।
तैस्तैरुपायैर्बलिना सहविग्रहभीरुभिः ॥६१॥
यमाय सुरसङ्गीतं पुरमिन्द्रोऽथ दत्तवान्।
स्वयं तथैवतस्थौ च विलसन् रथनूपुरे ॥६२॥
दूतश्चादित्य रजसे किष्किन्धानगरीं ददौ।
दशास्यो रक्षरजसे पुरक्ष्य पुरं पुनः ॥६३॥
जगामनु स्वयं लङ्का मलं कर्मणि विक्रमः।
स्तूयमानो देवतेव बन्धुभिर्नागरैश्च स ॥६४॥

अमरेन्द्रोऽमरावत्यामिव तस्यामवस्थितम् ।
दशास्यः प्रशशासाथ राज्यं पैतामहं महत् ॥६५॥
इतश्चादित्यरजसः कपिराजस्य नन्दनः ।
महिष्यामिन्दुमान्यां वालीनामाभवद् बली ॥६६॥
जम्बूद्वीपसमद्रान्तं वाली बाहुबलोल्वणः ।
नित्यं प्रदक्षिणीकुर्व्वन् सर्व्वचैत्यान्यवन्दत ॥६७॥
सुग्रीव इति चान्योऽभूदादित्यरजसः सुतः ।
कन्या कनीयसी तस्य सुप्रभेति च नामतः ॥६८॥
अभूता ऋक्षरजसोऽप्युभौ भुवनविश्रुतौ ।
भार्य्यायां हरिकान्तायां नलनीलाभिधौ सुतौ ॥६९॥
नरेन्द्र आदित्यरजा वालिने बलशालिने ।
दत्वा राज्यं प्रवव्राज तपस्तप्त्वा ययौ शिवम् ॥७०॥
सम्यग्दृष्टिं न्यायवन्तं दयावन्तं महौजसम् ।
स्वानुरूपं यौवराज्ये सुग्रीवं वाल्यपिन्यधात् ॥७१॥
अन्यदानुदशग्रीवश्चैत्यवन्दन हेतवे ।
सकलक्षोमगजारूढः प्रययौ मेरुपर्वते ।
अत्रान्तरे चन्द्रनखामपश्यन् खरखेचरः ।
जातरागो जातरागां जह्रे मेथ प्रभात्मजः ॥७२॥
ययौ पातालकङ्काञ्च तत्र चन्द्रोदरं नृपम् ।
आदित्यरजसः सूनुं निर्वास्यादत्त तां स्वयम् ॥७४॥

क्षणे नाप्या ययौ मेरौ लङ्कायां दशकन्धरः।
आकर्ण्य तच्चन्द्रणखाहरणं प्रचुकोप च॥७५॥
खरखेचरघाताय चचालाथ दशाननः।
पञ्चानन इव क्रुद्धो गजाखेटककर्मणे॥७६॥
अथ मन्दोदरीदेवी निजगादेति रावणम्।
संरम्भः कोयमस्थाने मनागविम्हश मानद॥७७॥
कन्या ह्यवश्यं कस्मैचिद्दातव्या यदि सा स्वयम्।
वरं वृणीते रुचितमभिज्ञातञ्च साधु तत्॥७८॥
अनुरूपो वरश्चन्द्रणखाया दूषणाग्रजः।
अदूषणश्च ते पत्तिर्भविष्यत्येष विक्रमी॥७९॥
प्रेष्य प्रधानपुरुषांस्तदुद्वाहयतं तया।
अस्मै पातालकङ्काञ्च देहि धेहि प्रसन्नताम्॥८०॥
एवं सोऽवरजाभ्यामप्युक्तो युक्तं विचारकृत्।
प्रस्थाप्य मय मारीचौ तेन तां पर्यणाययत्॥८१॥
ततः पातालकङ्कायां सचन्द्रणखया समम्।
निर्विघ्नं बुभुजे भोगान् दधद्रावणशासनम्॥८२॥
निर्वासिते तदा तेन कालाच्चन्द्रोदरेण्य नृपे।
अनुराधेति तत्पत्नी नष्टागाद्गर्भिणी वने॥८३॥
साऽसूत च वने तस्मिन् सिंहीसिंहमिवोल्बणम्।
विराधञ्च नाम तनयं नयादिगुणभाजनम्॥८४॥

सम्प्राप्तयौवनं सर्व्वकला जलधिपारगः ।
अस्खलत्प्रसरप्रह्वोविजहार महाभुजः ॥८५॥
इतः कथा प्रसङ्गेन सभायां रावणो शृणोत् ।
प्रौढप्रतापं बलिनं वालिनं वानरेश्वरम् ॥८६॥
रावणोऽन्यप्रतापस्याऽसहनो भानुमानिव ।
प्रजिघायानुशिष्यैकं हतं वालि महीभुजे ॥८७॥
सगत्वा वालिनं नत्वा व्याजहारेति धीरवाक् ।
दूतोहं दशकण्ठस्य राजं स्तद्वाचिकं शृणु ॥८८॥
अस्माकं पूर्विजं कीर्त्तिधवलं पूर्वज स्तव ।
शरण्यं शरणायागाच्छ्रीकण्ठो वैरिविद्रुतः ॥८९॥
त्रात्वारिभ्यः स्वयं तं तद्वियोगैककातरः ।
इहैव वानरद्वीपे श्रीकीर्त्तिधवलोन्यधात् ॥९०॥
तदादि चावयो भर्तृभृत्यसम्बन्धतोमिथः ।
भूयां सः क्ष्माभुजोजग्मुः पक्षयोरुभयोरपि ॥९१॥
अथाभवत् क्षितिपतिः किष्किन्धि स्ते पितामहः ।
सुकेश दूत्याभिधया मम तु प्रपितामहः ॥९२॥
तयोरपि हि निर्व्यूढः ससम्बन्धस्तथैव हि ।
ततो नृपः सूर्य्यरजा स्त्वदीय स्त्वभवत्पिता ॥९३॥
यमगुप्ते स्तमाकर्ष यथाहं वेत्ति तज्जनः ।
यथा च किष्किन्धाराज्येन्यधां तदपि विश्रुतम् ॥९४॥

मघवां स्तनयस्तस्य वालिस्त्वमधुनाभव: ।
प्राग्वत्स्वस्वामिसम्बन्धाद्ऽस्मत्सेवां कुरुष्व तत् ॥९५॥
क्रुद्धोप्यविकृताकारो गर्ववह्निशमीतरु ।
एवं गम्भीरगोवालीर्व्याजहार महात्मना: ॥९६॥
अन्योन्यं स्नेहसम्बन्धं जानामि कुलयोर्द्वयो: ।
रक्षो वानरराजानामद्ययावद्खण्डितम् ॥९७॥
सम्पद्यापदि चान्योन्यं पूर्वसाहायकं व्यधु: ।
स्नेहोनिर्बन्धनं तत्र सेव्यसेवकता ननु ॥९८॥
देवं सर्वज्ञमर्हन्तं साधुञ्च सुगुरुं विना ।
सद्यमन्यं न जानीमो मोह: क: स्वामिनस्तत् ॥९९॥
मन्यमानेन सेव्यं स्वमस्मानपि च सेवकान् ।
कुलक्रमागतस्नेहगुण स्तेनायखण्डित: ॥१००॥
तस्य मित्रकुलोत्पत्तेर्निजां शक्तिमजानत: ।
न करोमि स्वयं किञ्चिद्पवादैककातर: ॥ १०१ ॥
विप्रियं कुर्व्वतस्तस्य करिष्यामि प्रतिक्रियाम् ।
अग्रगूर्न भविष्यामि पूर्वस्नेहद्रुकर्त्तने ॥२॥
यथाशक्ति तवस्वामी स करोतु व्रजारे ।
वालिनैवं विसृष्ट: स गत्वाख्यद्दशमौलये ॥३॥
तद्गिरोद्दीपितक्रोध पावकोऽथ दशानन: ।
ससैन्योऽप्युद्गुरस्कन्ध: किष्किन्धामाययौ द्रुतम् ॥४॥

सन्नह्यवालिराजोऽपि राजमानो भुजौजसा ।
तमभ्यगाद्दोष्मतां हि प्रियोयुद्धातिथिः खलु ॥५॥
ततः प्रवृत्ते युद्धमुभयोरपि सैन्ययोः ।
गण्डशैलागण्डशैलिद्रुमाद्रुमि गदागदि ॥६॥
तत्राचूर्य्यन्तशतशो भृष्टपर्पटवद्रथाः ।
क्षितिपिण्डवद्भिद्यन्त महान्तोपि मतङ्गजाः ॥७॥
कुष्माण्डवद्व्यखण्ड्यन्त स्थानेऽतुरङ्गमाः ।
चम्पापुरुषवद्भूमावपात्यन्त च पत्तयः ॥८॥
तं प्रेक्ष्यप्राणिसंहारं सानुक्रोशः प्लवङ्गराट् ।
वीरः सत्वरमभ्येत्य जगादेति दशाननम् ॥९॥
युज्यते न वधः प्राणिमात्रस्यापि विवेकिनाम् ।
पञ्चेन्द्रियाणां हस्त्यादि जीवानाम्बत का कथा ॥१०॥
द्विषज्जयाय यद्येष तथाप्यर्हो न दोष्मताम् ।
दोष्मन्तो हि निजैरेव दोर्भिर्विजयकांक्षिणः ॥११॥
त्वं दोष्मान् श्रावकश्चासि सैन्ययुद्धं विमुञ्च तत् ।
अनेकप्राणसंहाराच्चिराय नरकाय यत् ॥१२॥
एवं सम्बोधितस्तेन दशास्योऽपि हि धर्मवित् ।
अङ्गेन योद्धुमारेभे सर्वयुद्धविशारदः ॥१३॥
यद्यदस्त्रं दशग्रीवोऽक्षिपत्तत्तत् कपीश्वरः ।
स्वास्त्रैः प्रतिजघानोग्रैर्वह्नि स्तेज इवार्यमा ॥१४॥

सार्पवारुणमुख्यानि मन्त्रास्त्राण्यपि रावणः ।
मुमोच तानि ताक्ष्याद्यैरस्त्रैर्वाली जघान च ॥१५॥
अस्त्रमंत्रास्त्रवैफल्य क्रुद्धो दशमुखस्ततः ।
चकर्ष चन्द्रहासासिं महाहि मेव दारुणम् ॥१६॥
एकशृङ्गो गिरिरिवैकदन्त इव कुञ्जरः ।
उच्चन्द्रहासो भाविष्ट वालिने दशकन्धरः ॥१७॥
सचन्द्रहासं लङ्केशं सशाखमिव शाखिनम् ।
वामेन बाहुनावाली लीलयैव समाददे ॥१८॥
तं कन्दुकमिवन्यस्या विहस्तोहस्तकोटरे ।
चतुःसमुद्रीं बभ्राम क्षणेनापि कपीश्वरः ॥१९॥
तदानीमेव तत्रैत्य प्रावनतकन्धरम् ।
दशकन्धरमुद्भिल्वा वालिराजे ब्रवीदिति ॥२०॥
वीतरागं सर्वविदमाप्तं त्रैलोक्यपूजितम् ।
विनार्हतं न मेकस्मिन्नमस्योस्ति कदाचन ॥२१॥
अङ्गोत्थितं द्विषं तं तन्विगमानं येन मोहितः ।
इमामवस्थां प्राप्तोसि मत्प्राणामकुतूहली ॥२२॥
पूर्वोपकारान् स्मरतामया मुक्तोसि सम्प्रति ।
दत्तञ्च पृथिवीराजरमखण्डाज्ञः प्रसाधि तत् ॥२३॥
विजिगीषौ मयि सति तवेयं पृथिवी कुतः ।
क्व हस्तिनामवस्थानं वने सिंहनिषेविते ॥२४॥

तदादाय परिव्रजरां शिवसौख्याय कारणम् ।
किष्किन्धायान्तु सुग्रीवो राजास्त्वाज्ञाधरस्तव ॥२५॥
एवमुक्त्वा निजे राज्ये सुग्रीवं न्यस्य तत्क्षणात् ।
स्वयं गमनचन्द्रर्षिपादमूलेऽग्रहीद्व्रतम् ॥२६॥
त्रिविधापि ग्रहतपस्तत्परप्रतिमाधरः ।
ध्यानवान्निर्ममो वाली मुनिर्व्यूहरतावनौ ॥२७॥
वालिभट्टारकास्याथोत्पेदिरे लब्धयः क्रमात् ।
सम्पदः पादपस्येव पुष्पपत्रफलादयः ॥२८॥
अष्टापदाद्रौ गत्वा च कायोत्सर्गमदत्त सः ।
लम्बमानभुजो बद्धदोलादण्डइव द्रुमः ॥२९॥
कायोत्सर्गं समुत्सृज्य मासान्ते पारणं व्यधात् ।
उत्सर्गपारणान्येवं भूयोभूयश्चकार सः ॥३०॥
इतश्च दशकण्ठाय सुग्रीवः श्रीप्रभां ददौ ।
संशुष्यत्प्राक्तन स्नेहतरोः सारनिसन्निभाम् ॥३१॥
यौवराज्ये तु सुग्रीवो वालिपुत्रं महौजसम् ।
चन्द्ररश्मिमुरज्ज्वल यशाश्चन्द्ररश्मिमन्यवीविशत् ॥३२॥
सुग्रीवप्रतिपन्नाच्च श्रीप्रभां तत्सहोदराम् ।
उपयम्य गृहीत्वा च ययौ लङ्कां दशाननः ॥३३॥
विद्याधरनरेन्द्राणामन्येषामपि कन्यकाः ।
उपायेमे रूपर्वतर्बलादपिहि रावणः ॥३४॥

नित्यालोकपुरे नित्या लोक विद्याधरेशितुः ।
कन्यां रत्नावलीं नाम्ना तदोद्वोढुं चचाल सः ॥३५॥
अष्टापदाद्रेरुपरि गच्छतस्तस्य पुष्पकम् ।
विमानं स्खलितं सद्यो वप्रे बलमिव द्विषाम् ॥३६॥
न्यग्राङ्कुरं महापोत मिव बद्धमिवद्विपम् ।
विमानं रुद्धगतिकं प्रेक्ष्याऽक्रुध्यद्दशाननः ॥३७॥
को मद्विमानस्खलना द्विविक्षति यमाननम् ।
एवं वदन् समुत्तीर्य सोऽद्रिमूर्द्धानमैक्षत ॥३८॥
अधस्तात्स विमानस्य ददर्श प्रतिमास्थितम् ।
वालिनं तस्य शैलस्य नवं शृङ्गमिवोत्थितम् ॥३९॥
ऊचे च रावणः क्रुद्धो विरुद्धोऽद्यापि मय्यसि ।
व्रतं वहसि दम्भेन जगद्वेताहृदम्भिषुः ॥४०॥
कयापि माययाग्रेपि मां वाहीक इवाऽवहः ।
प्राव्राजीः शंकमानोऽस्मत्कृतप्रतिकृतं खलु ॥४१॥
नन्वद्यापि स एवास्मि त एव मम बाहवः ।
कृतप्रतिकृतं तत्ते प्राप्तकालं करोम्यहम् ॥४२॥
सचन्द्रहासं मामूढ्वा यथा भ्राम्य स्त्वमम्बुधिषु ।
तथा त्वां साद्रिमुत्पाद्य क्षेप्स्यामि लवणार्णवे ॥४३॥
एवमुक्त्वा विदार्य्य क्ष्मामष्टापदगिरेस्तले ।
प्रविवेश दशग्रीवस्त्वरितो दिव इवाऽशनिः ॥४४॥

विद्यासहस्रं स्मृत्वा च युगपद्दशकन्धरः।
धरं दुर्द्धरमुद्दध्रे तं दोर्बलमदोद्धुरः ॥४५॥
तडत्तडिति निर्घोषं विनस्यन्तरामरम्।
खलत्खलिति लोलाब्धिपूर्य्यमाणरसातलम् ॥४६॥
खडत्खडिति विभ्रश्यद्ग्रावजुस्त वनद्विपम्।
कडत्कडिति निर्भग्ननितम्बोपवनद्रुमम् ॥४७॥
गिरिं तेनोद्धृतं ज्ञात्वा वलिना स महामुनिः।
अनेकलब्धिनद्याब्धिरिति दध्यौ विशुद्धधीः॥४८॥ त्रि०वि
अः कथं मयि मात्सर्य्यादयमद्यापि दुर्मतिः।
अनेकप्राणिसंहारमकाण्डे तनुतेतराम् ॥४९॥
भरतेश्वरचैत्यञ्च भ्रंशयित्वैष सम्प्रति।
यतते तीर्थमुच्छेत्तुं भरतक्षेत्रभूषणम् ॥५०॥
अहञ्च त्यक्तसङ्गोस्मि स्वशरीरेपि निस्पृहः।
रागद्वेषविनिर्मुक्तो निमग्नः शाम्यवारिणि ॥५१॥
तथापि चैत्यत्राणाय प्राणिनां रक्षणाय च।
रागद्वेषौ विनैवैनं शिक्षयामि मनागहम् ॥५२॥
एवं विमृश्य भगवान् पादाङ्गुष्ठेन लीलया।
अष्टापदाद्रेर्मूर्द्धानं वाली किञ्चिदपीडयत् ॥५३॥
मध्याह्नदेहच्छायावत् पयोवाह्यस्यकूर्मवत्।
अभितः सङ्कुचद्गात्रो दशास्यस्तत्क्षणादभूत् ॥५४॥

अतिभङ्गुरदोर्दण्डो मुखेन रुधिरं वमन् ।
अरावीद्रावयन्नुर्वीं रावण स्तेन सो भवेत् ॥५५॥
तस्य चारटनं दीनं श्रुत्वा वाली कृपापरः ।
तं मुमोचाशु तत्कर्मणि स्त्वामानाय न क्रुशात् ॥५६॥
निःश्वस्य दशकण्ठोऽथ निःप्रतापोऽनुतापवान् ।
उपेत्यवालिनं नत्वा व्याजहारेत्युदञ्जलिः ॥५७॥
भूयोऽपराधानां कर्ताऽहं त्वयि चैवास्मि निस्त्रपः ।
उत्क्षपस्त्वञ्च सोढ़ासि महात्मन् शक्तिमानपि ॥५८॥
मन्ये मयि कृपां कुर्व्वन्नुर्व्वीं प्रागत्यजः प्रभो ।
नत्वसामर्थ्यत स्तत्तु नाज्ञासिषमहं पुरा ॥५९॥
अज्ञानान्नाथ तेनेयं स्वशक्तिस्तोलिता मया ।
अद्रिपर्य्यसने यत्नं कलभेनेव कुर्व्वता ॥६०॥
ज्ञातमन्तरमद्येदं भवतश्चात्मनोपि च ।
शैलवल्मीकयोर्यादृग्यादृग्गरुडनागयोः ॥६१॥
दत्ताः प्राणास्त्वया स्वामिन् मृत्युकोटिं गतस्य मे ।
अपकारिणि यस्येयं मतिस्तस्मै नमोस्तु ते ॥६२॥
दृढ़भक्त्येति भाषित्वा क्षमयित्वा च वालिनम् ।
तिस्रः प्रदक्षिणीकृत्य नमस्चक्रे दशाननः ॥६३॥
तादृग्माहात्म्यमुदिताः साधुसाध्विति भाषिणः ।
उपरिष्ठाद्वालिमुनेः पुष्पवृष्टिं व्यधुः सुराः ॥६४॥

प्रणम्यवालिनं भूयस्तच्छैलमुकुटोपमम् ।
जगाम रावणश्चैत्ये भरतेश्वरनिर्मिते ॥६५॥
चन्द्रहासादिशस्त्राणि मुक्त्वा सान्तःपुरः स्वयम् ।
अर्हताम्रषभादीनां पूजां सोऽष्टविधां व्यधात् ॥६६॥
समाकृष्य स्वसातन्त्रीं प्रसज्य च दशाननः ।
महासाहसिको भक्त्या भुजवीणामवादयत् ॥६७॥
उपवीणयति ग्रामं रागरम्यं दशानने ।
गायत्यन्तःपुरञ्चास्य सप्तस्वरमनोरमम् ॥६८॥
चैत्यवन्दनयात्रायै धरणः पन्नगेश्वरः ।
तत्रायययावर्हतश्च पूजापूर्वमवन्दत ॥६९॥५०॥
अर्हद्गुणमयैर्गीतैः करणं ध्रुवकादिभिः ।
गायन्तं वीणया प्रेक्ष्य रावणं धरणोऽब्रवीत् ॥७०॥
अर्हद्गुणस्तुतिमयं साधु गीतमिदं ननु ।
निजभावानुरूपं ते तेन तुष्टोऽस्मि रावण ॥७१॥
अर्हद्गुणस्तुतेर्मुख्यं फलमोक्ष्यस्तथाप्यहम् ।
अजीर्णवासनस्तुभ्यं किं यच्छामि वृणीष्व भोः ॥७२॥
रावणोप्यभ्यधादेवं देवदेवगुणस्तवैः ।
युक्तं तुष्टोऽसि नागेन्द्र स्वामिभक्तिर्हि सा तव ॥७३॥
तथा तव ददानस्य स्वामिभक्तिः प्रकृष्यते ।
तद्याममाददानस्य सा काममपकृष्यते ॥७४॥

भूयोप्युवाच नागेन्द्रः साधु मानद रावण ।
विशेषतोस्मि तुष्टस्ते निराकाङ्क्षतया नया ॥७५॥
उक्त्वेत्यमोघविजयां शक्तिं रूपविकारिणीम् ।
सोदाद्दिव्यां रावणाय जगाम च निजाश्रयम् ॥७६॥
तीर्थनाथान्नमस्कृत्य नित्यालोकपुरेऽगमत् ।
व्यूह्य रत्नावलीं लङ्कामाजगाम दशाननः ॥७७॥
वालिनोपि तदोत्पाद्य केवलज्ञानमुज्ज्वलम् ।
केवलज्ञानमहिमा विदधे च सुरासुरैः ॥७८॥
क्रमेण कर्मणां सोऽथ भवोपि ग्राहिणां क्षयात् ।
सिद्धानन्त चतुष्टयोगात्पदमक्षमपुनर्भवम् ॥७९॥
इतश्च वैताढ्यगिरौ पुरे ज्योतिः पुराभिधे ।
बभूव नाम्ना ज्वलन शिखो विद्याधरेश्वरः ॥८०॥
वश्याभूच्छ्रीमती देवी श्रीमती रूपसम्पदा ।
तस्याश्च दुहिता यज्ञे तारा तारविलोचना ॥८१॥
तामेकदातु चक्राङ्कविद्याधरनृपात्मजः ।
ददर्श साहसगतिः स्मरार्त्तः सहसाप्यभूत् ॥८२॥
ज्वलनं याचयां चक्रे तां साहसगतिर्नरः ।
वानरेन्द्रश्च सुग्रीवोऽरजोहि बहुवोर्थिनः ॥८३॥
अभिजातौ द्वावपीमौ रूपवन्तौ महौजसौ ।
तत्कस्मै दीयते कन्या पप्रच्छ ज्ञानिनं पिता ॥८४॥

अल्पायुः साहसगतिर्दीर्घायुश्च कपीश्वरः ।
इति नैमित्तिकेनोक्ते सुग्रीवाय ददौ स ताम् ॥८५॥
अभिलाषविप्रलम्भात् साहसोऽपि दिने दिने ।
अङ्गारचुम्बित इव न प्राप क्वापिनिर्वृतिम् ॥८६॥
तारायां रममाणस्य सुग्रीवस्य बभूवतुः ।
द्वावङ्गदयदानन्दाङ्गजौ दिग्गजोर्जितौ ॥८७॥
सचापि साहसगति स्तारायामनुरागवान् ।
मन्मथोन्मथ्यमानात्मा चिन्तयामासिवानिदम् ॥८८॥
चुम्बिष्यामि कदा तस्या मृगशावकचक्षुषः ।
पक्वविम्बाधरदलच्छदनं वदनाम्बुजम् ॥८९॥
कदास्प्रच्यास्यहं तस्या कुचकुम्भा स्वपाणिना ।
कदाच तौ करिष्यामि गाढालिङ्गनवामनौ ॥९०॥
बलेनापि छलेनापि तां हर्त्तास्मीति चिन्तयन् ।
सस्मार स सुखीं विद्यां रूपस्य परिवर्त्तिनीम् ॥९१॥
गत्वा च क्षुद्रहिमवत् गिरौ स्थित्वा गुहान्तरे ।
तं साधयितुमारेभे चक्राङ्कनृपनन्दनः ॥९२॥
इतश्च पुर्य्यालङ्कायाः दिग्यात्रायै दशाननः ।
विकर्त्तनः पूर्व्वशैलतटादिव विनिर्ययौ ॥९३॥
विद्याधरान्नरेन्द्रांश्च द्वीपान्तरनिवासिनः ।
वशीकृत्य स पातालं लङ्कां नाम पुरीं ययौ ॥९४॥

तत्र चन्द्रणखाभर्त्ता खरेण खरभाषिणा ।
प्राभृतैर्भृतकेनैव निभृतं सोऽभ्यपूजयत ॥ ९५ ॥
रावणेन सहाचालीत् खर इन्द्रजिगीषया ।
विद्याधराणां सहस्रैश्चतुर्दशभिरावृतः ॥ ९६ ॥
तत्र सुग्रीवराजोऽपि रक्षोराजस्य दोष्मतः ।
अन्वचालीत्ससैन्योऽपि वायोरिव विभावसुः ॥ ९७ ॥
अनेकपृतनाच्छन्नरोदसीको दशाननः ।
पयोराशिरिवोद्भ्रान्तः प्रययावस्खलद्गतिः ॥ ९८ ॥
कूजन्मरालमालाभिराबद्धरसनामिव ।
पुलिनोर्व्या विपुलया नितम्बेनेव शोभिताम् ॥ ९९ ॥
अलकानीव बिभ्राणान्तरङ्गै रतिभङ्गुरैः ।
कटाक्षानिव मुञ्चन्तीं शफरोद्वर्त्तनैर्मुहुः ॥ २०० ॥
कामिनीमिव चतुरां रेवां नाम तरङ्गिणीम् ।
विन्ध्यशैलादुत्तरन्तीं ददर्शाथ दशाननः ॥ १ ॥ निभिं
रोधस्युवास रेवायाः ससैन्यो दशकन्धरः ।
सिन्धुरग्रामणीर्यूथ समावृतइवोद्धुरः ॥ २ ॥
सोऽथ तस्यां कृतस्नानोवसानोधृतवाससी ।
अर्हद्विम्बं रत्नमयं न्यस्य पट्टे मणीमये ॥ ३ ॥
रेवाम्भोभिः स्नापयित्वा तदम्भोजैर्विकासिभिः ।
समारेभे तु पूजयितुं समाधिसुदृढासनः ॥ ४ ॥ युग्मं ॥

ततश्च पूजाव्यग्रस्य दशग्रीवस्य तस्थुषः ।
अकस्मादब्धिवेलेव महापूरः समाययौ ॥५॥
उन्मूलयन्मूलतोपि गुल्मानीव महीरुहान् ।
तटीनामुन्नतानामप्युपरि प्रासरत्पयः ॥६॥
आस्फोटयत्तटाघातै स्तरीस्तटनियन्त्रिताः ।
विष्वक्शुक्तिपुटानीव अभ्रं लिड्वीचिपंक्तयः ॥ ७॥
रोधोगर्त्तान्महतोपि पातालकुहरोपमान् ।
सपूरः पूरयामास भक्ष्यैः कुक्षिंभरीनिव ॥८॥
समन्तादन्तरीपाणि स्थगयामास सा नदी ।
ज्योतिश्चक्रविमानानि चन्द्रयोगेव पार्व्वणी ॥९॥
मत्स्यानुत्सादयामास प्रोच्छलद्भिर्महोर्मिभिः ।
पूरो महावात इव वेगवाम् द्रुमपल्लवान् ॥१०॥
तत्फेनिलं सावकरं पूरवारि रयागतम् ।
अर्हत्पूजामपानैषीद्दशकण्ठस्य कुर्व्वतः ॥११॥
तेन पूजापहारेण शिरच्छेदाधिकेन सः ।
जातकोपोदशग्रीवः साक्षेपमिदमभ्यधात् ॥१२॥
अरे रे केन वारीदं दुर्वारमतिवेगतः ।
अर्हत्पूजान्तरायाय ऽमुच्यताकारणारिणा ॥१३॥
परस्तादस्ति किं कोपि मिथ्यादृष्टिर्नराधिपः ।
किम्वा विद्याधरः कश्चिद्दसुरो वा सुरोऽथवा ॥१४॥

अथ विद्याधरः कश्चिदाचख्यौ दशमौलये ।
इतः पुरस्तादस्त्युच्चैर्देव माहिष्मती पुरी ॥१५॥
तस्यां नम्ना सहस्रांशुः सहस्रांशुरिवापरः ।
सहस्रांशुर्नृपैः सेव्यः पार्थिवोऽस्ति महाभुजः ॥१६॥
सेतुबन्धेन रेवायां वारिबन्धं व्यधादसौ ।
जलक्रीडोत्सवकृते ऽभिमसाध्यं महौजसाम् ॥१७॥
समं राज्ञी सहस्रेण सहस्रांशु रसावितः ।
वशाभिर्वरदन्ती च सुखं क्रीडति वारिभिः ॥१८॥
आत्मरक्षा लक्षसंख्या द्वयोरपि हि तीरयोः ।
संवर्मिता उदस्त्रास्च तिष्ठन्त्यस्य हरेरिव ॥१९॥
अदृष्टपूर्वोऽवष्टम्भः कोपरश्याऽप्रतिमौजसः ।
शोभामात्रं तथातेऽपि यदि वा कर्मसाक्षिणः ॥२०॥
क्षुभितं जलदेवीभिर्यादोभिश्च पलायितम् ।
जलक्रीडाकराघातैरूर्जितैस्तस्य दोष्मताम् ॥२१॥
दूरमत्यन्तकद्वत्वात् स्त्रीसहस्रयुतेन च ।
तेन पर्य्यस्य मागत्वात्काममुल्लुठितं पयः ॥२२॥
रोधसी प्लावयित्वोभे वेगाद्वारिसमुद्धृतम् ।
इहते प्लावयामास देवपूजां दशानन ॥२३॥
पश्यैतानि च तत् स्त्रीणां निर्माल्यानि दशानन ।
रेवातीरेतरंत्युच्चैस्तदभिज्ञानमादिमम् ॥२४॥

तदङ्गनाजनस्याङ्गरागैर्मृगमदादिजैः ।
इदमत्याविलं वारि दुर्वारं वीरवारण ॥२५॥
इति तद्गिरमाकर्ण्य प्राप्याहुतिमिवानलः ।
उद्दिदीपेऽधिकञ्चैवमुवाच च दशाननः ॥२६॥
अरे मुमूर्षुणा तेन वारिभिः स्वाङ्गदूषितैः ।
दूषिता देवपूजेयं देवदूष्यमिवाञ्जनैः ॥२७॥
तद्यात राक्षसभटास्तं पापं भटमानिनम् ।
बद्ध्वा समानयत भो मत्सीमानायिकानिव ॥२८॥
उच्चैस्तेनैवमादिष्टा अनुचरास्ते दधाविरे ।
लक्षशो राक्षसभटा रेवोर्मय इवोद्भटाः ॥२९॥
तीरस्थितैः सहस्रांशुसैनिकैः सह ते रणम् ।
गत्वा वनान्तरगजैरिव चक्रुर्निशाचराः ॥३०॥
विद्याभिर्मोहयन्तस्ते भूमिष्ठांस्तान्नभःस्थिताः ।
उपद्रुद्रुवुरम्भोदाः सरभान् हि करकैरिव ॥३१॥
स्वानुपद्रूयमाणांस्तु प्रेक्ष्य क्रोधधृताधरः ।
चलत्पताकहस्तेनाश्वासयत्प्रेयसीर्निजाः ॥३२॥
ऐरावणः सुरसिन्धोरिव रेवात उच्चकैः ।
निर्जगाम सहस्रांशुरधिज्यञ्च धनुर्व्यधात् ॥३३॥
बाणैर्विद्रावयामास रक्षोवीरान्नभःस्थितान् ।
सहस्रांशुर्महाबाहुस्तृणपूलानिवानिलः ॥३४॥

व्यावृत्तांस्तांस्तत: प्रेक्ष्य संक्रुद्धो रावण: स्वयम् ।
उपतस्थे सहस्रांशुमभिवर्षञ्छिलीमुखान् ॥३५॥
द्वावप्यमर्षणौ द्वावप्यूर्जितौ द्वावपि स्थिरौ।
विविधैरायुधैर्युद्धं विदधाते चिराय तौ ॥३६॥
दोर्वीर्य्येण विजय्यन्तं ज्ञात्वा जग्राह रावण: ।
विद्यया मोहयित्वेभमिव माहिष्मतीपतिम् ॥३७॥
तं प्रशंसन्महावीर्य्यं जित्वापि जितमन्यथा ।
अनुत्सिक्तो दशग्रीव: स्कन्धावारे नयत्स्वयम् ॥३८॥
सभायां यावदासीन स्तस्थौ हृष्टो दशाननः ।
चारणश्रमणस्तावद्धृतबाहु:समाययौ ॥३९॥
सिंहासनात्समुत्थाय त्यक्त्वा च मणिपादुके ।
अभ्युत्तस्थौ दशास्यस्तं पयोदमिव बर्हिण: ॥४०॥
पपात पादयोस्तस्य पञ्चाङ्गस्पृष्टभूतल: ।
रावणो मन्यमानस्तमर्हद्गुणधरोपमम् ॥४१॥
आसने चासयामास तं मुनिं स्वयमर्पिते ।
प्रणम्य च दशग्रीव: स्वयमुर्व्यामुपाविशत् ॥४२॥
विश्वास इव मूर्त्तिस्थो विश्वाश्वासनबान्धव: ।
धर्मलाभाशिषं तस्मै सोदात्कल्याणमातरम् ॥४३॥
बद्धाञ्जलिं रावणेन समागमनकारणम् ।
मुनिरष्ट: परिपृष्टो ऽभाषिष्टाऽदुष्टया गिरा ॥४४॥

शतबाहुरहं नाम्ना माहिष्मत्यां नृपोऽभवम् ।
भववासादितो भीतः शार्दूलः पावकादिव ॥४५॥
सहस्रकिरणे राज्यमारोप्य निजनन्दने ।
मोक्षध्वास्यन्दनप्राय महं व्रतमशिश्रियम् ॥४६॥
इत्युक्ते दशग्रीवो नमद्ग्रीवो ब्रवीदिति ।
किमसौ पूज्यपादाना मङ्गजन्मा महाभुजः ॥४७॥
ओमित्युक्ते मुनीन्द्रेण निजगाद दशाननः ।
दिग्जयाय क्रमेणाहमिहागच्छं नदीतटे ॥ ४८॥
दत्तावासस्तटेऽमुष्मिन् जिनार्च्चां विकचाम्बुजैः ।
अर्चित्वा यावदेकाग्रमानसस्तन्मयोऽभवम् ॥४९॥
अमुना तावदुन्मुक्तैर्निजस्नानमलीमसैः ।
वारिभिः स्नाविता पूजा तेनाकार्षमिदं क्रुधा ॥५०॥
अज्ञानादमुनाप्येतत् कृतं मन्ये महात्मना ।
त्वत्सूनुरेषः किं कुर्यादर्हदाशातनां क्वचित् ॥५१॥
एवमुक्त्वा सहस्रांशुं नत्वाऽनैषीद्दशाननः ।
लज्जानम्राननः सोऽपि ननाम पितरं मुनिम् ॥५२॥
रावणस्तं बभाणैवं भ्राता मेत्वमतःपरम् ।
तवैवायं ममाप्येष शतबाहुर्मुनिः पिता ॥५३॥
गच्छ शाधि निजं राज्यं गृहाणान्यामपि क्षितिम् ।
अस्माकं हि त्रयाणां त्वं चतुर्थोऽस्यंशभाक् श्रियः॥५४॥

एवमुक्तस्य मुक्तस्य सहस्रांशुरदोऽवदत् ।
नहि राजेन्द्र मे कृत्यं वपुषा वाप्यतः परम् ॥५५॥
पित्राश्रितं श्रयिष्यामि व्रतं संसारनाशनम् ।
अयं हि पन्थाः साधूनां निर्वाणमुपतिष्ठति ॥५६॥
इत्युदीर्य्य दशास्याय समर्प्य तनयं निजम् ।
व्रतं चरमदेहःसः पितृपादान्तिकेऽग्रहीत् ॥५७॥
अनरण्य नरेन्द्राय वाचिकेन तदैव सः ।
स्वयमात्तां परिव्रज्यां कथयामास सौहृदात् ॥५८॥
सोप्ययोध्याधिपोदध्यौ प्रियमात्रेण तेन मे ।
सङ्केत एवमभवदादेयं युगपद्व्रतम् ॥५९॥
स्वप्रतिज्ञामिति स्मृत्वा राज्यं दशरथाय सः ॥
दत्त्वा स्वसूनवे सत्य घनोव्रतमुपाददे ॥६०॥
शतबाहुसहस्रांशू वन्दित्वार्षीद्दशाननः ।
सहस्रांशोः सुतं राजेन्द्र न्यस्याऽथाचलदम्बरे ॥६१॥
तदाच नारदमुनिर्यष्टिघातादि जर्ज्जरः ।
अन्याय इति प्रकुर्व्वन्नेत्याभाषिष्ट रावणम् ॥६२॥
राजन् राजपुरेऽमुष्मिन्मरुतोनाम भूपतिः ॥
मिथ्यादृगस्ति कुर्वाणः क्रतुं दुर्द्विजवासितः ॥६३॥
यज्ञे वधाय चानीतान् सौनिकैरिव तद्द्विजैः ।
पशूनारटतोऽपश्यं पाशबद्धाननागसः ॥६४॥

ततो व्योम्नोवतीर्य्याहं मरुतं ब्राह्मणात्ततम् ।
आह किमिति मारब्धमित्यपृच्छं कृपापरः ॥६५॥
अथोवाच मरुत्तोपि यज्ञोयं ब्राह्मणोदितः ।
अन्तर्वेदीह होतव्याः पशवो देवतृप्तये ॥६६॥
अयं खलु महाधर्मः कीर्त्तितः स्वर्गहेतवे ।
यक्ष्यामि पशुभिर्यज्ञं तदेभिरहमद्य भोः ॥६७॥
ततस्तस्याह मित्याख्यं चतुर्वेदिरुदीरिता ।
आत्मा यष्टा तपोवह्निर्ज्ञानं सर्पिः प्रकीर्त्तितम् ॥६८॥
कर्माणि समिधः क्रोधा दयस्तु पशवो मताः ।
सत्यं यूपः सर्व्वप्राणि रक्षणं दक्षिणा पुनः ६९॥ ॥
त्रिरत्नीन्तु त्रिवेदीयमितिवेदोदितः क्रतुः ।
कृतोयोगविशेषेण मुक्तो भवति साधनम् ॥७०॥
क्रव्यादतुल्या ये कुर्युर्यज्ञं छागबधादिना ।
ते मृत्वा नरके घोरे तिष्ठेयुर्दुःखिनश्चिरम् ॥७१॥
उत्पन्नोस्युत्तमे वंशे बुद्धिमानृद्धिमानसि ।
राजन् व्याधोचितादस्मान्निवर्त्तस्व तदेनसः ॥७२॥
यदि प्राणिबधेनापि स्वर्गोजायेत देहिनाम् ।
तच्छुद्धो जीवलोकोयमल्पैरपि दिनैर्भवेत् ॥७३॥
इदं मम वच श्रुत्वा यज्ञाग्नय इव द्विजाः ।
क्रुद्धा ज्वलन्तः प्रोत्तस्थु र्दण्डपकपाणयः ॥७४॥

ततस्तै स्ताड्यमानेन मया प्राप्तोसि नश्यता ।
नदीपूराभिभूतेनान्तरीपमिव रावण: ॥७५॥
निरागसो वध्यमाना स्तत्तैर्नृपशुभि: पशून् ।
त्रायस्व त्रात एवाहं पुनस्त्वद्दवलोकनात् ॥७६॥
ततो विमानादुत्तीर्य्य दशास्य स्तदिदृक्षया ।
आनर्चे भूभुजा तेन पाद्यसिंहासनादिना ॥७७॥
क्रुद्धो मरुत्तभूपालं जगादैवं दशानन: ।
अरे किमेष: क्रियते नरकाभिमुखैर्मख: ॥७८॥
धर्म:प्रोक्तोह्यहिंसात: सर्व्वज्ञैस्त्रिजगद्धितै: ।
पशुहिंसात्मकाद्यज्ञात्स कथं नामजायताम् ॥७९॥
लोकद्दयारिन्तद्यज्ञं माकार्षीस्त्वत्करिष्यसि ।
मद्धमाविहते वास: परत्र नरके पुन: ॥८०॥
विससर्ज मखं सद्यो मरुत्तनृपतिस्तत: ।
अलङ्घ्या रावणाज्ञा हि विश्वस्यापि भयङ्करा ॥८१॥
अमीपशुवधात्मान: कुत: संयज्ञिरेऽध्वरा: ।
इति पृष्टो दशास्येन निजगादेति नारद: ॥८२॥
अस्तिचदिक्षु विख्याताताम्ना शुक्तिमतीपुरी ।
शुक्तिमत्याख्यया नद्या ममसख्येव शोभिता ॥८३॥
गतेष्वनेक भूपेषु सुव्रतान्मुनिसुव्रतान् ।
अभिचन्द्रोऽभवत्तस्यां राजा राज्यभ्रृतांवर: ॥८४॥

अभिचन्द्रस्य तनयो वसुरित्यभिधानतः ।
अजायतमहाबुद्धिः प्रसिद्धः सत्यवाक्तया ॥८५॥
पार्श्वे चीरकदम्बस्य गुरोः पर्व्वतकः सुतः ॥
राजपुत्रोवसुश्चाहं चापठामस्त्रयोपि हि ॥८६॥
सुप्तेष्वस्मासु सदा नः परिपाठश्रमान्निशि ।
चारणश्रमणौव्योम्नियाताविव्यूचतुर्मिथः ॥८७॥
एषामेकतमः स्वर्गं गमिष्यत्यपरौ पुनः ।
नरकं यास्यतस्तच्चाऽश्रौषीत्चीरकदम्बकः ॥८८॥
तच्छ्रुत्वा चिन्तयामास खिन्नः चीरकदम्बकः ।
मय्यप्यध्यापके शिष्यौ यास्यतो नरकं हहा ॥८९॥
एभ्यः को यास्यति स्वर्गं नरकं कौ च यास्यतः ।
जिज्ञासुरित्युपाध्यायोऽस्मांस्त्रीन्युगपदाह्वयत ॥९०॥
समर्प्य गुरुरस्माकमेकैकं पिष्ठकुक्कुटम् ।
उवाचामी तत्र बध्या यत्र कोपि न पश्यति ॥९१॥
वसुपर्वतकौ तत्र गत्वा शून्यप्रदेशयोः ।
आत्मनीनां गतिमिव जघ्नतुः पिष्ठकुक्कुटौ ॥९२॥
दवीयसि प्रदेशेतु गत्वाहं नगराद्बहिः ।
स्थित्वा च विजने देशे दिशः प्रेच्येत्यतर्कयम् ॥९३॥
गुरुपादोरदस्तावदादिष्टं वत्स यत्त्वया ।
वध्योयं कुक्कुटस्तत्र यत्र कोपिन पश्यति ॥९४॥

असौ पश्यत्यहं पश्याम्यामोपश्यन्ति खेचराः ।
लोकपालाश्च पश्यन्ति पश्यन्ति ज्ञानिनोपि हि ॥९५॥
नास्त्येव स्थानमपि यत्र कोपि न पश्यति ।
तात्पर्य्यं तद्गुरुगिरां न वध्यः खलु कुक्कुटः ॥९६॥
गुरुपादास्तथावन्तः सदा हिंसापराङ्मुखाः ।
अस्मत्प्रज्ञां परिज्ञातुमेतन्नियतमादिशन् ॥९७॥
विमृश्यैवमहत्वैव कुक्कुटं चाहमागमम् ।
कुक्कुटाहनने हेतुं गुरोर्विज्ञापयं वत ॥९८॥
स्वर्गं यास्यत्यसौ तावदिति निश्चित्य गौरवात् ।
आलिङ्गितोहं गुरुभिः साधु साध्विति भाषिभिः ॥९९॥
वसुपर्व्वतकौ पश्चादागत्यैवं शशंसतुः ।
निहतौ कुक्कुटौ तत्र यत्र कोपि न पश्यति ॥२००॥
अपश्यतं युवामादावपश्यन् खेचरादयः ।
कथं हतौ कुक्कुटौ रे पापावित्यशपद्गुरुः ॥१॥
ततः खेदादुपाध्यायो दध्यौ विध्यतपाठधीः ।
मुधामेध्यापनक्लेशो वसुपर्व्वतयोरभूत् ॥२॥
गुरूपदेशोहि यथा पात्रं परिणमेदिह ।
अम्भांभः स्थानभेदेन मुक्तालवणतां व्रजेत् ॥३॥
प्रियः पर्वतकः पुत्रः पुत्रादप्यधिको वसुः ।
नरकं यास्यतस्तस्माद्गृहवासेन किं मम ॥४॥

निर्वेदादित्युपाध्यायः प्रव्रज्यामग्रहीत्तदा ।
तत्पदं पर्व्वतोऽध्यास्त व्याख्याक्षेणविचक्षणः ॥५॥
भूत्वा गुरोः प्रसादेन सर्व्वशास्त्रविशारदः ।
पुनरेव निजं स्थानमहन्तु गतवांस्तदा ॥६॥
नृपचन्द्रोऽभिचन्द्रोऽपि जग्राह समये व्रतम् ।
ततश्चाभूद्वसू राजा वासुदेव समः श्रिया ॥७॥
सत्यवादीति स प्राप प्रसिद्धिं पृथिवीतले ।
तां प्रसिद्धिमपि त्रातुं सत्यमेव जगाद सः ॥८॥
अथैकदा मृगयुणा मृगाय मृगया जुषा ।
चिक्षिपे विशिखोविन्ध्यनितम्बे सोऽन्तरास्खलत् ॥९॥
दृष्टु स्खलनहेतुं स ज्ञातुं तत्र ययौ ततः ।
आकाशस्फटिकशिलामज्ञासीत्पाणिनास्पृशन् ॥१०॥
स दध्याविति मन्येऽस्यां संक्रान्तः परतश्चरन् ॥
भूमिच्छायेव शीतांशावदर्शि हरिणो मया ॥११॥
पाणिस्पर्शं विनानेयं सर्व्वथाप्युपलक्ष्यते ।
अवश्यं तदसौ योग्या वासार्हा वसुमतीपतेः ॥१२॥
रहो विज्ञापयद्राज्ञे गत्वा तां मृगयुः शिलाम् ।
हृष्टो जग्राह राजापि ददौ चास्मै महद्धनम् ॥१३॥
स तया घटयामास छन्नं स्वासनवेदिकाम् ।
तच्छिल्पिनो घातयच्च नात्मीयाः कस्यचिन्नृपाः ॥१४॥

तस्यां सिंहासनं वेदौ चेदौशस्य निवेशितम्।
सत्य प्रभावादाकाशस्थितमित्यबुधज्जनः ॥१५॥
सत्येन तुष्टा सान्निध्यमस्य कुर्वन्ति देवताः।
एवमूर्ज्जस्विनोतस्य प्रसिद्धिर्व्यानशे दिशः ॥१६॥
तया प्रसिद्ध्या राजानो भीतास्तस्य वशं ययुः।
सत्या वा यदि वा मिथ्या प्रसिद्धिर्जयिनो नृणाम्॥१७॥
तत्रान्यदाहमभ्यागामद्राक्षमथ पर्वतम्।
व्याख्यानयन्तमृग्वेदं शिष्याणां शेमुषी क्टषाम् ॥१८॥
अजैर्यष्टव्यमित्यमेषैरित्युपदेशकम्।
तमवोचमहं भ्रातर्भ्रान्त्या किमिदमुच्यते ॥१९॥
त्रैवार्षिकाणि धान्यानि नहि जायन्त इत्यजाः।
व्याख्याता गुरुणास्माकं व्यस्मार्षीः केन हेतुना ॥२०॥
ततः पर्वतकोऽवादी दिदन्तातेन नोदितम्।
उदिताः किं त्वजा मेषा स्तथैवोक्ता निघण्टषु ॥२१॥
अवोच महमप्येवं शब्दानामर्थ कल्पना।
मुख्या गौणी च तत्रेह गौणीं गुरुरचीकथत् ॥२२॥
गुरुधर्मापदेष्टैव श्रुतिधर्मात्मकैव च।
द्वयमप्यन्यथा कुर्वन्मित्र मा पापमर्जय ॥२३॥
साक्षेपः पर्वतोऽजल्पदजान्मेषान् गुरुर्जगौ।
गुरूपदेशशब्दार्थौल्लङ्घनाधर्ममर्ज्जसि ॥२४॥

मिथ्याभिमानवाचोहि नश्यद्दुग्रडमया नृणाम्।
स्वपक्षस्थापने तेन जिह्वाच्छेदपणोस्तु नः ॥२५॥
प्रमाणमुभयोरत्र सहाध्यायी वसुर्नृपः।
प्रत्यश्रौषमहं तत्र न क्षोभः सत्यभाषिणाम् ॥२६॥
एवं पर्वतमुचेऽम्बां शृहकर्मरताप्यहम्।
अजास्त्रिवार्षिकं धान्यमित्यश्रौषं भवत्पितुः ॥२७॥
जिह्वाच्छेदं पणोकार्षीर्यदर्थीत्तदसांप्रतम्।
अविमृश्य विधातारो भवन्ति विपदां पदम् ॥२८॥
अवदत्पर्वतोप्येवं कृतं तावदिदं मया।
यथा तथाकृतस्यान्यकरणं नहि विद्यते ॥२९॥
साथ पर्वतकापाय पीडया हृदि शल्यिता।
वसुराजमुपेयाय पुत्रार्थे क्रियते न किम् ॥३०॥
दृष्टः क्षीरकदम्बोद्य यदम्ब त्वमसिच्चिता।
किं करोमि प्रयच्छामि किं वेत्यभिदधे वसुः ॥३१॥
सावादीद्दीयतां पुत्र भिक्ष्यामस्यां महीपते।
धनधान्यै किमन्यै र्मे विना पुत्रेण पुत्रक ॥३२॥
वसुरूचे ततो मेऽम्बपाल्यः पूज्यश्च पर्वतः।
गुरुवद्गुरुपुत्रेपि वर्त्तितव्यमितिश्रुतिः ॥३३॥
कस्याद्यपत्रमुत्त्रिप्तं कालेनाकालरोषिणा।
को जिघांसुर्भ्रातरं मे ब्रूहि मातः किमातुरा ॥३४॥

अजव्याख्यानवृत्तान्तं स्वपुत्रस्य पणञ्च तम् ।
त्वं प्रमाणं कृतश्चासीत्याख्यायार्पयतेस्म सा ॥३५॥
कुर्वाणो रक्षणं भ्रातुरजान्मेषानुदीरयः
प्राणैरप्युपकुर्वन्ति महान्तः किं पुनर्गिरा ॥३६॥
अवोचत वसुर्मातर्मिथ्यावच्मि वचः कथम् ।
प्राणात्ययेपि शंसन्ति नासत्यं सत्यभाषिणः ॥३७॥
अन्यदप्यभिधातव्यं नासत्यं पापभीरुणा ।
गुरुवागन्यथाकारि कूटसाक्षि च का कथा ॥३८॥
वहूक्तं गुरोः सूनुं यद्वा सत्यव्रताग्रहम् ।
तया सरोषमित्युक्तस्तद्वचोमंस्त पार्थिवः ॥३९॥
ततः प्रमुदिता क्षीरकदम्बगृहिणी ययौ ।
अयात पर्वतोहं च वसुराजस्य पर्षदि ॥४०॥
सभायाममिलन् सभ्या माध्यस्थ्य गुणशालिनः ।
वादिनोसदसद्वादक्षीरनीरसितच्छदाः ॥४१॥
आकाशस्फटिकशिला वेदिसिंहासनं वसुः ।
सभापतिरलंचक्रे नभस्तलमिवोडुपः ॥४२॥
ततः पर्वतकोहञ्च व्याख्यापक्षं निजं निजम् ।
आशंसेव नरेन्द्राय सत्यं ब्रूहीति भाषिणौ ॥४४॥
विप्रवृद्धैरथोचैः स विवादस्त्वयि तिष्ठते ।
प्रमाणमनयोः साक्षी त्वं रोदस्योरिवाऽर्यमा ॥४४॥

घटप्रभृति दिव्यानि वर्त्तन्तेऽहन्त सत्यतः ।
सत्याद्वर्षतिपर्य्यन्यः सत्यात्सिध्यन्ति देवताः ॥४५॥
त्वयैव सत्ये लोकोऽयं स्थाप्यते पृथिवीपते ।
त्वामिहार्थे ब्रूमहे किं ब्रूहि सत्यव्रतोचितम् ॥४६॥
वचो श्रुत्वेति तत्सत्यप्रसिद्धिन्तां निरस्य च ।
अजान्मेषान् गुरुर्व्याख्यदितिसख्यं वसुर्व्यधात् ॥४७॥
असत्यवचसा तस्य क्रुद्धा स्तत्रैव देवताः ।
दलयामासुराकाशस्फटिकासनवेदिकाम् ॥४८॥
वसुर्वसुमतीनाथ स्ततो वसुमतीतले ।
पपात सद्यो नरकपातं प्रस्तावयन्निव ॥४९॥
देवताभिरसत्योक्ति कुपिताभिर्निपातितः ।
जगाम नरकं घोरं नरनाथो वसुस्ततः ॥५०॥
वसोः सुताः पृथुवसुश्चित्रवसुश्च वासव ।
शक्रो विभावसुर्विश्वावसुः सूरश्च सप्तमः ॥५१॥
अष्टमश्च महाशूरो निषण्णाः पैतृके पदे ।
देवताभिरहन्यन्त तत्कालमपि कोपतः ॥५२॥
सुवसुर्नवमः सूनुर्नन्ष्ट्वानागपुरं ययौ ।
बृहद्ध्वजो वसोः सूनुर्दशमो मथुरां पुनः ॥५३॥
हसित्वा बज्जधापौरैस्तस्याः पुर्याश्च पर्वतः ।
निर्वासितः सञ्जगृहे महाकालासुरेण सः ॥५४॥

कोयं महाकाल इति पृष्टो दशमुखेन तु ।
उवाच नारदोवास्ति चारणायुगलं पुरम् ॥५५॥
राजा तत्रायोधनोऽभूद्दितिर्नाम्ना च तत् प्रिया ।
तयोश्च सुलसानाम दुहिता रूपशालिनी ॥५६॥
पित्रा स्वयम्बरे तस्या आहूताः समुपाययुः ।
सर्वेपि पार्थिवास्तेषु पार्थिवः सगरोऽधिकः ॥५७॥
सगरस्याज्ञया द्वास्थामन्दोदर्य्यभिधानतः ।
अयोधननृपावासे जगाम प्रतिवासरम् ॥५८॥
एकदा च गृहोद्यानकदलीसदनेऽविशद्दितिः ।
समं सुलसया मन्दोदर्य्यपि चाययौ ॥५९॥
लतान्तरलिनीवाथ श्रोतुकामा तयोर्वचः ।
तस्थौ मन्दोदरीप्रोचे दितिश्च सुलसामिति ॥६०॥
वत्से मे मनःशल्यमस्तितेऽस्मिन् स्वयम्बरे ।
त्वदधीनस्तदुद्धारस्तत्सम्यक् शृणु मूलतः ॥६१॥
ऋषभस्वामिनोऽभूता सुतौ वंशधरौ सुरौ ।
भरतो बाहुबलिश्च सूर्य्यसोमौ ययोः सुतौ ॥६२॥
सोमवंशे ममभ्राता तृणविन्दुरजायत ।
सूर्य्यवंशे ते पितासावयोधन महीपतिः ॥६३॥
अयोधनस्वसा सत्ययशानाम महीपतेः ।
तृणविन्दोरभूद्भार्य्या मधुपिङ्गस्तयोः सुतः ॥६४॥

तस्मै प्रदीयमानां त्वामहमिच्छामि सुन्दरि ।
प्रदित्सते त्वत्पिता वा स्वयम्वरवरायतु ॥६५॥
न जाने किं वृणोषि त्वं मनःशल्यमिदं मम ।
वरणीयस्त्वया राजमध्ये मद्गात्रजः सुतः ॥६६॥
सुलसापि हि तच्छ्रुत्वा तथैव प्रत्यपद्यत ।
मन्दोदर्य्यपि तच्छ्रुत्वा चख्यौ सगरभूपतेः ॥६७॥
सगरोप्यादिशद्विश्वभूतिं निजपुरोधसम् ।
सद्यः कविः सोपि चक्रे नृपलक्षणसंहिताम् ॥६८॥
तत्रो चे स तथा येन समस्तै राजलक्षणैः ।
सागरो जायते युक्तो हीनस्तु मधुपिङ्गलः ॥६९॥
तत्पुस्तकन्तु पेटायां स चिक्षेप पुराणवत् ।
राजाज्ञयान्यदाकृष्टं तेन तद्राजपर्षदि ॥७०॥
तत्रादौ सगरोऽवोच द्वाच्यमानेऽत्र पुस्तके ।
भवेल्लक्षणहीनो यो वध्यस्त्याज्यश्च सोखिलैः ॥७१॥
यथायथाऽवाचयत्तत् पुस्तकं स पुरोहितः ।
तथा तथा स जिह्राय मधुपिङ्गोऽपलक्षणः ॥७२॥
निर्ययौ मधुपिङ्गोऽथ सगरं सुलसावृणोत् ।
यज्ञे विवाहं सद्योपि सर्वे स्वं स्थानमभ्ययुः ॥७३॥
मधुपिङ्गोप्यपमानात् कृत्वा बालतपोमृतः ।
महाकालाभिधः षष्ठिसहस्रेशोऽसुरोऽभवत् ॥७४॥

अत्रासीद्वधेः सोथ सगरस्य विजृम्भितम्।
स्वयम्बरे सुलसाया निजं न्यक्कारकारणम् ॥७५॥
राजानं सगरं राज्ञोऽन्यांश्च हन्मीतिसोऽसुरः।
छिद्रान्वेषी शुक्तिमती नद्यां पर्वतमैक्षत ॥७६॥
विप्रवेश स्ततोभूत्वा गत्वा पर्व्वतमभ्यधात्।
शाण्डिल्योनाममित्रं त्वत्पितुरस्मि महामतेः ॥७७॥
धीमतो गौतमाख्यस्योपाध्यायस्य पुरः पुरा।
अहं चीरकदम्बश्च अपठीत्सहिताबुभौ ॥७८॥
नारदेन जनैश्च त्वां श्रुत्वा धर्षितमागमम्।
त्वत्पक्षं पूरयिष्यामि मन्त्रैर्विश्वं विमोहयन् ॥७९॥
इत्युक्त्वा पर्व्वतयुतः कुधर्मेणाखिलं जनम्।
असुरोमोहयामास दुर्गतौ पातनायसः ॥८०॥
व्याधिभूतादि दोषांश्च सर्व्वत्राजनयज्जने।
प्रपन्नपर्व्वतमतं निर्दोषञ्च चकार सः ॥८१॥
शाण्डिल्यस्याज्ञया सोपि रुक्शान्तिं पर्वतोव्यधात्।
उपकृत्योपकृत्य स्वमते चास्थापयज्जनम् ॥८२॥
सगरस्यापि नगरेऽन्तःपुरे च सपरिच्छदे।
विचक्रेसो सुरोरोगान् दारुणानतिभूयसः ॥८३॥
लोकप्रत्ययतो भेजे पर्व्वतं सगरोपि हि।
चकार शाण्डिल्ययुतोरुक्शान्ति सोऽपि सर्वतः ॥८४॥

सौत्रामण्यां विधानेन सुरापानं न दुष्यति ।
अगम्यागमनं कार्य्यं यज्ञे गोसवनामनि ॥८५॥
मातृमेधे बधोमातुः पितृमेधे वधः पितुः ।
अन्तर्वेदिविधातव्यो दोषस्तत्र न विद्यते ॥८६॥
आशुशुक्षणिमाधाय पृष्टे कूर्मस्य तर्प्पयेत् ।
हविषाज्जुहूकाख्याय स्वाहेत्युक्त्वा प्रपन्नतः ॥८७॥
यदा न प्राप्नुयात् कूर्मं तदा शुद्धद्विजन्मनः ।
खलतेः पिङ्गलाख्यस्यविक्रियस्य श्रुवो जले ॥८८॥
आस्यदघ्ने वतीर्णस्य मस्तके कूर्मसन्निभे ।
प्रज्वालाज्वलनदीप्तमाहुतिं निक्षिपेद्द्विजः ॥८९॥
सर्वं पुरुष एवेदं यद्भूतं यद्भविष्यति ।
ईशानो यो मृतत्वस्य यदन्नेनातिरोहति ॥९०॥
एवमेकत्र पुरुषे कं केनात्र विपद्यते ।
कुरुतात्तो यथाभीष्टं यज्ञे प्राणिनिपातनम् ॥९१॥
मांसस्य भक्षणं तेषां कर्त्तव्यं यज्ञकर्म्मणि ।
यायजूकेन पूतं हि देवोद्देश्येन तत्र तम् ॥९२॥
इत्यादि समुपादिश्य सगरे स्वमतस्थिते ।
अन्तर्वेदिकुरुक्षेत्रादिषु सोऽकारयन्मखान् ॥९३॥
सलब्धप्रसरोकार्षीद्राजसूयादिकानपि ।
असुरोप्यध्वरहतान् विमानस्थानदर्शयत् ॥९४॥

ततः सप्रत्ययो लोकः प्राणिहिंसात्मकान् मखान्।
निःशङ्कमकरोत्तस्य पर्वतस्य मतेस्थितः ॥९५॥
तत्प्रेक्ष्याहं तदा विद्याधरं नाम्ना दिवाकरम्।
अवोचं यत्त्वया यज्ञे हर्त्तव्याः पशवोऽखिलाः ॥९६॥
प्रतिपद्य स मे वाचं जह्रे यावत्पशून्मखे।
परमाधार्मिकस्तावत्तद्ज्ञासीत्सुराधमः ॥९७॥
ऋषभप्रतिमां तत्र तद्विद्यावातनाय सः।
आस्थापयन्महाकाल उपारंसीच्च खेचरः ॥९८॥
ततोऽहमपि तूष्णीकः क्षीणोपायोऽन्यतोऽभ्यगां।
यज्ञेषु भावयामास सगरं सोऽथ मायया ॥९९॥
सगरं सुलसायुक्तं स जुहावाध्वरानले।
कृतकृत्यो जगामाथ महाकालः स्वमाश्रमम् ॥४००॥
एवञ्च पर्वतात्पापपर्वताद्ध्वरा द्विजैः।
हिंसात्मका अक्रियन्त ते निषेध्यास्त्वयैवहि ॥१॥
तद्वाचमुररीकृत्य प्रणिपत्य च नारदम्।
मरुत्तान् क्षमयित्वा च विससर्ज दशाननः ॥२॥
मरुत्तो रावणं नत्वोवाच कोऽयं कृपानिधिः।
पापादमुष्माद्योह्यस्मांस्त्वया स्वामिन्नवारयत् ॥३॥
आचख्यौ रावणोऽप्यासीन्नाम्ना ब्रह्मरुचिर्द्विजः।
तापसस्य सतस्तस्य भार्य्या कूर्मीति गुर्व्वभूत् ॥४॥

तत्रेयुः साधवोऽन्येद्युस्तेष्वेकः साधुरब्रवीत् ।
भवभीत्या गृहवासस्त्यक्तोयत्साधुसाधु तत् ॥५॥
भूयः सदारसङ्गस्य विषयैर्लुप्त चेतसः ।
गृहवासाद्वनेवासः कथं नाम विशिष्यते ।
श्रुत्वा ब्रह्मरुचिस्तत्तुप्रपन्नजिनशासनः ।
तदैव प्राव्रजत्साच कूर्मी भूत्वा विकापरा ॥७॥
मिथ्यात्ववर्जिता तत्र सावसत्याश्रमे सुतम् ।
सुषुवे नारदं नाम रोदनादिविवर्जितम् ॥८॥
गतायास्तान्यतस्तस्या स्तं जहुर्जृम्भकामराः ।
पुत्रशोकादिन्दुमाला सविधे प्राव्रजत्तसा ॥९॥
ते मराः पालयामासुः शास्त्राण्यध्यापयंस्ततम् ।
आकाशगामिनीविद्यां ददुस्तस्मै क्रमेण च ॥१०॥
अणुव्रतधरः प्राप यौवनञ्च मनोहरम् ।
सशिखाधारणान्नित्यं न गृहस्थोन संयतः ॥११॥
कलहप्रेक्षणाकाङ्क्षी गीतनृत्यकुतूहली ।
सदा कन्दर्प्यकौ कुच्यमौखर्योऽत्यन्तवत्सलः ॥१२॥
वीराणां कामुकानाञ्च सन्धिविग्रहकारकः ।
छत्रिकाचष्टषीपाणिराद्भुढः पादुकासु च ॥१३॥
देवैः सम्बर्द्धितत्वाच्च देवर्षिः प्रथितो भुवि ।
प्रायेण ब्रह्मचारी च स्वेच्छाचार्य्येषु नारदः ॥१४॥

इत्युक्तवन्तं लङ्केश मत्त्वानुक्ततमात्मनः ।
मरुत्तः क्षमयामासापराधं मखसम्भवम् ॥१५॥
मरुत्तराजः स्वां कन्यां नामतः कनकप्रभाम् ।
तदा ददौ दशास्याय दशास्येऽथ उवाह ताम् ॥१६॥
प्रभञ्जन इवोजस्वी मरुत्तमखभञ्जनः ।
ततो जगाम मथुरां नगरीं गुरुविक्रमः ॥१७॥
उपतस्थे दशग्रीवं तन्नृपो हरिवाहनः ।
पुत्रेण मधुना सार्द्धमीशानेनेव शूलिना ॥१८॥
तं भक्त्योपस्थितं प्रीतो वार्त्तयन् दशकन्धरः ।
पप्रच्छैवं भवत्सूनोः कुतोऽदः शूलमायुधं ॥१९॥
पिताप्यूसंज्ञयादिष्टो मधुरं मधुरप्यथात् ।
इदं मे चमरेन्द्रेण प्राग्जन्मसुहृदार्पितम् ॥२०॥
अवोचच्चमरश्चैवं धातकीखण्डनामनि ।
द्वीप ऐरावतक्षेत्रे शतद्वारे महापुरे ॥२१॥
सुमित्रो राजपुत्रोऽभूत्प्रभवः कुलपुत्रकः ।
उभावभूतां ते मित्रे वसन्तमदनाविव ॥२२॥
गुरोरेकस्य पार्श्वे तौ बाल्ये जगृहतुः कलाः ।
सहचिक्रीडतुस्त्वाविप्रयुक्तावश्विनाविव ॥२३॥
उद्यौवनः सुमित्रोऽथ तत्राभून्नगरे नृपः ।
महर्षिर्विदधे तेन प्रभवोप्यात्मसन्निभः ॥२४॥

राजैकदातुरङ्गेण हृतः प्राप महाटवीं ।
पल्लीपतिसुतां तत्र वनमालामुपायत ॥२५॥
तामादाय समायातः स राजा स्वपुरे पुनः ।
प्रभवे न च साप्रैषि रूपयौवनशालिनी ॥२६॥
तद्दर्शनात् प्रभृत्येव स मनोभवपीडितः ।
दिनेदिने कृशोजज्ञे कृष्णपक्ष इवोडुपः ॥२७॥
असाध्यं मन्त्रतन्त्राणां तं ज्ञात्वातिकृशं नृपः ।
इत्यूचे बाधते किं ते सम्यगाख्याहि बान्धवः ॥२८॥
अभ्यधात्प्रभवोप्येवं वक्तुमेतन्न शक्यते ।
अलं कुलकलङ्काय यन्मनःस्थमपि प्रभोः ॥२९॥
निर्बन्धाद्भूभुजा पृष्टः स आख्यात्कुलपुत्रकः ।
वनमालानुरागो मे देहदौर्बल्यकारणम् ॥३०॥
राजाप्यूचे राज्यमपि त्वदर्थे संत्यजाम्यहम् ।
किं पुनर्महिलामात्रमियमद्यैव गृह्यताम् ॥३१॥
इत्युक्त्वा तं विसृज्याथ तस्यानुपदमेवताम् ।
स्वयं दूतीमिव प्रैषीत्तदोकसि निशामुखे ॥३२॥
इत्यूचे सापि राज्ञाहन्तुभ्यं दत्तास्मि सीदते ।
जीवातुरिवतच्छाधि पत्याज्ञा मे बलीयसी ॥३३॥
मम भर्त्ता त्वदर्थेहि प्राणानपि विमुञ्चति ।
किं पुनर्मादृशीं दासीमुदासीनः किमीक्षसे ॥३४॥

बभाषे प्रभवोप्येवं धिग्धिग्मां निरपत्रपम् ।
अहो सतु महासत्वो यस्येदृक् सौहृदं मयि ॥३५॥
प्राणा अपि हि दीयन्ते परस्मै न पुनः प्रिया ।
इति दुष्करमेतद्धि कृतं तेनाद्य मत्कृते ॥३६॥
पिशुनानामिवावाच्यं नायाच्यमवत नादृशाम् ।
कल्पद्रूणामिवादेयं नास्ति किंचित्तु तादृशाम् ॥३७॥
सर्व्वथा गच्छ मातासि नातःपरमिमं जनम् ।
पश्यभाषास्ववापापराशिं पत्याऽज्ञयापि हि ॥३८॥
तत्र चाछन्नमागत्य राजा सुश्राव तद्वचः ।
सुहृदः सत्वमालोक्य प्रकर्षेण जहर्ष च ॥ ३९ ॥
वनमालां नमस्कृत्य विसृज्यप्रभवोपि हि ।
स्वशिरःच्छेत्तुमारेभे खड्गमाकृष्य दारुणम् ॥४०॥
आविर्भूय सुमित्रोपि मित्र मा साहसं कृथाः ।
इति जल्पन्नपाहार्षीत्कृपाणं तस्य पाणितः ॥४१॥
विविक्षन्निव वसुधां प्रभवोऽधोमुखोह्रिया ।
कथञ्चन सुमित्रेण स्वस्थावस्थामनायि सः ॥४२॥
चक्रतुस्तौचिरं राज्यं प्राप्ता मैत्रीपरायणौ ।
सुमित्रस्तु परिव्रज्यमत्वेशानसुरोऽभवत् ॥४३॥
ततश्च श्रुत्वा मथुरेशहरिवाहननन्दनः ।
त्वं सुताऽऽर्मधुर्नाममाधवीकुक्षिभूरभूत् ॥४४॥

प्रभवोपि भवं भ्रान्त्वा चिरं विश्वावसोरभूत् ।
ज्योतिर्मत्यां श्रीकुमार इतिनाम्ना तनूरुहः ॥४५॥
सनिदानं तपः कृत्वा कालयोगाद्विपद्य च ।
अभवञ्चमरेन्द्रोहं पूर्वजन्मसुहृत्तव ॥४६॥
इत्याख्याय समेदत्तं शूलमेतदुपेत्य यत् ।
आयोजनद्विसहस्राः कृत्वा कार्य्यं निवर्त्तते ॥४७॥
इति श्रुत्वा दशग्रीवोभक्तिशक्तिविराजने ।
ददौ मधुकुमाराय कन्यां नाम्ना मनोरमाम् ॥४८॥
अथ लङ्काप्रयाणाद्वाद्दर्षे व्यष्टादशस्वगात् ।
स्वर्णाद्रौ पाण्डके चैत्यान्यर्च्चितुं दशकन्धरः ॥४९॥
सोर्कगाढस्तत्र चैत्यानि दशकण्ठोभ्यवन्दत् ।
ऋद्ध्या महत्या सङ्गीतपूजोत्सवपुरःसरम् ॥५०।
दुर्लङ्घनपुरेऽथप्राक् दिक्पालं नलकूबरम् ।
ग्रहीतुं कुम्भकर्णाद्या दशग्रीवाज्ञया ययुः ॥५१॥
आशालीविद्ययावह्निमयं वप्रमथव्यधात् ।
स्वपुरे योजनशतप्रमाणं नलकूबरः ॥५२॥
कृताशनमयान्येव चक्रे यन्त्राणि तत्र च ।
प्रदीपनमिव व्योम्नि कुर्वाणानि शिखोत्करैः ॥५३॥
तं च वप्रमवष्टभ्याऽवतस्थे नलकूबरः ।
भटैः परिवृतः कोपाज्ज्वलन् वह्निकुमारवत् ॥५४॥

तेऽथेत्य कुम्भकर्णाद्यास्तन्द्रष्टुमपि नाशकन् ।
ग्रीष्ममध्याह्नमार्त्तण्डमिव सुप्तोत्थिता नराः ॥५५॥
दुर्लङ्घ्यमेतद्दुर्लङ्घ्यपुरमित्यपसृत्य ते ।
भग्नोत्साहाः कथमपि दशास्याय व्यजिज्ञपन् ॥५६॥
स्वयं दशास्यस्तत्रागात्तं वप्रं प्रेक्ष्य तादृशम् ।
अपश्यं स्तद्ग्रहोपायं चिरं दध्यौ सबान्धवः ॥५७॥
अनुरक्ता दशास्यस्य नलकूवरपत्न्यथ ।
प्रैषीद्दूतीमुपरम्भां सा तमेत्यैवमब्रवीत् ॥५८॥
जयश्रीरिव मूर्त्तापि रम्भा त्वयि रिरंसते ।
सा त्वद्गुणैर्हृतमनास्तत्र मूर्त्तेव तिष्ठति ॥५९॥
इमाञ्च विद्यामाशालीमसिवप्रस्य रक्षिकाम् ।
करिष्यति तवायत्तामात्मानमिव मानद ॥६०॥
ग्रहीष्यसि तया चेदं पुरं सनलकूबरम् ।
सेत्स्यत्यत्र च ते चक्रं दैवं नाम्ना सुदर्शनम् ॥६१॥
सप्रहासं दशास्येन वीक्षितोऽथ विभीषणः ।
एवमस्त्विति भाषित्वा दूतिकां विससर्ज ताम् ॥६२॥
अथ क्रुद्धो दशग्रीव आबभाषे विभीषणम् ।
अरे कुलविरुद्धं किं प्रतिपन्नमिदं त्वया ॥६३॥
हृदयं जातु चिद्दत्तं परस्त्रीणां न कैरपि ।
अस्मत्कुलभवैर्मूढ रणे पृष्टं द्विषामिव ॥६४॥

नवं कुलकलंकोयं वचसापि कृतस्त्वया ।
रे विभीषण केयं ते मतिर्येनेद मब्रवीः ॥६५॥
विभीषणोप्युवाचैवं प्रसीदार्य्य महाभुज ।
नवागमात्रं कलङ्काय विशुद्धमनसां नृणाम् ॥६६॥
सा समायातुर्विद्यान्ते प्रयच्छतु स च द्विषत् ।
वध्योस्तु मामुजे धास्तां वाचोयुक्तयापरित्यजेः॥६७॥
यावद्विभीषणवचो सुमेने तद्दशाननः ।
तावदागादुपरम्भा तत्परीरम्भलम्पटा ॥६८॥
ददौ चाशालिकां विद्यां मत्यावप्रीकृतां पुरे ।
मोघेतराणि शस्त्राणि व्यन्तराधिष्टितानि च ॥६९॥
दशास्यः संजहाराग्निप्राकारं विद्यया तया ।
प्रविवेश च दुर्लङ्घ्यपुरं सवलवाहनः ॥७०॥
उत्तस्थे चाथ सन्नद्ध्य रणाय नलकूवरः ।
विभीषणेन चाग्राहि चर्मभस्त्रेव दन्तिना ॥७१॥
देवासुरैरप्यजय्यं शक्रसम्बन्धिदुर्द्धरम् ।
चक्रं सुदर्शनं नाम तत्र प्राप च रावणः ॥७२॥
प्रणताय ततः तस्मै दशास्य स्तत्पुरं ददौ ।
अर्थिनोर्थेषु न तथा दोष्मन्तो विजये यथा ॥७३॥
उपरम्भामपुरवाच दशास्यः स्वकुलोचितम् ।
भद्रे भजात्मभर्त्तारं कर्त्तारं विनयं मयि ॥७४॥

विद्यादानाद्गुरुस्थाने मम त्वमसि सम्प्रति ।
स्वस्मात्पदे पश्याम्यन्याश्चपि परिस्त्रियः ॥७५॥
पुत्री काम्यध्वजस्यासि सुन्दर्य्युदरसम्भवा ।
कुलद्वयविशुद्धायाः कलङ्कोमास्मभूत्तव ॥७६॥
तामित्युक्त्वार्प्पयामास नलकूबरभूभुजे ।
अदूषितां पितृगृहे उषित्वेव समागताम् ॥७७॥
नलकूबरराजेन कुम्भकर्णाग्रजोऽर्च्चितः ।
चचाल सह सेनाभिरथनूपुरपत्तनम् ॥७८॥
आयान्तं रावणं श्रुत्वा सहस्राक्षो महामतिः ।
सुतमिन्द्रं सुतस्नेहात् स्नेहपूर्व्वमभाषत ॥७९॥
भवता वत्स जातेन वंशोऽस्माकं महौजसां ।
अन्यवंशोन्नतिं हत्वा प्रापितः प्रोन्नतिं पराम् ॥८०॥
एकेन विक्रमेणैव त्वया ह्यीदमनुष्ठितम् ।
नीतीनामप्यवकाशो दातव्यः सम्प्रति त्वया ॥८१॥
एकान्तविक्रमः क्वापि विपदेऽपि प्रजायते ।
एकान्तविक्रमान्नाशं शरभाद्याः प्रयान्ति हि॥८२॥
बलीयसो वलिष्ठोपि प्रसूते हि वसुन्धरा ।
सर्व्वेभ्योऽप्यहमोजस्वीत्यहंकारं स्मामाकृथाः ॥८३॥
उत्थितोऽस्त्यधुना वीरः सर्व्ववीरत्वतस्करः ।
प्रतापेन सहस्रांशु सहस्रांशु नियन्त्रकः ॥८४॥

हेलोत्पाटितकैलाशो मरुत्तमखभञ्जनः ।
जम्बुद्वीपेशयक्षेन्द्रेणाप्यक्षोभितमानसः ॥८५॥
उपार्हन्निजदोर्वीणागीततोषितचेतसः ।
धरणेन्द्रादमोघाप्तशक्तिः शक्तित्रयोर्जितः ॥८६॥
भ्रातृभ्यां स्वानुरूपाभ्यां स्वभुजाभ्यामिवोत्कटः ।
रावणोनाम लङ्केशः सुकेशकुलभास्करः ॥८७॥
स यमं हेलयाभांक्षीदिक्पालं धनदञ्च ते ।
पत्तौ चक्रे वानरेन्द्रं सुग्रीवं वालिसोदरं ॥८८॥
दुर्लङ्घ्यवह्निप्राकारं दुर्लङ्घ्यपुरमस्य च ।
प्रविष्टस्यानुजोवध्वा जग्राह नलकूवरम् ॥८९॥
सत्व प्रेत्यापतन्नस्ति युगान्ताग्निरिवोद्धतः ।
प्रणिपातसुधावृष्ट्या शमनीयो घनुत्तये ॥९०॥
रूपिणीं च सुतामस्मै देयस्वरूपवतीमिमाम् ।
एवं ह्युत्तमसन्धानं सम्बन्धात्ते भविष्यति ॥९१॥
एवं पितृवचः श्रुत्वा कुप्यन्नेव सुवाच सः ।
कन्यका स्वा कथं कारमस्मै वध्याय दीयते ॥९२॥
किञ्च नाधुनिकं वैरममुना किं तु वंशजम् ।
तातं विजयसिंहं प्रागेतद्गृह्यहतं स्मर ॥९३॥
एतत्पितामहस्यापि मालिनो यन्मया कृतम् ।
तदस्यापि करिष्यामि समायात्वेषकोह्ययम् ॥९४॥

स्नेहत: कातरो मा भू: सहजं धैर्य्यमाश्रय ।
स्वसूनोः सर्व्वदा दृष्टं किं न वेत्सि पराक्रमम् ॥ ९५ ॥
तस्यैवं वदतोऽभ्येत्य नगरं रथनूपुरम् ।
चमूभिर्वेष्टयामास दुर्द्धरो दशकन्धरः ॥ ९६ ॥
पूर्व्वमेव दशास्येन प्रहितो माहितौजसा ।
अथ दूतोऽभ्युपेत्येन्द्रमित्युवाच ससौष्ठवः ॥ ९७ ॥
ये केचिदिह राजानो विद्यादोर्वीर्य्यदर्पिणः ।
तैरुपेत्योपायनाद्यैः पूजितो दशकन्धरः ॥ ९८ ॥
दशकण्ठस्य विस्मृत्या भवतश्चार्जवादयम् ।
इयान् कालो ययौ तस्मिन् भक्तिकालस्तवाधुना ॥ ९९
भक्तिं दर्शय तत्तस्मिन् शक्तिञ्चादर्शयाधुना ।
भक्तिशक्तिविहीनस्त्वं देवमेव विनंक्ष्यसि ॥ १०० ॥
इन्द्रोपि निजगादेवं वराकैः पूजितो नृपैः ।
रावणस्तदयं मत्तः पूजां मत्तोपि वाञ्छति ॥ १ ॥
यथा तथा गतः कालो रावणस्य सुखाय सः ।
कालरूपस्त्वयं कालस्तस्येदानीमुपस्थितः ॥ २ ॥
गत्वा स्वस्वामिनो भक्तिं शक्तिं वा मयि दर्शय ।
स भक्तिशक्तिहीनस्त्वं देवमेव विनंक्ष्यति ॥ ३ ॥
दूतेनागत्य विज्ञप्तो रावणः कोपदारुणः ।
समनह्यन्महोत्साहः समं सकलसैनिकैः ॥ ४ ॥

इतमिन्द्रोऽपि सन्नह्य निर्ययौ रथनूपुरात्।
धीरा हि न सहन्तेऽन्यवीराहंकारडम्बरम् ॥५॥
सामन्ताः सहसामन्तैः सैनिकाः सैनिकैः पुनः।
सेनानीभिश्च सेनान्योद्वयोर्युयुधिरे तयोः ॥६॥
तयोर्बलानामन्योऽन्यं सङ्कटः शस्त्रवर्षिणाम्।
सम्वर्त्तपुष्करावर्त्तवारिदानामिवाभवत् ॥७॥
वराकैः सैनिकैरेभिः किं हतैर्मशकैरिव।
इति ब्रुवाणोभुवनालङ्कारकरिपुङ्गवम् ॥८॥
स्वयमारुह्य युद्धायाधिजग्मे कृतशरासनः।
अढौकतैवरावणस्ते नेन्द्रेण सह रावणः ॥६॥
नागपाशमिवान्योन्यं सुखयोः करवेष्टनैः।
वितत्वानौ समिलतुः करिणौ रावणेन्द्रयोः ॥१०॥
द्वावपीभौमहाप्राणौ दन्तैर्दन्तान् प्रजघ्नतुः।
उत्थापयन्तौ स्फुलिङ्गानरण्युन्मथनादिव ॥११॥
मिथोघातैर्विषाणेभ्यः सौवर्णवलयावलिः।
पपातोर्व्यां विरहिणी बाहुभ्य इव तत्क्षणम् ॥१२॥
तद्दन्तघातकुण्डेभ्यः शरीरेभ्यो निरन्तरम्।
गण्डेभ्यामदधारावद्रक्तधाराः प्रसुस्रुवुः ॥१३॥
क्षणाच्छल्यैः क्षणाद्दानैः क्षणादपि च मुद्गरैः।
गजाविवाद्वितीयौ तौ रावणेन्द्रौ प्रजघ्नतुः ॥१४॥

महाबलौ पिपिषतुरस्त्रैरस्त्राणि तौ मिथः ।
नैकोप्यहीयते कस्मादब्धी पूर्वापराविव ॥१५॥
वाध्यबाधकताभाग्भिद्गौगुत्सर्गापवादवत् ।
मन्त्रास्त्रैरप्ययुध्येतां तौरणक्रतुदीक्षितौ ॥१६॥
गाढं मिलितयोरेकहन्तस्थ फलयोरिव ।
ऐरावणभुवनालङ्कारयोः करिणो रथ ॥१७॥
बलन्नो रावणः स्वेभादुत्पत्यैरावणं ययौ ।
हत्वा च तन्महामात्रं बबन्धेन्द्रं करीन्द्रवत् ॥१८॥
स हस्ती परितोधस्तादृक्षोवीरैरवेष्ट्यत ।
हर्षादुत्तालतुमुलैर्मधुमण्डइवालिभिः ॥१९॥
रावणेन धृते शक्रे तत्सैन्यमपि सर्व्वतः ।
विदुद्राव जिते नाथे जिता एव पदातयः ॥२०॥
स्नहैवैरावणे नेन्द्रं रावणः शिविरे निजे ।
निनाय नायकोऽभवत्स्वयं श्रेणिद्वयेप्यथ ॥२१॥
ततो निवृत्तत्र लङ्कायां जगाम दशकन्धरः ।
कारायां चाक्षिपच्छक्रं कीरवत्काष्ठपञ्जरे ॥२२॥
सहस्रारः सदिक्पालो लङ्कायामेत्य रावणम् ।
नमस्कृत्येत्यभाषिष्ट पत्तिवद्रचिताञ्जलिः ॥२३॥
कैलाशसुहृद्धार्षोद्यो लीलया ग्रावखण्डवत् ।
दोष्मता तेन भवता विजिता न त्रपामहे ॥२४॥

तादृशे त्वयि याञ्चाहि न त्रपायै मनागपि ।
तद्याचेहं मुञ्च शक्रं पुत्रभिक्षां नियच्छमे ॥२५॥
उवाच रावणोप्येवं शक्रं मुञ्चामि यद्यसौ ।
स दिक्पालपरीवारः कर्म कुर्य्यात्सदेदृशम् ॥२६॥
परितोपि पुरीं लङ्कां करोत्वेष क्षणे क्षणे ।
तृणकाष्ठादिरहितां वासागारमहीमिव ॥२७॥
प्रातः प्रातर्दिव्यगन्धैरम्बुवाह इवाम्बुभिः ।
चैलक्नोपं पुरीमेतामभितोप्यभिषिञ्चतु ॥२८॥
मालाकार इवोच्चित्यग्रन्थित्वा च सदा स्वयम् ।
पुष्पाणि पूरयत्वेष देवतावसरादिषु ॥२९॥
एवम्बिधानि कर्माणि कुर्वन्नेष सुतस्तव ।
पुनर्गृह्णातु राज्यं स्वं मत्प्रसादाच्च नन्दतु ॥३०॥
एवं करिष्यतीत्युक्ते सहस्राक्षेण रावणः ।
मुमोच शक्रं कारायाः सत्कृत्य निजबन्धुवत् ॥३१॥
रथनूपुरमेत्येन्द्र स्तस्थावुद्विग्न उच्चकैः ।
तेजस्विनां हि निस्तेजो मृत्युतोप्यति दुस्सहम् ॥३२॥
निर्वाणसङ्गमोनाम ज्ञानी तत्रान्यदा मुनिम् ।
समवासरदिन्द्रोपि तं वन्दितु मुपाययौ ॥३३॥
भगवन् कर्म्मणा केन रावणादि समासदम् ।
न्यक्कारमितिशक्रेण पृष्ठः स मुनिरब्रवीत् ॥३४॥

श्रीमत्यरिञ्जयपुरे पुराविद्याधराग्रहणी।
नाम्ना ह्वालनसिंहोऽभूद्वेगवत्यस्य तु प्रिया ॥३५॥
अहल्यानाम दुहिता रूपवत्यभवद्ययोः।
तस्याः स्वयम्बरेऽभ्येयुः सर्व्वे विद्याधरेश्वराः ॥३६॥
आनन्दमाली तत्रागाच्चन्द्रावर्त्तपुरेश्वरः।
सूर्य्यावर्त्तपुरेशस्त्वमागान्नाम्ना तडित्प्रभः ॥३७॥
सहायान्तमपित्यक्त्वा त्वामहल्या निजेच्छया।
आनन्दमालिनं वव्रे तवाभूच्च पराभवः ॥३८॥
आनन्दमालिनोऽर्ष्यालुस्त्वमभूस्तत्प्रभृत्यपि।
मयि सत्यप्यसावेतामहल्यामूढवानिति ॥३९॥
आनन्दमाली निर्व्वेदादन्यदा व्रतमग्रहीत्।
तप्यमानस्तपस्तीव्रं व्यहार्षीच्च सहर्षिभिः ॥४०॥
विहरन् स रथावर्त्तं जगाम गिरिमेकदा।
त्वया च दृष्टोऽस्माभिरिवाहल्या स्वयम्बरः ॥४१॥
ध्यानारूढस्त्वया या बद्धस्ताडितोऽनेकशस्त्वसः।
मनागपि न च ध्यानादचालीदचलाचलः ॥४२॥
कल्याणगुणधारस्तु तद्भ्राता श्रमणाग्रणीः।
प्रेक्ष्य त्वय्यमुचत्तेजोलेश्यां शंपामिवद्रुमे ॥४३॥
सत्यश्रिया च त्वत्पत्न्या शमितो भक्तिजल्पितैः।
तेजोलेश्यां स संजह्रे न दग्धोऽसि तदैवतत् ॥४४॥

मुनिन्यक्कारजात्पापात् त्वं भ्रान्त्वा कतिचिद्भवान् ।
शुभं कर्म्मविधायेन्द्र सहस्रारसुतोऽभवः ॥४५॥
महामुनितिरस्कार प्रहारोद्भवकर्म्मणः ।
उपस्थितं फलमिदं रावणाद्यः पराभवः ॥४६॥
कर्म्माभ्युदयं च सर्व्वस्य फलत्येव चिरादपि ।
आपुरन्दरमाकीटं संसारस्थितिरीदृशी ॥४७॥
तच्छ्रुत्वा दत्तवीर्य्यस्य एवमादि स्वजन्मनः ।
इन्द्रः पर्य्यङ्कतदम्प्राग्रतपाश्च ययौ शिवम् ॥४८॥
वरावणोऽपि ययौ स्वर्गानुग शैलेऽपरेऽहनि ।
अनन्तवीर्य्यं नामर्षिम्बन्दितुं जातकेवलम् ॥४९॥
तं वन्दित्वा यथास्थानं निषण्णो दशकन्धरः ।
शुश्राव चश्रोत्रसुधासारणीं धर्म्मदेशनाम् ॥५०॥
देशनान्ते दशास्येन कुतः स्यान् मरणं मम ।
इति पृष्टोमहर्षिः स भगवानेवमभ्यधात् ॥५१॥
पारदारकदोषेण वासुदेवाद्भविष्यति ।
भविष्यतिविपत्ति स्ते प्रतिविष्णो र्दशानन ॥५२॥
परस्त्रियमनिच्छन्तीं रमयिष्यामि नह्यऽहम् ।
जग्राहाभिग्रहमिमं स तस्मैं मुनेः पुरः ॥५३॥
मुनिवरमथ नत्वा ज्ञानरत्नाम्बुधिं तम् ।
दशवदन इयाय स्वां पुरीं पुष्पकस्थः ॥५४॥

निखिलनगरनारीनेत्रनीलोत्पलानाम् ।
प्रमदविभवदानाद्यामिनीजानिकल्पः ॥ ५५ ॥

इत्याचार्य्यश्रीहेमचन्द्रविरचिते त्रिषष्ठिशलाका पुरुषचरिते महाकाव्ये सप्तमे पर्व्वणि रावण- दिग्विजयो नाम द्वितीयः सर्गः ॥ २ ॥

---

## अथ तृतीयः सर्गः ।

अथेहवैताढ्यगिरावादित्यपुरपत्तने ।
प्रह्लादोनाम राजाभूत्केतुमत्यस्य तु प्रिया ॥ १ ॥
तयोर्बभूव तनयोनामतः पवनंजयः ।
जयीपवनवच्चाम्ना गगने गमने न च ॥ २ ॥
इतश्च भरतेऽत्रैवोपार्श्ववन्दृति पर्व्वते ।
विद्याधरेन्द्रो महेन्द्रोमहेन्द्रे नगरेऽभवत् ॥ ३ ॥
पत्न्या हृदयसुन्दर्य्यांतस्य चाञ्जनसुन्दरी ।
अरिन्दमादिपुत्राणां शतस्योपर्यभूत्सुता ॥ ४ ॥
उद्यौवनाया स्तस्याश्च वरं चिन्तयतः पितुः ।
शशंसुर्मन्त्रिणोविद्याधरयूनः सहस्रशः ॥ ५ ॥
महेन्द्रस्याज्ञयामात्यास्तद्रूपाणि पृथक् पृथक् ।
यथावदालेख्यपट्टेष्वानाय्य समदर्शयत् ॥ ६ ॥
तत्र विद्याधराधीश हरिनाभाङ्गजन्मनः ।
रूपविद्युत्प्रभाख्यस्य सुमनः कुक्षिजन्मनः ॥ ७ ॥

प्रल्हादसूनोः पवनं जयस्य च मनोरमम् ।
चित्रस्थं सचिवोन्येद्युर्महेन्द्रस्याभ्यढैा कयन् ॥८॥ युग्म॥
रूपवन्तौ कुलीनौ च द्वावप्येतौ तदेतयोः ।
कन्यायाः कोवर इति राज्ञोऽक्तः सचिवोऽब्रवीत् ॥९॥
एषोष्टादशवर्षायु र्मोक्षं यिद्युत्प्रभोगमी ।
इति नैमित्तिकं स्वामिन् व्यक्तमाख्यातपूर्व्विणः ॥१०॥
प्रल्हादतनयस्त्वेष चिरायुः पवनंजयः ।
योग्योवरस्तदेतस्मै प्रयच्छाञ्जनसुन्दरीम् ॥११॥
अत्रान्तरे तु यात्रायै द्वीपं नन्दीश्वरं ययुः ।
विद्याधरेन्द्राः सर्वेपि सर्व्वं ह्यसिपरिच्छदाः ॥१२॥
प्रह्लादस्तनयां प्रेक्ष्य महेन्द्रमिदमभ्यधात् ॥
दीयतां मत्सुतायैषा स्वसुताञ्जनसुन्दरी ॥१३॥
महेन्द्रः प्रतिपेदे च तदग्रेऽपि हृदि च स्थितम् ।
निमित्तमात्रमेवासीत् प्रह्लादप्रार्थनातु सा ॥१४॥
इतस्तृतीये दिवसे मानसाख्ये सरोवरे ।
कार्य्योविवाह इत्युक्ता तौ यथास्थानमीयतुः ॥१५॥
ततो महेन्द्रप्रह्लादौ साह्लादौ स्वजनैः समम् ।
जग्मतुर्मानससरस्यावासं चक्रतुश्चतौ ॥१६॥
मित्रं प्रहसितनामो वाचेति पवनं जयः ।
दृष्टास्ति किं त्वया ब्रूहि कोदृश्यंजनसुन्दरी ॥१७॥

हसित्वैष प्रहसितोप्येवमूचे मयेक्षिता ।
सा हि रम्भादिकाभ्योपि सुन्दर्य्यंजनसुन्दरी ॥१८॥
तस्या निरूपमं रूपं यादृशं दृश्यते दृशा ।
तादृशं वचसा वक्तुं वाग्मिनापि न शक्यते ॥१९॥
पवनंजय इत्यूचेदूरेह्युद्वाहवासरः ।
सादृग्गोचरमद्यैव कथं नेया मया सखे ॥२०॥
वल्लभो त्वं हितानां हि घटिकापि दिनायते ।
मासायते दिनमपि किं पुनस्तद्दिनत्रयम् ॥२१॥
ततः प्रहसितोप्येवं व्याजहार स्थिरोभव ।
निशि तत्रैत्य तां कान्तां द्रक्ष्यस्यानुपलक्षितः ॥२२॥
उत्पत्य सहप्रहसितो निरगात्पवनंजयः ।
आस्थितेञ्जनसुन्दर्य्या प्रासादासप्तभूमिके ॥२३॥
राजस्पश इव छन्नीभूयसोऽञ्जनसुन्दरीम् ।
सव्यगीक्षितु मारेभे समित्रः पवनंजयः ॥२४॥
धन्यासि या हि प्रापस्त्वं तं पतिं पवनंजयम् ।
सखीवसन्ततिलकेत्यूवा चाञ्जनसुन्दरीम् ॥२५॥
हले मुक्त्वा वरं विद्युत्प्रभं विद्युत्प्रभं वरम् ।
विरहं श्लाघ्यत इति मिश्राकस्त्ववदत्सखीम् ॥२६॥
प्रथमा प्रत्युवाचैवं मुग्धे वेत्सि न किञ्चन ।
विद्युत्प्रभोहि स्वल्पायुः स्वामिन्या युज्यते कथम् ॥२७॥

द्वितीयापीत्यभाषिष्ट वयस्ये मन्दधीरसि ।
स्तोकमप्यमृतं श्रेयो भारोपि न विषस्य तु ॥२८॥
इत्यालापं तयोः श्रुत्वा चिन्तयत्पवनंजयः ।
अस्याः प्रियमिदं नूनं तेन नैषा निषेधति ॥२९॥
इति क्रुद्धोऽसिमाकृष्याविरासीत्पवनञ्जयः ।
निशाचर इवाकस्मादन्धकारात्समुत्थितः ॥३०॥
विद्युत्प्रभोहृदि ययो द्वयोरपि तयोः शिरः ।
छिनद्मीतिवदन् रोषाच्चचाल पवनञ्जयः ॥३१॥
बाहुदण्डे धारयंस्तमिति प्रहसितोवदत् ।
सापराधाप्यवध्यैव स्त्री गौरिव नवेत्सि किम् ॥३२॥
किं पुनर्निरपराधैव इयमञ्जनसुन्दरी ।
तवापवादिनी नैषा निषेधति पुनर्हिताम् ॥३३॥
इति प्रहसितेनोच्चै र्निषिद्धः पवनञ्जयः ।
उत्पत्यागात्स्वमावासञ्जाग्रत्तस्थौ च दुःखितः ॥३४॥
प्रातस्तोचे प्रहसितं सखे किमनयोढया ।
भृत्योपि हि विरक्तः स्यादापदे किं पुनः प्रिया ॥३५॥
तदेहि यावः स्वपुरीमूरीकृत्य परं रयम् ।
किं स्वादुनापि भोज्येन रोचते न यदात्मने ॥३६॥
इत्युदीर्योच्चकैर्य्यावच्चचाल पवनञ्जयः ।
धृत्वा तावत्प्रहसित स्तं साम्नैवमबोधयत् ॥३७॥

न युक्तं महतां यत्स्वप्रतिपन्नस्य लङ्घनम् ।
अनुलङ्घ्यैर्गुरुभिः प्रतिपन्नस्य का कथा ॥३८॥
विक्रीणते वा मूल्येन ददते वा प्रसादतः ।
गुरवोऽहीत्यपि सतां प्रमाणं नापराणितिः ॥३९॥
किञ्चेहाञ्जनसुन्दर्य्यामस्ति दोषलवोपि न ।
दूष्यते दैवदोषेण सुहृदो हृदयं पुनः ॥४०॥
महात्मनौ च पितरौ स्वस्य तस्याश्च विश्रुतौ ।
किं न लज्जयसि भ्रातर्गच्छन् स्वच्छन्दचेष्टितः ॥४१॥
उक्तः प्रहसितेनैवं विमृश्य पवनञ्जयः ।
तथैव कथमप्यस्थात् सशल्य इति चेतसि ॥४२॥
पवनाञ्जनसुन्दर्य्यो निर्णीतेव दिने भवत् ।
पिष्टनेत्रोत्पलश्रेणी पाणिग्रहमहोत्सवः ॥४३॥
तद्वधूवरमादाय सदायादः प्रमोदभाक् ।
महेन्द्रेणाऽर्च्चितः स्नेहात् प्रल्हादः स्वां पुरीं ययौ॥४४
प्रल्हादोऽञ्जनसुन्दर्य्याः प्रासादं सप्तभूमिकम् ।
त्वार्पयामास वासाय विमानमिव भूस्थितम् ॥४५॥
तां न संभाषयामास वाचापि पवनञ्जयः ।
मानिनोह्यवलेपं न विस्मरन्ति यतस्ततः ॥४६॥
विना शशाङ्कं श्यामेव सा विना पवनञ्जयम् ।
बाष्पान्धकारवदना तस्थावऽस्वास्थ्यभाजनम् ॥४७॥

पार्श्वद्वितयमाक्रान्तया: पर्य्यङ्कस्य मुहुर्मुहुः।
तस्याश्च सम्वत्सरवद्राघीयस्याभवन्निशा ॥४८॥
अनन्यमानसाजानुमध्यन्यस्तमुखाम्बुजा।
भर्तुरालेखनैरेव व्यतीयाय दिनानि सा ॥४९॥
मुहुरालाप्यमानापि सखीभि आदरपूर्वकम्।
परपुष्टेव हेमन्ते न सा तूष्णीकतां जहौ ॥५०॥
एवं च काले व्रजति प्रह्लादनृपमन्यदा।
दूतोराक्षसराजस्य समुपेत्यैवमब्रवीत् ॥५१॥
समं राक्षसनाथेन यादोनाथः सदुर्मतिः।
वैरायतेद्य नितरां प्रणिपातममानयन् ॥५२॥
याचितः स नमस्कारमहङ्कारमहागिरिः।
दोर्दण्डौ चक्षुषा पश्यन्निदं वदति कहरः ॥५३॥
अरे को रावणो नाम तेन किं ननु सिद्ध्यति।
नाहमिन्द्रकुवेरो वा न चास्मि नलकूवरः ॥५४॥
सहस्ररश्मिर्चाप्यस्मि न मरुत्तो न वायमः।
न च कैलासशैलोस्मि किं त्वस्मि वरुणो न तु ॥५५॥
देवताधिष्ठितैरस्त्रैर्यदि दर्प्पोस्य दुर्मतेः।
तदायातु हरिष्यामि तद्दर्प्पं चिरसञ्चितम् ॥५६॥
इत्युक्तया रावणः क्रुद्धः समरायाभ्यषेणयत्।
अरौत्सीत्तत्पुरं चाब्धिवेलेव तटपर्वतम ॥५७॥

पुरान्निःसृत्य वरुणोरणायाऽरुणलोचनः ।
राजीव पुण्डरीकाद्यैर्द्दृतः पुत्रैरयुध्यत ॥५८॥
तस्मिन्महति संग्रामे वीरैर्वरुणसूनुभिः ।
योधयित्वा च बद्धा च निन्याते खरदूषणौ ॥५९॥
अभज्यत ततः सैन्यं राक्षसानामशेषतः ।
कृतार्थमानीवरुणोऽप्यविशन्नगरीं निजाम् ॥६०॥
विद्याधरेन्द्रानाह्वातुं प्राहिणोद्रावणोपि हि ।
दूतान्प्रत्येकमप्यद्य भवते प्रेषितस्त्वहम् ॥६१॥
प्रह्लादोथ दशास्याय साहायककृते स्वयम् ।
यावच्चचाल तावत्तमुवाच पवनञ्जयः ॥६२॥
इहैव तिष्ठ तात त्वं दशग्रीवमनोरथम् ।
पूरयिष्याम्यहमपि तवास्मि तनयोननु ॥६३॥
इत्युदीर्य्य स निर्वन्धं पितरं चानुमान्य सः ।
लोकं चाशेषमाभाष्य चचाल पवनञ्जयः ॥६४॥
श्रुत्वाञ्जना जनमुखात्पत्युर्यात्रामथोत्सुका ।
देवीव व्योमशिखरात्प्रासादादवरुह्य च ॥६५॥
तमीक्षितुमवष्टभ्य स्तम्भं पाञ्चालिकेव सा ।
निर्न्निमेषेक्षणा तस्थावस्थास्थगमिताशया ॥६६॥
द्वारस्तम्भनिषण्णाङ्गीं प्रतिपच्चन्द्रवत्कृशाम् ।
लुलितालकसंच्छन्नललाटां निर्व्विलेपनाम् ॥६७॥

नितम्बन्यस्तविश्रस्तश्लथन्नीविभुजालताम् ।
ताम्बूलरागरहितधूसराधरपल्लवाम् ॥ ६८॥
वाष्पाम्बुक्षालितमुखीमुन्मुखीं पुरतः स्थिताम् ।
अञ्जनां व्यञ्जनद्दशं ददर्श पवनोव्रजन्॥६९॥ त्रिभिर्वि
तां निध्यायन्निदं दध्यौ सद्यः प्रल्हादनन्दनः ।
अहो निर्ह्रीत्वमेतस्या निर्भीत्वमपि दुर्हृदयः ॥७०॥
अथवा ज्ञातमेतस्या दौर्मनस्यं पुरापि हि ।
उदूढापि मया पित्रोराज्ञालङ्घनभीरुणा ॥७१॥
पतित्वा पादयो स्तस्य साप्यूचे रचिताञ्जलिः ।
त्वया सम्भाषितः सर्व्वोऽप्यहं तु न मनागपि ॥७२॥
विज्ञप्यसे तथापि त्वं विस्मार्यो नह्यहं त्वया ।
पुनरागमनेनाशु पन्थानः संतु ते शिवाः ॥७३॥
इति ब्रुवाणां तां दीनमहीनचरितामपि ।
ययाववगणय्यैव जयाय पवनञ्जयः ॥७४॥
पत्यवज्ञा वियोगार्त्ता गत्वा निर्वेश्मभूतले ।
वारिभिन्नलतासिन्धुतटीव निपपात सा ॥७५॥
पवमानवदुत्पत्य तदा प्रल्हादनन्दनः ।
जगाम मानससरस्युवास च निशामुखे ॥७६॥
विकृत्य तत्र प्रासादमध्यास्त पवनञ्जयः ।
विद्याधराणां विद्यैव सर्व्वसिद्धिषु कामधुक् ॥७७॥

तत्र पर्य्यङ्कमारूढ़ः सज्ज्योपरिसरावणः ।
आर्त्तां प्रियवियोगेन चक्रवाकीं ददर्श सः ॥ ७८॥
पूर्व्वापात्तामभुञ्जानां मृणाललतिकामपि ।
तप्यमानां हिमेनापि क्वथितेनेव वारिणा ॥ ७९॥
दूयमानां ज्योत्स्नयापि वह्नेर्विक्छटयेव ताम् ।
क्रन्दन्तीं करुणं प्रेत्वा स एवं पर्य्यचिन्तयत् ॥ ८०॥
सकलं वासरं पत्या रमते चक्रवाकिका ।
न सोढुमीशते नक्तमपि तद्विरहं पुनः ॥ ८१॥
उद्वाहितापि यात्यक्ता भाविता या न जातुचित् ।
आगच्छताप्यवज्ञाता परनारीव या मया ॥ ८२॥
आक्रान्ता दुःखभारेण पर्व्वतेनेव मूलतः ।
अदृष्टमत्सङ्गसुखा सा कथं हा भविष्यति ॥ ८३॥
धिक् धिक् ममाविवेकेन म्रियते सा तपस्विनी ।
तद्वत्याः पातकेनाहं क्वगमिष्यामि दुर्मुखः ॥ ८४॥
इति चिन्तितमात्मीयमाख्यत्प्रहसिताय सः ।
स्वदुःखाख्यानपात्रं हि नापरः सुहृदं विना ॥ ८५॥
प्रोचे प्रहसितोप्येवं साध्वज्ञासीश्चिरादपि ।
नूनं विपद्यते साद्य सारसीव वियोगतः ॥ ८६॥
आश्वासयितु मद्यापि सखे सा तव युज्यते ।
प्रियोक्त्या तामनुज्ञाप्य स्वार्थाय पुनरापतेः ॥ ८७॥

हृदेवसुहृदा तेन भावसम्वादिने रितः ।
यथावञ्जनसुन्दर्य्या वेश्मन्यत्पत्य मारुतः ॥८८॥
किञ्चित्तिरोहितस्तस्थौ द्वार्य्येव पवनञ्जयः ।
अग्रे भूत्वा प्रहसितः प्राविशत्तु तदौकसि ॥८९॥
वेल्लतीमधिपर्य्यङ्कं तोयेऽल्पे शफरीमिव ।
पीड्यमानां ज्योत्स्नयापि हिमेनेव सरोजिनीम् ॥९०॥
अन्तर्हृदयसन्तापप्रस्फुटद्धारमौक्तिकाम् ।
उन्मुक्तदीर्घनिश्वासतरलालकमालिकाम् ॥९१॥
अधोनिषस्सनिःसस्त दोर्भग्नमणिकङ्कणाम् ।
वसन्ततिलकासख्याश्वास्यमानां मुहुर्मुहुः ॥९२॥
शून्यदत्तदृशं शून्यचित्तां काष्ठमयीमिव ।
ईक्षां चक्रे प्रहसितस्तत्र चाञ्जनसुन्दरीं ॥९३॥चतुर्वि
अकस्माद्यन्तर इव को नामेह समाययौ ।
इति भीतापि साधैर्य्यमवलम्ब्येदमब्रवीत् ॥९४॥
अहो कस्त्वमिहायासीः परपुंसाऽथवा त्वया ।
अलं ज्ञातेननेहस्याः परनारी निकेतने ॥९५॥
वसन्ततिलके दोष्णा विधृत्यैनं बहिःक्षिप ।
क्षपाकरविशुद्धास्मि नैनं द्रष्टुमपि क्षमा ॥९६॥
पवनञ्जयसुद्भित्वासुंष्मिन्ममनिकेतने ।
न प्रवेशाधिकारोस्ति कस्यापि किमुदीक्षसे ॥९७॥

नत्वा प्रहसितोऽवादीद्दिष्ट्या स्वामिनि वर्द्धसे ।
चिरादायातसोत्कण्ठपवनञ्जयसङ्गमात् ॥९८॥
तस्य मित्रप्रहसितो मन्मथस्येव माधवः ।
अग्रेसरोऽहमायातोऽन्वयातं विद्धि च प्रियम् ॥९९॥
अञ्जनापि जगादैवं हसितां विधिनैव माम् ।
माहसीस्त्वं प्रहसित क्षणोयं न हि नर्म्मणः ॥१००॥
अथवा नैष दोषस्ते दोषोमत्पूर्वकर्मणाम् ।
कुलीनस्तादृशो भर्त्ता त्यजेन्मां कथमन्यथा ॥१॥
पाणिग्रहात्प्रभृत्येव मुक्तायाः स्वामिना मम ।
द्वाविंशतिसमाजग्मुर्जीवाम्यद्यापिपापिनी ॥२॥
अथ संक्रान्तदुःखप्राग्भारपवनञ्जयः ।
अन्तः प्रविश्य व्याहार्षीद्वाष्पगद्गदवागिदम् ॥३॥
निर्दोषां दोषमारोप्य त्वदुद्वाहात्प्रभृत्यपि ।
अवज्ञाताऽसिविज्ञेन त्वं मया विज्ञमानिना ॥४॥
मद्दोषादीदृशीमागाद्दुस्सहां दुर्दशां प्रिये ।
मृत्युं प्राप्तापि मद्भाग्यैः स्तोकान्मुक्तासि मृत्युना ॥५॥
इत्युक्तवन्तं सा नाथमुपलक्ष्य त्रपावती ।
पर्य्यङ्कतामवष्टभ्याभ्युत्तस्थौ विनमन्मुखा ॥६॥
लतां हस्तीव हस्तेन दोष्णा वलयितेन ताम् ।
आददानोऽधिपर्य्यंकं न्यसदत्पवनञ्जयः ॥७॥

भूयस्तां पवनोऽवोचन्मयाऽतिक्षुद्रबुद्धिना ।
निरागाः खेदितासि त्वं तत्सहस्व प्रिये मम ॥८॥
अवोचदञ्जनाप्येवं नाथ मास्म ब्रवीरिदम् ।
सदैव तव दास्यस्मि क्षामणानुचिता मयि ॥९॥
निर्जगाम प्रहसितोवसन्ततिलकाप्यथ ।
रहःस्थयोर्हि दम्पत्योर्निच्छेकाः पार्श्ववर्त्तिनः ॥१०॥
रेमाते तत्र चाऽस्वैरमञ्जनापवनञ्जयौ ।
विरराम रसावेशाच्चैकयामेव यामिनी ॥११॥
प्रभातप्रायमालोक्य तामूचे पवनञ्जयः ।
जयाय कान्ते यास्यामि ज्ञास्यन्ति गुरवोऽन्यथा ॥१२॥
खेदं माऽतःपरं कार्षीः सुखं तिष्ठ सखीवृता ।
दशास्य कृत्यं सम्पाद्य यावदायामि सुन्दरि ॥१३॥
साप्युवाचेति तव दोष्मतः सिद्धमेवते ।
कृतार्थः शीघ्रमागच्छेर्जीवन्तीं मां यदीच्छसि ॥१४॥
अपरंच ऋतुस्नातास्म्यद्यैव यदि मे भवेत् ।
गर्भस्तत्त्वत्परोक्षेऽपवदेयुः पिशुना मयि ॥१५॥
पवनोऽप्याललापैवं शीघ्रमेष्यामि मानिनि ।
मय्यायाते कथं क्षुद्रा विकाशो भविता त्वयि ॥१६॥
अथवा गृह्यतामेतन्मदागमनसूचकम् ।
मन्नामाङ्कमङ्गुलीयं समये तत्प्रकाशयेः ॥१७॥

अर्पयित्वाङ्गुलीयं समुत्पत्य पवनञ्जयः ।
जगाम मानससरस्तीरस्थे शिविरे निजे ॥१८॥
ततोपि सहसैन्येन नाकीवद्व्योमवर्त्मना ।
जगाम लङ्कानगरीं रावणं प्रणनामच ॥१९॥
रावणोपि प्रविश्याथ पातालं पृतनान्वितः ।
प्रययौ प्रतिवरुणं च तरुणार्क इव त्विषा ॥२०॥
इतश्च तद्दिने गर्भं बभाराञ्जनसुन्दरी ।
विशेषसुन्दरीभूतसर्व्वावयवशालिनी ॥२१॥
मुखमापाण्डुगण्डश्रिश्यामवक्त्रौ पयोधरौ ।
गतिं नितान्तमलसां नेत्रे च प्रस्रुतोद्वले ॥२२॥
गर्भलक्ष्माणि चान्यानि तस्या व्यक्तानिवर्ष्मणि ।
दृष्ट्वा केतुमती श्वश्रूः साधिक्षेपमदो वदत् ॥२३॥युग्मं॥
हलेः किमिदमाचारीः कुलद्वयकलङ्कृतत् ।
देशान्तरगते पत्यौ पापे यदुदरण्यऽभूः ॥२४॥
स्वपुत्रे त्वदवज्ञायामज्ञाप्यज्ञानदोषिता ।
इयच्चिरं त्वमस्माभि र्नहि ज्ञातासि पांसुला ॥२५॥
एवं निर्भर्त्सिता श्वश्वा साश्रुरञ्जनसुन्दरी ।
पत्युरागमचिह्नं तदङ्गुलीयमदर्शयत् ॥२६॥
सा लज्जानम्रमुख्येवं श्वश्वा भूयोप्यभर्त्सत ।
यस्तेऽग्रहीन्न नामापि कथं ते तेन सङ्गमः ॥२७॥

अङ्गुलीयकमात्रेण प्रतारयसि नः कथम्।
प्रतारणाप्रकारान् हि बहून् जानन्ति पांसुलाः ॥२८॥
मद्गृहादद्य निर्गच्छ गच्छ स्वच्छन्दचारिणि।
पितुर्वेश्मनि मा त्वस्याः स्थानमेतन्न हीदृशम् ॥२९॥
तर्जयित्वाङ्गनामेवं नेतुं पितृनिकेतने।
आदिक्षद्दारक्षनरान्निःकृपा राक्षसीव सा ॥३०॥
तां च ते यानमारोप्य वसन्ततिलकान्विताम्।
महेन्द्रनगरोपान्ते नीत्वाऽमुचन्नुदश्रवः ॥३१॥
तां मातृवन्नमस्कृत्य क्षमयित्वा च ते ययुः।
स्वामिवत्स्वाम्यपत्येपि सेवकः समवृत्तयः ॥३२॥
तद्दुःखदुःखित इव तदाचास्तमगाद्रविः।
सन्तः सतीं न विपदं विलोकयितुमीश्वराः ॥३३॥
घूकानां घोरघूत्कारैः फेत्कारैः फेरुयोषिताम्।
क्रन्दितैर्डकदृदानां स्वाविध्यविविधैः स्वनैः ॥३४॥
तुमलैः पिङ्गलानाञ्च सङ्गीतैरिव रक्षसां।
स्फुटत्कर्णेव सा कष्टं तां जाग्रत्यऽनयन्निशाम् ॥३५॥
प्रातरुत्थाय सा दीना शालीनेव ह्रिया शनैः।
ययौ पितृगृहद्वारे भिक्षुकीवापरिच्छदा ॥३६॥
दृष्ट्वा ससंभ्रमस्ताञ्च प्रतीहारोऽनुयुज्य च॥
अवस्थां तादृशीं सख्या ख्यातां राज्ञे व्यजिज्ञपत्॥३७॥

लज्जामनः श्याममुखो राजाप्येवमचिन्तयन् ।
अचिन्त्यं चरितं स्त्रीणां ही विपाको विधेरिव ॥३८॥
इयं कुलकलङ्काय कुलटा गृहमागता ।
अञ्जनाञ्जनलेशोपि दूषयत्यं शुकं शुचि ॥३९॥
इति चिन्ता प्रपन्नं तमप्रसन्नोभवन्मुखः ।
प्रसन्नकीर्त्तिस्तनयोनयनिष्ठोऽब्रवीदिति ॥४०॥
द्रुतं निर्वास्यतामेषा दूषितं ह्यनया कुलम् ।
अहिदष्टाङ्गुलिः किन्न छिद्यते बुद्धिशालिना ॥४१॥
अथावोचन्महोत्साहोनाम मन्त्रीति भूपतिम् ।
श्वश्रू दुःखे दुहितॄणां शरणं शरणं पितुः ॥४२॥
किञ्च केतुमती श्वश्रूर्निर्दोषामप्यमूं प्रभो ।
निर्वासयेदपि क्रूरा दोषमुत्पाद्य कञ्चन ॥४३॥
व्यक्तिर्यावद्भवेद्दोषाऽदोषयोस्तावदत्र हि ।
प्रच्छन्नं पाल्यतामेषा स्वपुत्रीति कृपां कुरु ॥४४॥
राजामात्यं वदच्छ्वश्रूः सर्वत्र भवतीदृशी ।
ईदृशं चरितं तु स्याद्वधूनां नहि कुत्रचित् ॥४५॥
किञ्च संश्रृणमहेऽग्रेपि इष्येयं पवनस्य यत् ।
गर्भः सम्भाव्यतेऽमुष्याः पवनादेव तत्कथम् ॥४६॥
सर्व्वथा दोषवत्येषा साधु निर्वासिता तया ।
निर्वास्यतामितोपि द्राक्पश्यामस्तन्मुखं नहि ॥४७॥

इत्थं राजाज्ञया दास्यो निरवासयदङ्गनाम् ।
जनैरपि कृताऽक्रन्दैर्दीनास्यैः कष्टमीक्षिताम् ॥४८॥
क्षुधिता तृषिता श्रान्ता निःश्वसंत्यश्रुवर्षिणी ।
दर्भविद्धपदाऽसृग्भी रञ्जयन्ती महीतलम् ॥४६॥
पदे पदे प्रस्खलन्ती विश्राम्यन्ती तरौ तरौ ।
सहसख्याञ्जनाचालीद्रोदयन्ती दिशोपि हि ॥५०॥
यत्र यत्र पुरे ग्रामे साऽगच्छत्तत्र तत्र च ।
पूर्वं यातनृपपुंभिर्निषेधान्नासदत्स्थितिम् ॥५१॥
पर्य्यटन्ती तु सा प्राप कामप्येकां महाटवीम् ।
गिरिकुञ्जे तरोर्मूले निषद्य विललाप च ॥५२॥
अहोमे मन्दभाग्याया गुरूणामविचारतः ।
अग्रे दण्डोभवत्पश्चादपराधविवेचनम् ॥५३॥
साधु केतुमति कुलकलङ्कोरक्षितस्त्वया ।
त्वयापि सम्बन्धिभयात्तात साधुविचारिम् ॥५४॥
दुःखितानां हि नारीणां माताश्वासनकारणम् ।
प्रतिच्छन्दयुषामातस्त्वयाप्यहमुपेक्षिता ॥५५॥
भ्रातुर्दोषोपि नास्त्येव ताते जीवति तेन तु ।
नाथ त्वयि च दूरस्थे यत्नो सर्वोप्यरि मम ॥५६॥
सर्वथा स्त्री विना नाथमेकाहमपि जीवतु ।
यथाहमेका जीवामि मन्दभाग्यशिरोमणिः ॥५७॥

विलपन्त्यञ्जना सख्या निन्ये सम्बोध्य चाग्रतः ।
ददर्शान्तर्गुहं ध्यानस्थं चामितगतिं मुनिम् ॥५८॥
चारणश्रमणन्तञ्च प्रणम्य विनयेन ते ।
निषेदतुः पुरो भूमौ सोपिध्यानमपारयत् ॥५९॥
मुनिश्चिन्तितकल्याणमहारामैकसारणिम् ।
धर्मलाभाशिषं सोदात् करमुन्नम्य दक्षिणम् ॥६०॥
नमस्कृत्य पुनर्भक्त्या वसन्ततिलका तु सा ।
सर्वमप्यञ्जनादुःखमाचख्यौ मूलतोपि हि ॥६१॥
कोस्यागर्भेऽभवत्केन कर्मणा चेदृशीं दशाम् ।
सम्प्राप्तैषेति तत्सख्या पृष्टः स मुनिरब्रवीत् ॥६२॥
अस्यैव जम्बुद्वीपस्य क्षेत्रे भरतनामनि ।
मन्दरे नगरे नाम्ना प्रियनन्दोत्यभूद्वणिक् ॥६३॥
जयानाम्न्यांच जायायां तस्याजायत नन्दनः ।
दमयन्तः प्रियदमः कलानां निधिरिन्दुवत् ॥६४॥
क्रीडन्सोऽन्येद्युरुद्याने स्वाध्यायध्यानतत्परान् ।
ददर्श साधूंस्तेभ्यश्च धर्मं शुश्राव शुद्धधीः ॥६५॥
सम्यक्त्वं नियमांश्चाथ जग्राह विविधानसौ ।
यथोचितञ्च साधुभ्यो ददौ दानमनिन्दितम् ॥६६॥
तपःसंयमनिष्ठोऽसौ विपद्य क्रमयोगतः ।
अभूत्कल्पे द्वितीयस्मिन्नमरः परमर्द्धिकः ॥६७॥

च्युत्वा ततो जम्बुद्वीपे म्टगाङ्कनगरे पितुः ।
प्रियङ्गुलक्ष्म्यां पुत्रोऽभूत् हरिचन्द्रमहीपतेः ॥६८॥
सिंहचन्द्र इति ख्यातो जैनं धर्मं प्रपद्य सः ।
विपद्य क्रमयोगाच्च देवभूयमुपेयिवान् ॥६९॥
च्युत्वा चात्रैव वैताढ्ये नगरे वारुणेऽभवत् ।
सुकण्ठराजकनकोदर्योस्तुक् सिंहवाहनः ॥७०॥
भुक्त्वा स सुचिरं राज्यं तीर्थे श्रीविमलप्रभोः ।
लक्ष्मीधरमुनेः पादमूले व्रतमुपाददे ॥७१॥
दुस्तपं स तपस्तप्त्वा म्टत्वा भूल्लान्तके सुरः ।
च्युत्वा ततोऽस्यास्त्वत्सख्या उदरे समवातरत् ॥७२॥
गुणानामालयश्चायं दोष्मान्विद्याधरेश्वरः ।
पुत्रश्चरमदेहोऽस्या अनवद्यो भविष्यति ॥७३॥
अन्यच्च कनकपुरे नगरेऽभून्नरेश्वरः ।
नामतः कनकरथो महारथशिरोमणिः ॥७४॥
पत्न्यौ तस्य च कनकोदरीलक्ष्मीवतीतिच ।
अत्यन्तश्राविका तत्र लक्ष्मीवत्यभवत्सदा ॥७५॥
गृहचैत्ये रत्नमयं जिनबिम्बं विधाय सा ।
अपूजयद्वन्दिष्ट प्रत्यहं कालयोर्द्वयोः ॥७६॥
मात्सर्यात्कनकोदर्या हृत्वार्हत्प्रतिमां नु सा ।
चिक्षिपेव करस्यान्तरपवित्रे हतात्मया ॥७७॥

जयश्रीनाम गणिनी विहरन्त्यागता तदा।
तद्दृष्ट्वा तामुवाचैव माकार्षीः किमिदं शुभे॥७८॥
भगवत्प्रतिमामत्र प्रक्षिपन्त्या त्वया कृतः।
अनेकभवदुःखानामात्मायं हन्तभाजनम्॥७९॥
इत्युक्ता सानुतापा सा गृहीत्वा प्रतिमां ततः।
प्रमृज्य च क्षमयित्वा च यथास्थानं न्यवेशयत्॥८०॥
तदादिसम्यक्त्वधरा जैनं धर्मं प्रपाल्य च।
काले विपद्यासौ धर्मकल्पे सा दिव्यजायत॥८१॥
च्युत्वा ततो महेन्द्रस्याऽभूत्सुतेयं सखी तव।
अस्यास्तदर्हद्दर्चाया दुःस्थानक्षेपजं फलम्॥८२॥
अस्या स्तस्मिन् भवेयामित्त्वमभूस्तस्य कर्मणः।
अनुमन्त्री च तत्पाकमनुभुङ्क्षे सहानया॥८३॥
भुक्तप्रायमिदं चास्यास्तस्य दुःकर्मणः फलम्।
गृह्यतां जिनधर्मस्तच्छुभोदर्को भवे भवे॥८४॥
आयातो मातुलोऽकस्मादेतान्नेता स्ववेश्मनि।
मेलकश्चाचिरात्पत्या सहैव तस्या भविष्यति॥८५॥
एवमुक्त्वा हिते धर्मे स्थापयित्वा च ते उभे।
समुत्पपात नभसा समुनीन्द्रः खगेन्द्रवत्॥८६॥
अथ पुच्छच्छटाच्छोटैः स्फोटयन्तमिवाचलम्।
फूत्कारपूर्णदिक्कुञ्जं कुञ्जराश्मिकरालितम्॥८७॥

दीपायमाननयनं वज्रकन्दाभदंष्ट्रिकम् ।
क्रकचक्रूरदशनं ज्वालासोदरकेसरम् ॥८८॥
लोहाङ्कुशोपमनखं शिलासदृगुरस्थलम् ।
पञ्चाननयुवानन्ते समायान्तमपश्यताम् ॥८९॥ विशि॥
ततो वेपथुमत्यौ ते विविक्षू इव भूतलम् ।
कान्दिशीके हरिणिके इव यावदतिष्ठताम् ॥९०॥
मणिचूलाभिधस्तावद्गन्धर्वस्तद्गुहाधिपः ।
विकृत्य शारभं रूपं तं पञ्चास्यमनाशयत् ॥९१॥
संहृत्य शारभं रूपं स्वंरूपं प्रतिपद्य च ।
तयोः प्रमोदाय जगौ सप्रियोऽर्हद्गुणस्तुतिम् ॥९२॥
तेन चामुक्तसान्निध्ये गुहायां तत्र सुस्थिते ।
मुनिसुव्रतदेवार्च्चां स्थापयित्वार्च्चतस्तते ॥९३॥
अन्येद्युः सुषुवे तत्र सिंही सिंहमिवोत्कटम् ।
कुलिशां कुशचक्राङ्कपादं तनयमञ्जना ॥९४॥
तस्याश्च सूतिकर्माणि वसन्ततिलकाकरोत् ।
स्वयं समाहृतैर्हर्षावेशादेधोजलादिभिः ॥९५॥
आरोप्य सुतमुत्सङ्गे दुःखिताञ्जनसुन्दरी ।
उदश्रुवदनारोदीद्रोदयन्तीव तां गुहाम् ॥९६॥
महात्मन्नत्र विपिने तव जातस्य कीदृशम् ।
जन्मोत्सवं करोम्येषा वराकी पुण्यवर्जिता ॥९७॥

एवं रुदन्तीमत्यन्तमुदश्रु प्रेक्ष्य खेचरः।
प्रतिसूर्य्यो मधुरगीरपृच्छद्दुःखकारणम् ॥९८॥
अथाविवाहादापुत्रजन्माचख्यावशेषतः।
अञ्जनाया दुःखहेतुं वाष्पायितमुखी सखी ॥९९॥
सद्योरुदन् सोप्यवादीदहं हनुपुरेश्वरः।
एषोऽस्मि सुन्दरीमालाकुक्षिभूश्चित्रभानुजः ॥१००॥
भ्राता मानसवेगाख्यः त्वज्जनन्याश्च बालिके।
दिष्ट्या त्वां दृष्टवानस्मि जीवन्तीमाश्वसिह्यतः ॥१॥युग्मं॥
तं मातुलं विदित्वा साप्यरोदीदधिकाधिकम्।
पुनर्नवीभवेत्प्रायो दुःखमिष्टावलोकनात् ॥२॥
रुदतीं वारयित्वा तां प्रतिसूर्य्यः सहागतम्।
सूनोर्जन्मादि पप्रच्छ दैवज्ञमथसोवदत् ॥३॥
भाव्यवश्यं महाराजो भवे चात्रैव सेत्स्यति।
शुभग्रहबले लग्ने जातोयं पुण्यभाक् शिशुः ॥४॥
तथाहि सुतिथिरियं चैत्रस्य वहुलाष्टमी।
नक्षत्रं श्रवणं स्वामी वासरस्य विभावसुः ॥५॥
आदित्योवर्त्तते मेषे भवनं तुङ्गमाश्रितः।
चन्द्रमामकरे मध्ये भवने समवस्थितः ॥६॥
लोहिताङ्गो वृषे मध्ये मध्ये मीने विधोः सुतः।
कुलीरेधिषणोत्युच्चै रध्यस्य भवनं स्थितः ॥७॥

मीने स्थितो दैत्यगुरुस्तस्मिन्नेव शनैश्चरः ।
मीनलग्नोदये ब्रह्मयोगे सर्वमिदं शुभम् ॥८॥ चतुर्भि
प्रतिसूर्य्योऽग्रयामेयीं समखीं सात्मजां च ताम् ।
विमानवरमारोप्य प्रतस्थे स्वपुरं प्रति ॥९॥
विमाने लम्बमानोच्चरत्नप्रालम्बकिङ्किणी ।
जिघृक्षुर्मातुरुत्सङ्गादुत्पपाताथ बालकः ॥१०॥
पपात च गिरेर्मूर्ध्नि व्योम्नः पविरिवच्युतः ।
तत्पातनिर्घातवशात् स गिरिः कणशोऽभवत् ॥११॥
आजघ्ने हृदयं सद्यः पाणिनाञ्जनसुन्दरी ।
दरीरपि प्रतिरवैः रोदयंती रुरोद च ॥१२॥
प्रतिसूर्य्योऽनुपत्याश्च भागिनेय्यास्तमर्भकम् ।
अक्षताङ्गमुपादायाऽर्पयन्नष्टनिधानवत् ॥१३॥
प्रतिसूर्य्योविमानेन मनोवेगेन तद्युतः ।
ययौ पुरे हनुरुहे सद्यः कृतमहोत्सवे ॥१४॥
नीत्वा चोतारयामास स्वेश्मन्यं जनां मुदा ।
कुलदेवीमिवायातां तच्छुद्धां तोप्यपूजयत् ॥१५॥
पुरे हनुरुहे यस्माज्जातमात्रोऽयमाययौ ।
ततस्तूनोर्मातुलश्चक्रेभिधानं हनुमानिति ॥१६॥
यच्छैलश्चूर्णितोऽनेन पतितेन विमानतः ।
ततःश्रीशैल इत्याख्यां तस्यान्यामपि सोऽकरोत् ॥१७॥

हनुमानप्यवर्द्धिष्ट तत्र क्रीडन्यथासुखम् ।
राजहंसार्भक इव मानसांभोजिनीवते ॥ १८ ॥
दोषोध्यारोपितः श्वश्र्वा कथं नामोत्तरिष्यति ।
सदैवं चिन्तया ताम्यदन्तःशल्येव चाञ्जना ॥ १९ ॥
इतश्च पवनः सन्धिं विधाय खरदूषणौ ।
वरुणान्मोचयामास तोषयामास रावणम् ॥ २० ॥
ततश्च रावणो लङ्कां जगाम सपरिग्रहः ।
पवनोपि तमापृच्छ्य तमेव पुरमाययौ ॥ २१ ॥
प्रणम्य पितरौ तत्राञ्जनावासगृहं ययौ ।
तच्चानञ्जनमद्राक्षीन्नतज्योत्स्नमिवोडुपम् ॥ २२ ॥
क्वाञ्जना सा नयनयोरमृताञ्जनदर्शना ।
मत्प्रेयसीति तत्रस्यामेकां पप्रच्छ च स्त्रियम् ॥ २३ ॥
साप्याख्यत्त्वयि यात्रायांगतेऽह्नः सु कियत्स्वपि ।
निर्वासिता केतुमत्या गर्भसम्भवदोषतः ॥ २४ ॥
महेन्द्रनगरासन्ने सा नीत्वा रक्षपूरुषैः ।
अरण्ये मुमुचे पापैर्हरिणीवेयमाकुला ॥ २५ ॥
इति श्रुत्वाथ पवनो ययौ पवनरंहसा ।
पारावत इव प्रेयस्युत्कः श्वसुरपत्तनम् ॥ २६ ॥
प्रियामपश्यंस्तत्रापि पप्रच्छैकां स योषिताम् ।
इहाञ्जना प्रेयसी मे किमायाताथवा नहि ॥ २७ ॥

साचख्याविह सायासीद्वसन्ततिलकान्विता ।
परं निर्वासिता प्रियोत्पन्नदोः शैल्यदोषतः ॥२८॥
पविनेवाहतस्तेन वचसा पवनञ्जयः ।
प्रियामन्वेष्टुमभ्राम्यद्भृशं शैलवनादिषु ॥२९॥
तत्प्रवृत्तिं न च प्राप शापभ्रष्ट इवामरः ।
विषण्णः सञ्जगादैवं मित्रं प्रहसितं निजम् ॥३०॥
सखे गत्वा संश पित्रो र्भ्राम्यतापि महीमिमाम् ।
मयाद्य यावदालोकि न क्वाप्यञ्जनसुन्दरी ॥३१॥
पुनर्गवेषयिष्यामि तामरण्ये तपस्विनीम् ।
द्रक्ष्यामि चेत्साधु तर्हि नोचेद्वेक्ष्यामि पावकम् ॥३२॥
एवमुक्तः प्रहसितो गत्वादित्यपुरे द्रुतम् ।
प्रह्लादकेतुमत्यो स्तत्कथयामास वाचिकाम् ॥३३॥
श्रुत्वा केतुमती तच्च ग्रावणेन हृदये हता ।
मूर्च्छितान्यपतद्भूमौ संज्ञां लब्ध्वेत्युवाच च ॥३४॥
स किं त्वया प्रहसित व्यापन्नो कृतनिश्चयः ।
प्रियमित्रं वने मुक्त एकाकी कठिनाशयः ॥३५॥
अथवा किं मया सापि निर्दोषा परमार्थतः ।
अविमृश्य विधायिन्या पापिन्या निरवास्यत ॥३६॥
लब्धं मयात्रैव साध्व्या दोषारोपणजं फलम् ।
अत्युग्रपुण्यपापानामिहैव ह्याप्यते फलम् ॥३७॥

एवं वदन्तीं प्रह्लाद स्तां निवार्य्य कथञ्चन ।
चचाल सबलः सूनुमन्वेष्टुं स द्रुवाञ्जनाम् ॥ ३८॥
सर्व्वविद्याधरेन्द्राणामाप्तानां चान्तिके नरान् ।
अञ्जनापवनान्वेषहेतवे प्रजिघायसः ॥३९॥
सह विद्याधरैः सूनुं स्नुषाञ्चालोकयन् स्वयम् ।
प्रादुर्भूतत्वरो भ्राम्यन् सोगाद्भूतवनं वनम् ॥४०॥
पवनोऽत्रान्तरे तत्र विरचय्य चितां वने ।
ज्वलनं ज्वालयामास प्रह्लाद स्तं ददर्शसः ॥४१॥
स्थित्वोपचितं पवनः प्रोचे हेवनदेवताः ।
विद्याधरेन्द्र प्रल्हादकेतुमत्योः सुतोऽस्म्यहम् ॥४२॥
महासत्यञ्जनानाम पत्नी मे सा च दुर्द्धिया ।
निर्दोषापि मयोद्वाहात् प्रभृत्यपि हि खेदिता ॥४३॥
तां परित्यज्य यात्रायां चलितः स्वामिकार्य्यतः ।
दैवात् ज्ञात्वा तामदोषामुत्पत्य पुनरागमम् ॥४४॥
रमयित्वा च तां स्वैरमभिज्ञानं समर्प्य च ।
पितृभ्यामपरिज्ञातः पुनः कटकमापतम् ॥४५॥
जातगर्भा च सा कान्ता महोषाहोषसङ्किभिः ।
निर्वासिता मे गुरुभिः क्वाप्यस्तीति न बुध्यते ॥४६॥
साग्रेऽधुनाच निर्दोषा संप्राप्ता दारुणां दशाम् ।
मामेवाज्ञानदोषेण धिग्धिक्स्यातिमपण्डितम् ॥४७॥

मया भ्रान्त्वाखिलापृथ्वीं सम्यग्मार्गतयापि हि ।
न साप्ता मन्दभाग्येन रत्नं रत्नाकरे यथा ॥४८॥
तदद्य स्वां तनुमिमां जुहोम्यत्र हुताशने ।
जीवतो मे यावज्जीवं दुःसहो विरहानलः ॥४९॥
यदि पश्यथ मेकान्तां ज्ञापयध्वन्तदाद्यऽदः ।
त्वद्वियोगात्तव पतिः प्रविवेश हुताशने ॥५०॥
इत्युक्त्वा तत्र चित्यायां दीप्यमाने हविर्भुजि ।
झम्पां प्रदातुं पवनः प्रोत्पपात नभस्तले ॥५१॥
श्रुततद्वचनोवेगात् प्रल्हादोप्यति सम्भ्रमी ।
वक्षःस्थलोपपीडं तं स्वबाहुभ्यामधारयत् ॥५२॥
मृत्योः प्रियवियोगार्त्तिप्रतीकारस्य संप्रति ।
को विघ्नोह्ययं मामत्युच्चैरुवाच पवनञ्जयः ॥५३॥
प्रल्हादोप्यब्रवीत्साश्रुरेष पापोऽस्मि ते पिता ।
निर्दोषायां यत्स्नुषायां निर्वासनमुपेक्षितः ॥५४॥
अविमृश्य कृतं तावत्त्वन्मातैवैकमादितः ।
द्वितीयं माकृथास्त्वंतु स्थिरीभव सुधीरसि ॥५५॥
स्नुषान्वेषणहेतोश्चादिष्टाः सन्ति सहस्रशः ।
विद्याधरामया वत्सागमय त्वं तदागमम् ॥५६॥
अत्रान्तरे तत्प्रहिताः केपि विद्याधरोत्तमाः ।
अन्वेषयन्तस्त्व पवनाञ्जने हनुपुरं ययुः ॥५७॥

प्रतिसूर्य्याञ्जनयोस्तेञ्जनाविरहदुःखतः ।
पवनस्याग्निप्रवेशप्रतिज्ञामाचचक्षिरे ॥५८॥
दुःश्रवन्तद्वचःश्रुत्वा पीत्वा विषमिवाऽञ्जना ।
हाहतास्मीति जल्पन्ती पपातभुवि मूर्च्छिता ॥५९॥
आसिक्ता चन्दनाम्भोभि स्तालवृन्तैर्व्वीजिता ।
लब्धसंज्ञा समुत्थाय सा रुरोदेति दीनगीः ॥६०॥
पतिव्रता पतिशोकात्प्रविशन्ती हुताशने ।
तासां विनाहि भर्त्तारं दुःखाय खलु जीवितम् ॥६१॥
नारी सहस्रभात्तृणां भर्त्तृणां श्रीमतां पुनः ।
क्षणिकः प्रेयसीशोकस्तत्कृतोऽग्निप्रवेशनम् ॥६२॥
विपरीतमिदं यत्ते त्वयि वह्नि प्रवेशिनि ।
विरहेपि मयि पुनर्हाजीवन्त्यास्मियच्चिरम् ॥६३॥
महासत्वस्य तस्याल्पसत्वायाश्च ममान्तरम् ।
उपलब्धमिदं नीलकाचयोरिव सम्प्रति ॥६४॥
नमेश्वशुरयोर्द्दोषाद्दोषः पित्रो र्न्नचाप्ययम् ।
ममैव मन्दभाग्यायाः कर्म्मदोषोऽयमीदृशः ॥६५॥
रुदन्तीं बोधयित्वा तां प्रतिसूर्य्यः सनन्दनाम् ॥
विमानवरमारोप्य पवनान्वेषणे ययौ ॥६६॥
सम्भ्राम्यन् प्राप तत्रैवं वने भूतवनाभिधे ।
दूरादपि प्रहसितेनेक्षां चक्रे च सास्रुणा ॥६७॥

साञ्जनं तं समायान्तमारात्प्रहसितः स तु ।
आख्यत प्रह्लादपवनञ्जययोर्जयपूर्वकम् ॥६८॥
ततो विमानादुत्तीर्य प्रतिसूर्य्योऽञ्जनापि च ।
प्रह्लादं नेमतुर्दूराद्भक्त्या भून्यस्तमस्तकौ ॥६९॥
प्रतिसूर्य्यं परिष्वज्य पौत्रमेकं निवेश्य च ।
प्रह्लादो जातसंह्लादो जगादैवं ससंभ्रमः ॥७०॥
मज्जन्तं व्यसनाम्भोधौ मामद्य सकुटम्बकम् ।
समुद्धरंस्त्वमेवासि बन्धुः सम्बन्धिनां धुरि ॥७१॥
मद्वंशपर्वभूतेयं शाखा सन्तानकारणम् ।
स्नुषा त्यक्ता विनादोषं साध्वियं रक्षिता त्वया ॥७२॥
सद्यो व्यसनवेलाया न्यवर्त्तत पयोधिवत् ।
प्रशान्तशोकज्वलनो मुदितः पवनोपि हि ॥७३॥
विद्यासामर्थ्यतस्तत्र सर्वविद्याधरेश्वराः ।
महान्तमुत्सवं चक्रुरानन्दाब्धिनिशाकरम् ॥७४॥
पुरं हनुरुहं जग्मुस्ततः सर्वेपि ते मुदा ।
विमानैर्विदधानाः खं हैरिव ज्योतिष्मतीमिव ॥७५॥
महेन्द्रोप्याययौ तत्र समं मानसवेगया ।
सा च केतुमती देवी सर्वेप्यन्ये च बान्धवाः ॥७६॥
विद्याधरेन्द्रैर्विदधे मिथः सम्बन्धिबन्धुभिः ।
पूर्वोत्सवादप्यधिकस्तत्रापि हि महोत्सवः ॥७७॥

ततश्चान्योन्यमापृच्छ्य सर्वे स्वं स्वं पुरं ययुः।
तत्रैव पवन स्तस्थावञ्जनाहनुमद्युतः ॥७८॥
हनुमान् ववृधे तत्र पितुः सह मनोरथैः।
कलाश्च जगृहे सर्वा विद्याश्च समसाधयत् ॥७९॥
नागराजायतभुजः शस्त्रशास्त्रविचक्षणः।
क्रमाच्च यौवनं प्राप हनुमान् भानुमांस्त्विषा ॥८०॥
इतश्चामर्षणभ्रष्टो रावणः सन्धिदूषणम्।
उत्पाद्य वरुणं जेतुं प्रतस्थे स्वेप्नपर्वतः ॥८१॥
दूताहूतास्ततश्चेयुः सर्वे विद्याधरेश्वराः।
कटकं तस्य कुर्वन्तो वैताढ्यकटकोपमम् ॥८२॥
पवनं प्रतिसूर्य्यौ तौ तत्र यावत्प्रचेलतुः।
इत्यूचे हनुमांस्तावद्वष्टम्भैकसानुमान् ॥८३॥
इहैव तिष्ठतां तातौ जेष्याम्यहमपि द्विषः।
प्रहरेद्बाहुना कोऽपि तीक्ष्णे प्रहरणे सति ॥८४॥
बालत्वान्नानुकंप्योऽस्मि यद्युष्मत्कुलजन्मनाम्।
पौरुषावसरे प्राप्ते न प्रमाणं वयः खलु ॥८५॥
एवं तावतिनिर्बन्ध्य तत्प्रतीच्छ्या पृच्छ्याचोच्चकैः।
ताभ्याञ्च चुम्बितो मूर्ध्नि कृतप्रस्थानमङ्गल ॥८६॥
महासामन्तसेनानी सेनाप्रतसमावृतः।
प्रययौ रावणस्कन्धावारे दुर्वारविक्रमः ॥८७॥

हनुमन्तं समायान्तं दृष्ट्वा जयमिव स्वयम् ।
प्रणमन्तं मुदा स्वाङ्के निदधे दशकन्धरः ॥८८॥
अभ्यर्णे वरुणपुर्य्यास्तस्थौ युद्धाय रावणः ।
वरुणोवारुणेयाश्च देशाद्दोर्निर्ययुः शतम् ॥८९॥
अभ्येत्य योधयामासू रावणं वरुणात्मजाः ।
सुग्रीवाद्यैः समं वीरै र्युयुधे वरुणोपि हि ॥९०॥
महौजसो वारुणेयोऽरुणाक्षा दशकन्धरम् ।
जात्यश्वान इव क्रोडं खेदयामासुराहवे ॥९१॥
अत्रान्तरे च हनुमान् दारुणोवरुणात्मजान् ।
कुञ्जरान् केशरीवेत्याऽयोधयत् क्रोधदुर्द्धरः ॥९२॥
विद्यासामर्थ्यतो यत्नाद्वारुणीं स्तान् बबन्ध च ।
पशूनिव क्रुधारक्तहनुको हनुमानथ ॥९३॥
तान् दृष्ट्वा वरुणः क्रुद्धोऽभ्यधाविष्ट हनूमते ।
सुग्रीवप्रभृतीन् धुन्वन् दन्ती मार्गतरूनिव ॥९४॥
रावणोप्यापतन्तं तं नदीरयमिवाचलः ।
अंतरास्खलयामास वर्षन् विशिखधोरणीम् ॥९५॥
वृषभो वृषभेणेव कुञ्जरेणैव कुञ्जरः ।
वरुणो रावणेनोच्चैः क्रोधान्धो युयुधे चिरम् ॥९६॥
सर्वौजसा कृलीकृत्य वरुणं रावणश्छली ।
तत्पत्येन्द्रमिवाबभात सर्वत्रबलवत्सलम् ॥९७॥

ततो जयजयारावैर्मुखरीकृतदिङ्मुखः ।
स्कन्धावारं पृथुस्कन्धो जगाम दशकन्धरः ॥९८॥
रावणो वरुणं तत्र सह पुत्रैर्बबन्ध तम् ।
मुमोच प्रणिपातान्तः प्रकोपो हि महात्मनाम् ॥९९॥
पुत्रीं सत्यवतीं नाम वरुणोऽदाद्धनूमते ।
दृष्टसारः स्वयं हीदृग्जामाता दुर्लभः खलु ॥२००॥
लङ्कायां रावणोऽथागाददत्त च हनूमते ।
हृष्टचन्द्रणखापुत्रीमनङ्गकुसुमाभिधाम् ॥१॥
सुग्रीवेण पद्मरागां नलेन हरिमालिनीम् ।
अन्यैः सहस्रसंख्याश्च तस्मै दत्ताः स्वकाः सुताः ॥२॥
श्लिष्ट्वा दृढं दशमुखेन मुदा विसृष्टो
दोष्मानथो हनुपुरे हनुमान् जगाम ।
अन्येपि वानरपतिप्रमुखाः प्रजग्मु-
र्विद्याधरा निजनिजं नगरं प्रहृष्टाः ॥३॥

इत्याचार्य्य श्रीहेमचन्द्रविरचिते हनूमदुत्पत्ति-
वरुणसाधनोनाम तृतीयः सर्गः ॥३॥

---

## अथ चतुर्थः सर्गः ।

इतश्च मिथिलापुर्यां हरिवंशमहीपतिः ।
आसीद्वासवकेत्वाख्यो विपुला तस्य च प्रिया ॥१॥

तयोः सूनुरनूनश्रीर्बभूव भुवि विश्रुतः ।
प्रजानां जनक इव जनकोनाम पार्थिवः ॥२॥
इतश्च पुर्य्ययोध्यायामृषभस्वामिराज्यतः ।
इक्ष्वाकुवंशात्सम्भूतादित्यवंशेषु राजसु ॥३॥
यातेषु केषुचिन्मोक्षं स्वर्गं यातेषु केषुचित् ।
संख्यातीतेषु विंशत्याऽर्हत्तीर्थे प्रसर्पति ॥४॥
बभूव विजयोराजा हिमचूलाच तत्प्रिया ।
तयोरभूतां द्वौ पुत्त्रौ वज्रबाहुपुरन्दरौ ॥५॥
इतश्चा भून्नागपुरे पुरे राजेभवाहनः ।
चूडामणिश्च तत्पत्नी तत्पुत्री च मनोरमा ॥६॥
गत्वोद्यद्यौवनां वज्रबाहुः परिणिनाय ताम् ।
महेन महताश्वेतमरीचिरिव रोहिणीम् ॥७॥
भक्त्या च शीलेनोदयसुन्दरेणानुगामिना ।
मनोरमामथादाय प्रतस्थे स्वपुराय सः ॥८॥
स गच्छन्नन्तराऽपश्यत्तपस्तेजोतिभास्वरम् ।
वसन्ताद्रिस्थमुदयाचलस्थमिव भास्करम् ॥९॥
मोक्षाध्वरीक्षकमिवोत्पश्यमातापनापरम् ।
गुणसागरनामानं तपस्यन्तं महामुनिम् ॥१०॥युग्मम्॥
मयूर इव जीमूतं तं दृष्ट्वा जातसंमदः ।
कुमार इदमाहस्म धृत्वा सपदि वाहनम् ॥११॥

अहो महात्मा कोप्येष वन्द्य एव महामुनिः ।
चिन्तामणिरिव मया दृष्टः पुण्येन भूयसा ॥१२॥
उवाच चैवमुदयसुन्दरोऽथ कुमारकम् ।
आदित्समे परिव्रज्यां सोदर्यश्चित्तमस्ति मे ॥१३॥
उदयो नर्मणा भूयः प्रोचे यद्यस्ति ते मनः ।
तदद्य माविलम्बस्व सहायोहमपीह ते ॥१४॥
कुमारोव्याजहारैवं मर्यादामिव वारिधिः ।
मात्याक्षीः स्वामिमां सन्ध्यां सोप्योमेवेत्यभाषत ॥१५॥
कुमारोवाहनान्मोहादिवोत्तीर्य्य दरोह ताम् ।
वसन्तशैलमुदयसुन्दरादिभिरावृतः ॥१६॥
वज्रबाहुमथावादीदिभवाहननन्दनः ।
स्वामिन्याप्रवाणीरद्यधिग्मेनर्माभिभाषणम् ॥१७॥
नर्मोक्तिरावयोरासीत् को दोषस्तद्व्यतिक्रमे ।
नर्मोक्ति र्नहि सत्यैव प्राच्या धवलगीतवत् ॥१८॥
भविष्यसि सहायस्त्वं व्यसनेष्वखिलेष्वपि ।
इत्यकाण्डेपि माभाङ्क्षीरस्माकमनोरथान् ॥१९॥
इदमद्यापि माङ्गल्यं तव हस्तेस्ति कङ्कणम् ।
तद्विवाहफलं भोगान् सहसा कथमुज्झसि ॥२०॥
सांसारिकसुखास्वादवञ्चितेयं मनोरमा ।
जीविष्यति कथं नाथ त्वया तृणवदुज्झिता ॥२१॥

वज्रबाहुकुमारोऽथ जगादोदयसुन्दरम्।
सुन्दरं भर्त्तृजन्मद्रोः फलञ्चाखिललक्षणम् ॥२२॥
नर्म्मोक्तिरपि तेऽस्मासु बभूव परमार्थसात्।
सुक्तिषु स्वातिजीमूतवारिमौक्तिकसाहिव ॥२३॥
त्वत्स्वसा च कुलीना चेत्तत्प्रव्रज्यां ग्रहीष्यति।
नोचेदस्याः शिवः पन्थाभोगैः पुनरलं मम ॥२४॥
तद्व्रतायानुमन्यस्व मां त्वमप्यनुयाहि नः॥
कुलधर्म्मः क्षत्रियाणां स्वसन्धापालनं खलु ॥२५॥
उदयं प्रतिबोध्यैवं वज्रबाहुरुपाययौ।
सागरं गुणरत्नानां महर्षिं गुणसागरम् ॥२६॥
तत्पादान्ते वज्रबाहुः परिव्रज्यामुपाददे।
उदयोमनोरमाथ कुमाराः पञ्चविंशतिः ॥२७॥
वज्रबाहुं प्रव्रजितं श्रुत्वा विजयभूपतिः।
वरं बालोऽप्यसौ नाहमिति वैराग्यमासदत् ॥२८॥
ततश्च विजयः पुत्रं राज्ये न्यस्य पुरन्दरम्।
निर्वाणमोहस्य मुने पार्श्वे व्रतमुपाददे ॥२९॥
पुरन्दरोपि स्वे राज्ये पृथिवीकुक्षिजं सुतम्।
न्यस्य कीर्त्तिधरं क्षेमं करष्यन्तोऽभवद्यतिः ॥३०।
अथ कीर्त्तिधरो राजा भुक्तवैषयिकं सुखम्।
सहदेव्या समं पत्न्या पौलोम्येव पुरन्दरः ॥३१॥

प्रविव्रजिषुरन्येद्युः समं त्रिभिरमण्यत: ।
तवानुत्पन्नपुत्रस्य न व्रतादानमर्हति ॥३२॥
त्वय्यपुत्रे व्रतभाजिन्यनाथेयं वसुन्धरा ।
तत्प्रतीक्षस्व यावत्ते स्वामिन्नुत्पद्यते सुतः ॥३३॥
ततः कीर्त्तिधरस्यापि यथैव गृहवासिनः ।
काले गच्छत्यभूत्पुत्रः सहदेव्या सुकोशलः ॥३४॥
ज्ञात्वा जातमिमं बालं पतिर्मे प्रव्रजिष्यति ।
सहदेवीति बुद्ध्या तं जातमात्रमगोपयत् ॥३५॥
विवेद मेदिनीनाथस्तं गुप्तमपि बालकम् ।
प्राप्तोदयं हि तरणिं तिरोधातुं क ईश्वरः ॥३६॥
राजाथ स्वार्थकुशलो राज्ये न्यस्य सुकोशलम् ।
सूरेर्विजयसेनस्य पादान्ते व्रतमाददे ॥३७॥
तप्यमानस्तपस्तीव्रं सहमानः परीषहान् ।
स गुर्व्वनुज्ञयैकाकिर्विहारेणान्यतो ययौ ॥३८॥
साकेतमन्यदामासोपवासी पारणेच्छया ।
स आजगाम भिक्षार्थं मध्याह्ने तत्र चाभ्रमत ॥३९॥
सौधाग्रस्था सहदेवी तं च दृष्ट्वेत्यचिन्तयत् ।
पत्यौ प्रव्रजितेऽमुष्मिन् पतिहीना पुराभवम् ॥४०॥
वत्सः सुकोशलोप्यद्य दृष्ट्वैनं प्रव्रजेद्यदि ।
तदा पुत्रोऽपि मे नश्यान्निर्वीराहं ततः परम् ॥४१॥

तस्मान्निरपराधेऽपि भर्त्तापि व्रतधार्य्यपि ।
निर्वास्यो नगरात्सूनो राज्यस्थेमचिकीर्षया ॥४२॥
इत्यन्यलिङ्गिभिः सार्द्धन्तं राज्ञी निरवासयत् ।
लोभाभिभूतमनसां विवेकः स्यात्कियच्चिरम् ॥४३॥
धात्री सुकोशलस्याथ स्वामिनं व्रतधारिणम् ।
पुरान्निर्वासितं ज्ञात्वा रोदितिस्म निरर्गलम् ॥४४॥
किं रोदिषीति पप्रच्छ सुकोशलनृपोऽपि ताम् ।
कथयामास साप्येवमक्षरैः शोकगद्गदैः ॥४५॥
राज्ये त्वां बालकं न्यस्य तव कीर्त्तिधरः पिता ।
प्राव्राजीत्सोद्य भिक्षार्थं प्राविक्षदिह पत्तने ॥४६॥
तद्दर्शनात्त्वाप्यद्य व्रतग्रहणशङ्कया ।
निर्वासितः स ते माता दुःखेनानेन रोदिमि ॥४७॥
सुकोशलोऽपि तच्छ्रुत्वा गत्वा च पितुरन्तिके ।
बद्धाञ्जलिर्विरक्तात्मा तस्मात् व्रतमयाचत ॥४८॥
चित्रमाला च तत्पत्नी गुर्वीत्य सहमंत्रिभिः ।
उवाचा स्वामिकं स्वामिन्नराज्यन्त्यक्तुमर्हसि ॥४९॥
राजाप्यवोचद्गर्भस्थोपिहि सूनुर्मया तव ।
राज्येऽभिषिक्तोभाविन्यप्युपचारोहि भूतवत् ॥५०॥
इत्युक्त्वा सकलं लोकं सम्भाष्य पितुरन्तिके ।
सुकोशलः प्रवव्राज तपस्तेपे च दुस्तपम् ॥५१॥

निर्ममौ निःकषायौ तौ पिता पुत्रौ महामुनी।
विजह्रतुर्भुतावेव पावयन्तौ महीतलम् ॥५२॥
तनयस्य वियोगेन खेदभाक् सहदेव्यपि।
आर्त्तध्यानपरा मृत्वा व्याघ्रामभूद्गिरिगह्वरे ॥५३॥
इतश्च तौ कीर्त्तिधर सुकोशलमहामुनी।
प्रावृट्कालचतुर्मासी मत्येतुं दान्त मानसौ ॥५४॥
निःस्पृहौ शरीरेपि स्वाध्यायध्यानतत्परौ।
गिरेर्गुहायामेकस्य तस्थतुः सुस्थिताकृती ॥५५॥
सम्प्राप्ते कार्त्तिके मासि प्रयान्तौ पारणाय तौ।
दृष्टौ मार्गे तया व्याघ्रा यमदूत्येव दुष्टया ॥५६॥
सा व्याघ्री शीघ्रमभितो दधावे स्फारितानना।
दूरादभ्यागमस्तुल्यो दुर्हृदां सुहृदामपि ॥५७॥
आपतंत्यामपि व्याघ्रां तौ क्षमाश्रमणोत्तमौ॥
धर्मध्यानं प्रापदानौ कायोत्सर्गेण तस्थतुः ॥५८॥
सातु व्याघ्री विद्युदिव पपातादौ सुकोशले।
दूरापातप्रहारेण पृथ्व्यांच तमपातयत् ॥५९॥
चटच्चटिति च तच्चर्मदारं दारं नखाङ्कुशैः।
पापा सापादतृप्तासृक् वारीवमरुपान्थिका ॥६०॥
त्रोटयित्वात्रोटयित्वात्रटत्रटिति सादरौ।
जग्राह मांसमपिहि वालुङ्कमिव रङ्किका ॥६१॥

दन्तयंत्रातिथी चक्रे कर्कशा कीकशान्यपि ।
कटत्कटिति कुर्वन्तो सेक्षूनिव मतङ्गजी ॥ ६२॥
कर्मक्षयसहायेयमिति मत्वा मुनि र्नमः ।
विशेषतः स्वभूदुच्चावचरोमांच कंचुकः ॥ ६३॥
व्याध्रैवं खाद्यमानोपि शुक्लध्यानमुपेयिवान् ।
तत्कालात्केवलीभोच्च सुकोशलमुनि र्ययौ ॥ ६४॥
मुनिकीर्त्तिधरः सोपि समुत्पादितकेवलः ।
क्रमादासादयामास सुखाद्वैतास्पदं पदम् ॥ ६५॥
इतश्च चित्रमालापि सुकोशलनृपप्रिया ।
हिरण्यगर्भं सुषुवे नन्दनं कुलनन्दनम् ॥ ६६॥
आगर्भवासनृपते स्तस्य प्राप्तस्य यौवनम् ।
सधर्मवारिण्यभवन्मृगनेत्रा मृगावती ॥ ६७॥
राज्ञो हिरण्यगर्भस्य मृगावत्यामजायत ।
तनयो नघुषोनाम वपुषा स इवापरः ॥ ६८॥
हिरण्यगर्भः स्वेपश्यन्मौलौ पलितमन्यदा ।
तृतीयवयसः सत्यं काराभमुपसर्पतः ॥ ६९॥
तदैव जातवैराग्यः स राजा नघुषं सुतम् ।
स्वेराज्येन्यस्य विमलमुन्यन्ते व्रतमग्रहीत् ॥ ७०॥
नघुषस्य नृसिंहस्य सिंहिकानाम पत्न्यभूत् ।
तया च रममाणः स पैतृकं राज्यमन्वशात् ॥ ७१॥

उत्तरापथभूपाला नघुषो जेतु मन्यदा।
जगाम सिंहिकां देवीं निजराज्ये मुमोच च ॥७२॥
नास्तीह नघुष इति दक्षिणापथ भूभुजः।
तदा योध्यां रुरुधिरे च्छलनिष्टाहि वैरिणः ॥७३॥
तदा च सिंहिका देवी पुम्बत्तानभ्यषेणयत्।
जिगायानाशयच्चाशु किं सिंहो हन्ति न द्विपान् ॥७४
जितोत्तरापथो राजा नघुषश्चागतोन्यदा।
सुश्राव जयोदन्तं पत्न्यादध्याविदन्व सः ॥७५॥
खष्टधार्ष्टमिदं कर्म दुःकरं मादृशामपि।
महाकुलप्रसूतानां महिलानां न युज्यते ॥७६॥
तन्नूनमसती सेयं सत्योहि पतिदेवताः।
पतिसेवां विना नान्यज्जानते केदृशं पुनः॥७७॥
इति चेतसि निश्चित्य सिंहिकां प्रेयसीमपि।
राजा परिजहाराशु न्यंगितप्रतिमामिव ॥७८॥
नघुषस्यान्यदा दाहज्वारः समुदपद्यत।
दुष्टारिवन्नवाऽशाम्यदुपचारशतैरपि ॥७९॥
स्वसतीत्वं ज्ञापनाय भर्तुरर्त्तिच्छिदेपि च।
तत्समीपं तदेयाय तोयमादाय सिंहिका ॥८०॥
सासती श्रावणोचक्रे त्वां बिना नाथ चेन्मया।
पुनान्नैच्छि कदाप्यन्यो ज्वारस्तदपयातु ते ॥८१॥

ततश्च साम्भसा तेनाभिषिषेच निजं पतिम्।
तदैव सज्वरोन्मुक्तः सुधाधौत इवाभवत्॥८२॥
सिंहिकाया उपरिष्टात्पुष्पवृष्टिं सुराव्यधुः।
राजापि बहुमेने तां ततः प्रभृति पूर्ववत्॥८३॥
काले गच्छति यत्ने च नघुषस्य महीपतेः।
सिंहिकायां महादेव्यां सौदासो नाम नन्दनः॥८४॥
सौदासेराज्यमारोप्याऽग्रहीद्यु र्नघुषो नृपः।
एकमौपयिकं सिद्धः परिव्रज्यामुपाददे॥८५॥
सौदासनृपते राज्येऽर्हतामष्टाह्निकोत्सवे।
मन्त्रिणो घोषयामासुरमारिं पूर्वराज्यवत्॥८६॥
सौदासमपि ते प्रोचुरर्हदष्टाह्निकोत्सवे।
नाखादि मांसं त्वत्पूर्व्वैः खादीस्त्वमपि मास्म तत्॥८७
सौदासोप्यवदत्सूदं सदा मांसादन प्रियः।
प्रच्छन्नं मांसमानेयं त्वयावश्यमतः परम्॥८८॥
सूदोप्यमार्यां घुष्टायां मासं न प्राप कुत्रचित्।
नह्यसत्प्राप्यते क्वापि केनाप्याकाशपुष्पवत्॥८९॥
मांसाप्राप्तिरित इतो राजाज्ञा वाधते च माम्।
किङ्करोमीति विमृशन् सूदापश्यन्मृतार्भकम्॥९०॥
मृतार्भकस्य तस्यैवादाय मांसं स वल्लवः।
संस्कृत्य तैस्तैर्विज्ञानैः सौदासायाददौ तदा॥९१॥

सौदासोपिहि तन्मांसमश्नन्नेवमवर्णयत् ।
अहो अमुष्यमांसस्य कोऽप्यतिप्रीणकोरसः ॥८२॥
सूपकारञ्च पप्रच्छ मन्मापूर्व्वमिदं मम ।
कस्य जीवविशेषस्य मांसमाख्याहि सर्व्वथा ॥८३॥
नृमांसमिति सोप्याख्यद्राजावोच ददतः परम् ।
अथैव दद्याः संस्कृत्य प्रत्यहं नृपलं मम ॥८४॥
डिम्भान्सूदोप्यथाहार्षीत्तदर्थं प्रत्यहं पुरे ।
नहि भीराज्ञया राज्ञामन्यायकरणेपि हि ॥८५॥
इति दारुणकर्माणं नृपं विज्ञाय मन्त्रिणः ।
धृत्वाऽत्यजन्नरण्यान्तर्गृहोत्पन्नमिवोरगम् ॥८६॥
तैश्च सौदाससूनुः सिंहरथोराज्येऽभ्यषिच्यत ।
सौदासोप्याट वसुधां मांसं खादन्निरर्गलः ॥८७॥
सौदासेनापि चान्येद्युर्भ्रमता दक्षिणापथे ।
महर्षिः कोपि ददृशे सोथ धर्ममपृच्छ्यत ॥८८॥
बोधार्हति तं ज्ञात्वा जगौ तस्मै महामुनिः ।
मद्यमांसपरीहारं प्रधानं धर्ममार्हतम् ॥८९॥
सौदासोपि हि तं धर्ममाकर्ण्य चकितोऽभवत् ।
प्रसन्नहृदयो भूत्वा श्रावकः परमोऽभवत् ॥१००॥
इतो महापुरपुरे कोप्यपुत्रो नृपो मृतः ।
पञ्चदिव्याभिषिक्तोऽथ सौदासस्तत्र राड्भूत् ॥१॥

सौदासः प्राह्णिणोहृतमथ सिंहरथं प्रति।
सौदासस्य कुरुष्वाज्ञामिति दूतोप्युवाच तम्॥२॥
दूतः सिंहरथेनोच्चैः तिरस्कृत्य विसृज्यत।
आगत्याख्यच्च सौदासमभुजे तद्यथा तथम्॥३॥
सौदासोथ सिंहरथं सोपि सौदासपार्थिवम्।
अभ्यषेणयतां योद्धुं युयुधाते च तौ पथि॥४॥
सौदासोपि सिंहरथं जित्वा जग्राह पाणिना।
तस्मै राज्यद्वयं चादात्प्रवव्राज स्वयं पुनः॥५॥
सूनुः सिंहरथस्याभूद्राजा ब्रह्मरथस्ततः।
चतुर्मुख स्ततो हेम रथः शतरथ स्ततः॥६॥
अथोदयपृथुर्वारि रथ इन्दुरथ स्ततः।
आदित्यरथमान्धातृ वीरसेना स्ततः क्रमात्॥७॥
प्रतिमन्युनृपस्तस्मात्प्रतिबन्धुनृप स्ततः।
रविमन्युनृपस्तस्माद्वसन्ततिलक स्ततः॥८॥
कुवेरदत्तोऽथ कुंथुसरभ द्विरदाः क्रमात्।
ततश्च सिंहदशनो हिरण्यकसिपु स्ततः॥९॥
पुञ्जस्थलः ककुस्थोऽथ रघुरेवं नृपेषु तु।
केषु चिन्मोक्षमाप्तेपु स्वर्गमाप्तेषु केषु चित्॥१०॥
अनरण्यो नाम राजा शरण्यः शरणार्थिनाम्।
आनृण्यकृत्प्रणयिनामभूत्साकेतपत्तने॥११॥

तस्यामूतामुभौ पुत्रौ पृथ्वीदेव्यास्च कुक्षिजौ ।
एकोनन्तरथो नाम्ना तथा दशरथोऽपरः ॥१२॥
इतोऽनरण्यस्य सुहृत्सहस्रकिरणो नृपः ।
रावणेन जितो युद्धे वैराग्याद्व्रतमाददे ॥ १३॥
तत्सख्यादनरण्योपि श्रियं न्यस्य लघौ सुते ।
मासजातेऽनन्तरथ सहितो व्रतमाददे ॥१४॥
अनरण्योऽगमन् मोक्षमथानन्तरथो मुनिः ।
तप्यमानस्तपस्तीव्रं विजहार वसुन्धराम् ॥१५॥
राज्यस्थक्षीरकंठोपि राजा दशरथोप्यथ ।
वयसा विक्रमेणेव वृद्धिमासादयत्क्रमात् ॥१६॥
राजा राजसु सोऽराजतद्विजराज इवोडुषु ।
ग्रहेष्विव ग्रहराजः सुमेरुः पर्व्वतेष्विव ॥१७॥
तत्र स्वामिनि लोकस्य परचक्रादि सम्भवः ।
अदृष्टपूर्व एवासीत् खपुष्पवदुपद्रवः ॥१८॥
सवित्ताभरणादीने यथेच्छं ददर्थिनाम् ।
कल्पद्रुमेभ्यो मद्याङ्गादिभ्य एकादशो भवत् ॥१९॥
निजवंशक्रमायातं तत्साम्राज्यमिवानघम् ।
सन्दधावार्हतं धर्म्मं सर्वदाप्य प्रमद्वरः ॥२०॥
दर्भास्थलपुरेशस्य सुकोशलमहीपतेः ।
कन्यां पवित्रामम्रतप्रभाकुक्षिसमुद्भवाम् ॥२१॥

नाम्नापराजितां चारु रूपलावण्यशालिनीम् ।
उदुवाह स भूपालो जयश्रियमिवाहवे ॥२२॥ यु०॥
सबन्धु तिलकस्याथ पुरे कमलसङ्कुले ।
मित्राद्देवीकुक्षिजातां कैकेयीमाद्नामतः ॥२३॥
मित्राभूः सुशीला चेति सुमित्रेत्यपराभिधाम् ।
पर्य्यणैषीद्दशरथः शशाङ्क इव रोहिणीम् ॥२४॥ यु०॥
पुण्यलावण्यसौन्दर्य्यवर्य्यांगो सुप्रभाभिधाम् ।
अन्यामप्युपयेमे स राजपुत्रीमनिन्दिताम् ॥२५॥
सुखं वैषयिकं ताभिर्बुभुजे भूभुजाम्बरः ।
अबाधमानो धर्मार्थौ सविवेक शिरोमणिः ॥२६॥
इतश्च भरतस्याद्ध भुञ्जानो दशकन्धरः ।
सभायास्थितोऽप्रच्छदिति नैमित्तिकोत्तमम् ॥२७॥
अमरा अपिनाम्नैवामरा न परमार्थतः ।
भाव्यवश्यन्तु सर्व्वस्य मृत्युः संसारवर्त्तिनः ॥२८॥
तत् किं मे स्वपरीणामाद्विपत्तिः परतोऽथवा ।
तन्ममाचक्ष्व निःशङ्कमाप्ताहि स्फुटभाषिणः ॥२९॥
सोऽप्याचख्यौ भविष्यन्त्या जानक्याः कारणेनते ।
भविष्यतो दशरथपुत्रान्मृत्युः सत्यं भविष्यति ॥३०॥
विभीषणो बभाषेथ यद्यप्यस्य सदा ऋतम् ।
वचस्तथापि ह्यनृती करिष्यामि तदाप्यहम् ॥३१॥

जनकं दशरथञ्च कन्यातनययो स्तयोः।
अनर्थयो र्वीजभूतं हनिष्यामि स्तुनः शिवम् ॥३२॥
उत्पत्तिरेवहि तयोर्न्निषिद्धा बोजनाशतः।
वचो नैमित्तकस्यातो मिथ्यैव हि भविष्यति ॥३३॥
ओमित्युक्तो रावणेन स्ववेश्मागाद्बिभीषणः।
तत्रस्थो नारदस्तञ्च श्रुत्वा दशरथं ययौ ॥३॥
तं देवर्षिं दशरथोऽभ्युत्तस्थौ दूरतोपि हि।
नमस्कृत्यासयामास गुरुवद्गौरवेण च ॥३५॥
त्वमायासीः कुतस्थानात्पृष्ट स्तेनेति नारदः।
आख्यत्पूर्वं विदेहेषु गतोऽहं पुण्डरीकिणीं ॥३६॥
श्रीसीमन्धरनाथस्य द्रष्टुं निष्क्रमणोत्सवम्।
सुरासुरकृतं तं च दृष्ट्वा मेरुमगामहम् ॥३७॥
तत्राभिवन्द्यतीर्थेशान् लङ्कायां गतवानहम्।
तस्यां शान्ति गृहे शान्तिं नत्वागां रावणालयम्॥३८
रावणस्य बधस्तत्र जानक्यर्थे त्वदात्मजात्।
निमित्तकेन केनापि कथ्यमानः श्रुतो मया ॥३९॥
श्रुत्वा विभीषणस्तञ्च हन्तुं त्वां जनकं तथा।
कृतप्रतिज्ञो न चिरादिहेष्यति महाभुजः ॥४०॥
एतत्सर्वं परिज्ञाय लङ्कापुर्याः ससंभ्रमः।
साधर्मिक इति प्रीत्या तव शंसितुमागमम् ॥४१॥

तच्छ्रुत्वा भूभुजाभ्यर्थ्य विसृष्टो नारदो द्रुतम् ।
तथैव कथयामास जनकायापि भूभुजे ॥४२॥
मन्त्रिणां तत्समाख्याय राजा राज्यं समर्प्य च ।
निर्ययौ योगविदिव चिकीर्षुः कालवञ्चनाम् ॥४३॥
मूर्त्तिं दाशरथीं लेप्यमयीमन्तर्न्यपालयम् ।
न्यधुश्च मन्त्रिणो ध्वान्ते विद्विषन्मोहहेतवे ॥४४॥
जनकोऽपि तथा चक्रे तथा तन्मन्त्रिणोऽपि हि ।
तौ त्वलक्ष्यौ दशरथजनकौ भ्रमतुर्महीम् ॥४५॥
विभीषणश्च संरम्भादेत्य सन्तमसेऽसिना ।
लेप्यमय्या दशरथमूर्त्तेश्चिच्छेद मस्तकम् ॥४६॥
जज्ञे कलकलस्तत्र नगरे सकलेऽपि हि ।
आक्रन्दध्वनिरुत्तस्थावन्तरन्तःपुरं महान् ॥४७॥
सन्नह्य समधावन्त सामन्ताः साङ्गरक्षकाः ।
विदधुर्मृतकार्याणि गूढमन्त्राश्च मन्त्रिणः ॥४८॥
मृतं दशरथं ज्ञात्वा ययौ लङ्कां विभीषणः ।
अकिञ्चित्करमेकन्तु नावधीन्मिथिलेश्वरम् ॥४९॥
मिथश्च मैथिलैक्ष्वाकौ भ्राम्यन्तौ मिलिताबुभौ ।
एकावस्थौ सुहृदौ तावुत्तरापथमीयतुः ॥५०॥
राज्ञः शुभमते स्तत्र पुरे कौतुकमङ्गले ।
दुहितुः कैकयीनाम्न्याः पृथ्वी श्रीकुक्षिजन्मनः ॥५१॥

द्रोणमेवसहोदर्य्याद्वा सप्ततिकलानिधेः।
तौ स्वयम्बरमाकर्ण्य तन्मण्डपमुपेयतुः ॥५२॥
हरिवाहनमुख्यानान्तौ मध्ये पृथिवीभुजाम्।
हंसाविवाब्धिपाथोज मधिमञ्चं निषेदतुः ॥५३॥
कैकेयीकन्यकारत्नं रत्नालङ्कारभूषिता।
साक्षाल्लक्ष्मीरिवाभ्यागात्तं स्वयम्बरमण्डपम् ॥५४॥
दत्तहस्ता प्रतीहार्य्या पश्यन्ती सा नृपान् क्रमात्।
नक्षत्राणीन्दुलेखेव व्यतिचक्राम भूयसः ॥५५॥
क्रमेण सा दशरथं प्राप गङ्गेव सागरम्।
तस्थौ तत्रैव निर्मुक्तनांगरा नौरिवाम्भसि ॥५६॥
सद्यो रोमाञ्चिततनुः कैकेय्यतनुसम्पदा।
तत्रार्च्चिपद्दरमालां निजां भुजलतामिव ॥५७॥
हरिवाहणमुख्याश्च नृपान्यक्तमानिनः।
मानिनो जज्वलुः कोपाज्ज्वलज्ज्वलनसन्निभाः ॥५८
अयं वराक एकाकी वव्रे कर्प्पटिकोऽनया।
आच्छिद्यमानामस्माभिरिमिकां वास्यते कथम् ॥५९
साटोपमिति जल्पन्तोऽनल्प स्वशिविरेषु ते।
गत्वा सम्बर्म्मयामासुः सर्व्वे सर्व्वात्मनापि हि ॥६०॥
महीपतिः शुभमतिः पक्षे दशरथस्य सः।
सन्ननाह महोत्साहः सेनया चतुरङ्गया ॥६१॥

कुरु प्रिये सारथित्वं यथा बध्नाम्यमून् द्विषः ।
इत्यवोचत कैकेयीं तदैकाकी हि राघवः ॥६२॥
कैकेयी रश्मिमादायाध्यारुरोह महारथम्
द्वासप्ततावपि कलास्वभिज्ञा साहि धीमती ॥५३॥
धन्वी निषङ्गी सन्नाही राजादशरथोऽपि तम् ।
अध्यास्त रथमेकोऽपि तृणवद्गणयन् परान् ॥६४॥
हरिवाहणमुख्यानां रथैर्निजरथं रथात् ।
प्रत्येकं युगपदिव त्वेका कैकेय्ययोजयत् ॥६५॥
शीघ्रवेधी दशरथोऽप्येकैकमपि तान् रथान् ।
अखण्डयदखण्डौजा आखण्डल इवापरः ॥६६॥
इत्थं विद्रावयामास सर्वानपि स भूपतीन् ।
उपयेमे च कैकेयीं जगतीमिव जङ्गमाम् ॥६७॥
उवाच च नवोढ़ां तां राजा दशरथो रथी ।
वरं याचस्व देवि त्वं सारथ्येनास्मि रञ्जितः ॥६८॥
याचिष्ये समये स्वामिन्न्यासीभूतोऽस्तु मे वरः ।
इत्यभाषत कैकेयी राजापि प्रत्यपादि तत् ॥६९॥
समं प्रियेव कैकेय्या परसैन्यैर्हठाहृतैः ।
असंख्यातपरीवारो राजा राजगृहं ययौ ॥७०॥
जगाम राजा जनकोऽप्यात्मीयां नगरीमथ ।
समयज्ञाहि धीमन्तो न तिष्ठन्ति यथा तथा ॥७१॥

राजा दशरथस्तत्र विजित्य मगधेश्वरम् ।
तत्रैवास्थान्नत्वयोध्यां शङ्कया तया ॥७२॥
तत्रापराजिता मुख्यमन्तःपुरमिलापतिः ।
निजमानाययामास राज्यं सर्वत्र दोश्मताम् ॥७३॥
राज्ञीभी रममाणो स्थात्पुरे तत्र चिरं नृपः ।
विशेषतः प्रीतये हि राज्ञां भूः स्वयमर्जिता ॥७४॥
अथापराजितान्येद्युर्गजसिंहेन्दुभास्करान् ।
स्वप्ने पश्यन्निशाशेषे बालजन्माभिसूचकान् ॥७५॥
ब्रह्मलोकात्परिच्युत्य तदा देवो महर्द्धिकः ।
कुक्षावशातरत्तस्याः पुष्करिण्यां मरालवत् ॥७६॥
नृपुण्डरीकं वर्णेन पुण्डरीकविडम्बनम् ।
सम्पूर्णलक्षणं सूनुं सुषुवेऽथाऽपराजिता ॥७७॥
प्रथमापत्यरत्नस्य तस्यास्यकमलेक्षणात् ।
राकेन्दुदर्शनादब्धिरिवाधिं मुमुदे नृपः ॥७८॥
नृपश्चिन्तामणिरिव ददौ दानं तदार्थिनाम् ।
लोकस्थितिरियं जाते नन्दने दानमक्षयम् ॥७९॥
महान्तमुत्सवं चक्रुस्तदा लोकास्तथा स्वयम् ।
यथाऽभूवन्नतिमुदो राज्ञो दशरथादपि ॥८०॥
नृपौकांसि सनाथानि दूर्वापुष्पफलादिभिः ।
निन्युः कल्याणपात्राणि पूर्णपात्राणि नागराः ॥८१॥

सर्वत्र कलगीतानि सर्वत्र घुसृणच्छटाः ।
सर्वत्र तोरणश्रेण्यो व्यधीयन्त तदा पुरि ॥८२॥
अचिन्तितोपनीतानि प्राभृतानि महीभृताम् ।
तदा राज्ञे समाजग्मु स्तस्य सूनोः प्रभावतः ॥८३॥
पद्मानिवासपद्मस्य पद्म इत्यभिधां नृपः ।
सूनोस्तस्याऽकरोत्सोभूत्प्रथितो राम इत्यपि ॥८४॥
गजसिंहार्कचन्द्राग्निश्रीसमुद्रान्निशात्यये ।
स्वप्नेऽपश्यत्सुमित्रापि विष्णुजन्माभिसूचकान् ॥८५॥
देवलोकात्परिच्युत्य तदा देवो महर्द्धिकः ।
तदा देव्याः सुमित्राया उदरे समवातरत् ॥८६॥
समये प्राप्तवत्सोदृवर्णं संपूर्णलक्षणम् ।
सुमित्रापि जगन्मित्रं पुत्ररत्नमजीजनत् ॥८७॥
पुरचैत्येषु सर्व्वेषु श्रीमतामर्हतां तदा ।
विशेषेणाष्टधा पूजां स्नात्रपूर्वं व्यधान्नृपः ॥८८॥
नृपतिर्मोचयामास धृतान् वन्दिरिपूनपि ।
कोवा न जीवति सुखं पुरुषोत्तमजन्मनि ॥८९॥
सोच्छ्वास सप्रजोराजा न केवलमभूत्तदा ।
वसुमत्यपि देवी द्रागुच्छ्वासं प्रत्यपद्यत ॥९०॥
रामजन्मनि भूपालो यथा कृतमहोत्सवम् ।
तथा तमधिकं चक्रे हर्षे कोनाम तृप्यति ॥९१॥

नाम नारायण इति विदधे तस्य पार्थिवः ।
सलक्ष्मण इति ख्यातोऽपरनाम्ना च भुव्यभूत् ॥९२॥
तौ द्वावपि पितुः कूर्च्चकचाकर्षणशिष्यकम् ।
विशिष्टं प्रापतुर्बाल्यं क्रमेण क्षीरपायिणौ ॥९३॥
धात्रीभिर्लाल्यमानौ तावपश्यत्परयामुदा ।
मुहुर्मुहुर्महीपालः स्वदोर्दण्डाविवापरौ ॥९४॥
सञ्चेरतुरनेकेषामङ्कादङ्कं महीभुजाम् ।
तेषामङ्गेषु वर्षन्तौ तौ स्पर्शेन सुधामिव ॥९५॥
क्रमेण तौ वर्द्धमानौ नीलपीताम्बरौ सदा ।
विजह्रतुः पादपातैः कम्पयन्तौ महीतलम् ॥९६॥
कलयामासतु स्तौतुक्रमेण सकलाः कलाः ।
साक्षीकृतकलाचार्य्यौ पुण्यराशी इवाङ्गिनौ ॥९७॥
लीलामुष्टिप्रहारेण हिमकर्परलीलया ।
दलयामासतुस्तौ च गिरीनपि महौजसौ ॥९८॥
श्रमस्थानेपि हि तयोरधिज्यीकृतचापयोः ।
च कम्पे तपनोप्युच्चैः स्तस्थौ वेधाभिशङ्कया ॥९९॥
तृणायमन्यमानौ तौ दोः स्थाम्नापि द्विषां बलम् ।
कौतुकायेव मेनाते शस्त्रकौशलमात्मनः ॥१००॥
शस्त्रास्त्रकौशलेनोच्चैः दोः स्थाम्नाच तयोर्नृपः ।
अपि देवासुरादीनां स्वमजय्यममन्यत ॥१॥

अन्यदा धैर्य्यमालव्यविक्रमेण कुमारयोः ।
इक्ष्वाकुणां राजधानीमयोध्यां नृपतिर्य्ययौ ॥ २ ॥
अभ्रात्यय इवादित्यो दुर्दर्शातिक्रमे भृशम् ।
द्योतमानः प्रतापेन महीं दशरथोऽन्वशात् ॥ ३ ॥
तत्रान्तरेद्युः कैकेयी शुभस्वप्नाभिसूचितम् ।
असूत भरतं नाम सुतं भरतभूषणम् ॥ ४ ॥
शत्रुघ्नमभिधानेन शत्रुघ्नभुजविक्रमम् ।
अजीजनत्सुप्रभापि नन्दनं कुलनन्दनम् ॥ ५ ॥
स्नेहाद्भरतशत्रुघ्नाववियुक्तौ दिवानिशम् ।
बलदेववासुदेवावभातामपराविव ॥ ६ ॥
रेजे राजा दशरथश्चतुर्भिरपि तैः सुतैः ।
गजदन्ताकृतिनगैरिव मेरुर्महीधरः ॥ ७ ॥
इतश्च जम्बूद्वीपेऽस्मिन् क्षेत्रे चात्रैव भारते ।
दारुग्रामे वसुभूतिरितिनाम्नाऽभवद्द्विजः ॥ ८ ॥
पत्न्यां तस्यानुकोशायामतिभूतिरभूत्सुतः ।
अतिभूतेरपि पत्नी बभूव सरसाभिधा ॥ ९ ॥
कयाननाम्ना विप्रेण जातरागेण सैकदा ।
अपजह्रे च्छलेनाशु किं न कुर्य्यात्स्मरातुरः ॥ १० ॥
तामन्वेष्टुं महीमटति भूतिर्भूतवद्भृशम् ।
सुतस्नुषार्थेऽनुकोशावसुभूती प्रचेरतुः ॥ ११ ॥

सुतस्नुषे अपश्यन्तौ पर्य्यटन्तावथाऽन्यदा।
एकं ददृशतुः साधुं ववन्दाते च भक्तितः॥१२॥
श्रुतधर्मौ च तत्पार्श्वे तौ द्वौ जगृहतुर्व्रतम्।
गुर्वादिष्टानुकोशागमादार्य्यिकां कमलश्रियम्॥१३॥
तौ विपद्यच सौधर्मे कल्पे देवौ बभूवतुः।
व्रते ह्येकाहमात्रेपि न स्वर्गादन्यतो गतिः॥१४॥
वसुभूतिः ततः श्रुत्वाऽत्रैव वैताढ्यपर्व्वते।
रथनूपुरनाथोऽभून्नाम्ना चन्द्रगतिर्नृपः॥१५॥
ततः श्रुत्वाऽनुकोशापि तस्य विद्याधरप्रभोः।
अभूत्पुष्पवतीनाम भार्य्यार्य्येचरिता सती॥१६॥
तदा च सापि सरसा काममपि प्रेक्ष्य संयताम्।
प्रव्रज्य मृत्वा चेशाने देवी समुदपद्यत॥१७॥
सरसाविरहादार्त्तोऽतिभूतिश्च विपद्य सः।
चिरं भ्रान्त्वा च संसारं हंसपोतः कदाप्यभूत्॥१८॥
भक्ष्यमाणोन्यदा श्येनेनोपसाधु पपातसः।
कण्ठस्थासौ नमस्कारं तस्य साधुर्ददौ च सः॥१९॥
विपन्नः स नमस्कारप्रभावेणाति भूयसा।
दशवर्षसहस्रायुः किंनरेषु सुरोऽभवत्॥२०॥
च्युत्वापुरे विदग्धे स प्रकाशः सिंहभूपतेः।
सुतोऽभूत्प्रवरावल्यां पत्न्यां कुण्डलमण्डितः॥२१॥

भोगासक्तः कयानोऽपि चिरं भ्रान्त्वा भवाटवीम्।
पुरे चक्रपुरे चक्रध्वजराजपुरोधसः ॥२२॥
धूमकेशाभिधानस्य स्वाहा नाम्न्यामजायत।
सूनुः सधर्मचारिण्यां नामधेयेन पिङ्गलः ॥२३॥
राज्ञश्चक्रध्वजस्याऽतिसुन्दरीनामया सह।
पुत्र्या पपाठैकगुरो रन्तिके स च पिङ्गलः ॥२४॥
कालेन गच्छता जाते त्वनुरागे परस्परम्।
तां छलात्पिङ्गलोहृत्वा विदग्धे नगरे ययौ ॥२५॥
विज्ञानरहितस्तत्र तृणकाष्ठादि विक्रयात्।
आत्मानमाजिजीव स निर्गुणस्योचितं ह्यदः ॥२६॥
तां चातिसुन्दरीं तत्राद्राक्षीत्कुण्डलमण्डितः।
अन्योन्यमनुरागश्च तत्कालमभवत्तयोः ॥२७॥
अपजह्रे च तां राज पुत्रः कुण्डलमण्डितः।
पितुर्भिया दुर्गदेशे पल्लीं कृत्वा च सुस्थितः ॥२८॥
विरहाच्चातिसुन्दर्य्या उन्मत्त इव पिङ्गलः।
क्ष्मां भ्रमन्नेकदाचार्य्यमार्य्यगुप्ताख्यमैक्षत ॥३०॥
श्रुत्वा धर्मञ्च तत्पार्श्वे व्रतं जग्राह पिङ्गलः।
परं प्रेमातिसुन्दर्य्यां न मुमोच कदाचन ॥३१॥
पल्लीस्थितो दशरथभुवं कुण्डलमण्डितः।
सर्वदा लुण्टयामास सारमेय इवच्छलात् ॥३२॥

सामन्तोबालचन्द्राख्य स्त्राता दशरथाज्ञया ।
प्रदाय सौप्तिकं वध्वा तमानैषीत्तदन्तिके ॥३२॥
कालेन तं दशरथोऽमुचत् कुण्डलमण्डितम् ।
कोपः साम्यति महतां दीने क्षीणेश्वरावपि ॥३३॥
पितृराज्याय स भ्राम्यन्महीं कुण्डलमण्डितः ।
मुनिचन्द्रान्मुनेर्द्धर्ममाकर्ण्य श्रावकोऽभवत् ॥३४॥
राज्येच्छुरेव मृत्वा स मिथिलायां महापुरि ।
गर्भे जनकभार्य्याया वैदेहायाः सुतोऽभवत् ॥३५॥
सरसापि भवं भ्रान्त्वा पुरोहितसुताऽभवत् ।
नाम्ना वेगवती तत्र प्रव्रज्य च विपद्य च ॥३६॥
ब्रह्मलोके गमश्युत्वा विदेहाया स्तदोदरे ।
कुण्डलमण्डितजीवयुगमत्वेन सुताभवत् ॥३७॥
विदेहा समयेऽसूत युगपत्पुत्रकन्यके ।
मृत्वा तदा पिङ्गलर्षिः सौधर्मेश्विदशोभवत् ॥३८॥
प्राग्जन्मावधिनापश्यन् द्विषं कुण्डलमण्डितम् ।
तदा जनकपुत्रत्वेनोत्पन्नः स उदीक्षतः ॥३९॥
स प्राग्वैरात् ज्ञातरोषो जातमात्रं जहार तम् ।
दध्यौ च किं निहन्म्येनमास्फाल्याशु शिलातले॥४०॥
अथवा यद्भवे पूर्वे दुःकर्माचरितं मया ।
फलं तस्यापि भूयः स्तु भवेष्वन्वभवं चिरम् ॥४१॥

दैवात् श्रामण्यमासाद्य प्राप्तोऽहमियतीं भुवम् ।
हत्वा भ्रूणममुं भूयः स्यामनन्तभवः कथम् ॥४२॥
इत्थं विमृश्य स सुरो भूषणैः कुण्डलादिभिः ।
भूषयित्वा च तं बालं पतज्ज्योतिर्भ्रमप्रदम् ॥४३॥
वैताढ्यदक्षिणश्रेणौ रथनूपुरपत्तने ।
शनकैर्नन्दनोद्याने तूलिकायामिवामुचत् ॥४४॥
किमेतदिति संभ्रान्तो दृष्ट्वा चन्द्रगतिस्ततम् ।
तन्निपातानुसारेण नन्दनोपवनं ययौ ॥४५॥
ददर्श तत्र तं बालं दिव्यालङ्कारभूषितम् ।
विद्याधरेन्द्र. सोऽपुत्रः पुत्रीयन्नाददे स्वयम् ॥३६॥
प्रेयस्याः पुष्पवत्याश्चार्पयामास तमर्भकम् ।
देव्यद्य सुषुवे पुत्रमिति चाघोषयत्पुरि ॥४७॥
उच्चै र्जन्मोत्सवं तस्य राजा पौराश्च चक्रिरे ।
सभामंडलसम्बन्धान्नाम्ना भामंडलोऽभवत् ॥४८॥
पुष्पवतीचन्द्रगत्यो र्नेत्रकैरवचन्द्रमाः ।
सुवर्द्धितुं प्रवृत्ते खेचरीकरलालितः ॥४९॥
इतश्चापहृते पुत्रे विदेहा करुणस्वरा ।
रुदती पातयामास बन्धून् शोकमहार्णवे ॥५०॥
जनको न्वेषयामास प्रेष्य प्रतिदिशं नरान् ।
तत्प्रवृत्तिं पुनः क्वापि न प्राप सुचिरादपि ॥५१॥

अनेकगुणसम्पन्नां प्ररोहोऽवेति मैथिलः ।
दुहितुर्युग्मजातायाः सीतेति विदधेऽभिधाम् ॥५२॥
कालेन गच्छता शोकस्तयोर्मन्दी वभूव च ।
शोकहर्षश्च संसारे नरमायाति याति च ॥५३॥
सीता च वहृधे सार्द्धं रूपलावण्यसम्पदा ।
इन्दुलेखेव शनकैः कलापूर्णा बभूव च ॥५४॥
क्रमादुद्यौवना पुण्य लावण्यलहरी सरित् ।
सरित्पतितनूजेव साऽलक्षि कमलेक्षणा ॥५५॥
अनुरूपोवरः कोस्याभवितेति दिवानिशम् ।
अचिन्तयत्तज्जनको जनकः पृथिवीपतिः ॥५६॥
राज्ञां कुमारान् प्रत्येकं स वीक्ष्य चरचक्षुषा ।
व्यचारयन्महामात्यै नं कोपि रुरुचे पुनः ॥५७॥
तदार्द्धबर्वरे स्यातरङ्गतमादिपार्थिवैः ।
दैत्यकल्पैरनल्पैर्भूर्जनकस्योपदुद्रुवे ॥५८॥
तेषां रोधाय कल्पान्तवार्द्धिधारामिवाक्षमः ।
दूतं दशरथाहूत्यै प्राहिणोन्मिथिलेश्वरः ॥५९॥
ऐक्ष्वाको दूतमायातं तमाहूय ससंभ्रमम् ।
सप्रसादं निषाद्याग्रे जगादैवं महामनाः ॥६०॥
तस्यास्मत् सुहृदो दूत स्थितस्यापि त्वद् गमात् ।
मन्ये सौहार्दमचिन्तं मर्यादाविव वारिधेः ॥६१॥

कच्चिद्राष्ट्रे पुरे गोत्रे सैन्ये स्वाङ्गेन्यतोऽपि च ।
कुशलं मिथिलाभर्त्तुर्ब्रूह्यागमनकारणम् ॥६२॥
दूतोऽप्यवादीन्मद्भर्त्तुः स स्वतत्प्राप्तेष्वनेकशः ।
सुहृद्हृदयमात्मा वां त्वमेवासि महाभुजः ॥६३॥
जनकस्य सुखैर्दुःखैर्यत्सदा गृह्यसे ततः ।
विधुरेऽद्य स्मृतः स्तेन त्वं यथा कुलदेवता ॥६४॥
वैताढ्याद्रे र्दक्षिणतः कैलाशस्योत्तरेण च ।
सन्त्यनार्य्यजनपदा भूयांसो भीषणप्रजाः ॥६५॥
तेषु र्बर्बरोनाम देशोबर्बरकूलवत् ।
विद्यते दारुणाचारैर्नरैरत्यन्तदारुणः ॥६६॥
मयूरमालानगरे तस्य देशस्य भूषणे ।
आतरङ्गतमोनाम म्लेच्छराजोऽस्ति दारुणः ॥६७॥
शुकमङ्कनकाम्बोजप्रभृतीन्विषयानपि ।
भुञ्जते तनया स्तस्य नृपीभूय सहस्रशः ॥६८॥
इदानीमातरङ्गस्तैः परितः परिवारितः ।
अक्षय्याक्षौहिणीनाथैरभाङ्क्षीज्जनकक्षितिम् ॥६९॥
प्रतिस्थानञ्च चैत्यानि बभञ्जु स्ते दुराशयाः ।
तेषां ह्याजन्मसम्पद्भ्योऽप्यभीष्टो धर्मविप्लवः ॥७०॥
अनारतमभीष्टस्य धर्मस्य जनकस्य च ।
तत् कुरुष्व परित्राणं प्राणभूतस्तयोरसि ॥७१॥

आकर्ण्यैवं दशरथो यात्राभेरीमवादयत् ।
सन्तः सतां परित्राणे विलम्बन्ते न जातुचित् ॥७२॥
रामोऽथोचे दशरथं म्लेच्छोच्छेदाय चेत्स्वयम् ।
ततो यास्यति तद्रामः सानुजः किं करिष्यति ॥७३॥
पुत्रस्नेहाच्च तातेनाऽक्षमो वा तर्कितोऽस्म्यहम् ।
आभरताज्जन्मसिद्धं नन्विक्ष्वाकुषु पौरुषम् ॥७४॥
प्रसीद विरम म्लेच्छानुच्छेत्तुं मां समादिश ।
अचिराच्छ्रोष्यसि स्वामिन् जयवार्त्तां स्वजन्मनः ॥७५
इत्थं कथंचिद्राजानमनुज्ञाप्य सहानुजः ।
सेनापरिवृतो रामो जगाम मिथिलां पुरीम् ॥७६॥
चमूरुद्वीपिसार्दूलसिंहानिव महावने ।
पुरीपुरःसरेद्राक्षीद्रामोम्लेच्छमहाभटान् ॥७७॥
रणकण्डूलदोर्दण्डाम्लेच्छास्तेजितकाशिनः ।
रामं द्रुतमुपद्रोतुं प्रावर्त्तन्त महौजसः ॥७८॥
युगपद्रामसैन्यं तैरस्त्रैरन्धीकृतं क्षणात् ।
महावातैरिवोद्भ्रान्तैर्जगदुत्क्षिप्तरेणुभिः ॥७९॥
जितमासिषु सैन्येषु परेषु जयमानिषु ।
हतमानिनिजनके लोके संहृतमानिनि ॥८०॥
रामोहसितमानी स्वमधिज्यं विदधे धनुः ।
अवादयच्च तन्मौर्वीं रणनाटकडिण्डिमम् ॥८१॥

भ्रूभङ्गमप्यकुर्व्वाणो गीर्व्वाण इव भूगतः ।
रामस्तान् कोटिशोऽप्यस्त्रैर्व्व्याधव्याधवन्मृगान् ॥८२॥
अयं वराकोजनकस्तत्सैन्यं मशकोपमम् ।
तत्साहाय्यागतं सैन्यं दैन्यभागादितोऽप्यभूत् ॥८३॥
अरे कुत इमे वाणाश्छादयन्तो नभस्तलम् ।
पक्षिराजा इवायान्तीत्यन्योन्यमिति भाषिणः ॥८४॥
आतरङ्गादयोम्लेच्छाधिपाः कुपितविस्मिताः ।
कर्षन्तोऽस्त्राणि युगपत्प्रतिरामं डुढौकिरे ॥८५॥
दूरापाती दृढाघाती शीघ्रवेधी च राघवः ।
तान् म्लेच्छान् हेलयाभांक्षीच्छरभः कुञ्जरानिव ॥८६॥
म्लेच्छाः प्रणश्य ते जग्मुः काका इव दिशोदश ।
बभूव स्वस्थोजनको जनैर्जानपदैः समम् ॥८७॥
हृष्टोऽथ स्वसुतां सीतां रामाय जनको ददौ ।
इयं रामागमात्तस्य वरप्राप्तिर्जयोऽप्यभूत् ॥८८॥
तदा च जानकीरूपं जनादाकर्ण्य नारदः ।
तत्रागात्कौतुकाद्द्रष्टुं कन्यावेश्म विवेश च ॥८९॥
पिङ्गकेशं पिङ्गनेत्रं तुन्दिलं छत्रिकाधरम् ।
दण्डपाणिं सकौपीनमपीनाङ्गं स्फुरच्छिखम् ॥९०॥
भीषणं नारदं प्रेक्ष्य भीता सीता सवेपथुः ।
हा मातरित्यारटन्ती गर्भाऽगारान्तरे विशत् ॥९१॥

कण्ठे शिखायां बाह्वोश्च धृत्वा तुमुलकारिभिः ।
दासिका द्वारपालाद्यैरुरुधे नारदस्ततः ॥६२॥
तेषां कलकलादेयुः शस्त्रिणो राजपूरुषाः ।
यमदूता इव क्रुद्धा हतैनमितिभाषिणः ॥६३॥
क्षुभितो नारदस्तेभ्यः स्वं विमोच्य कथञ्चन ।
ययावुत्पत्य वैताढ्यं तत्र चैवमचिन्तयत् ॥६४॥
व्याघ्रीभ्य इव गौर्जीवन् दासीभ्यो निरगाम्यहम् ।
दिष्ट्या प्राप्तोस्मि वैताढ्यं बहुविद्याधरेश्वरम् ॥६५॥
अस्तीह दक्षिणश्रेणौ चन्द्रगत्यात्मजो युवा ।
भामण्डलोनामदोष्मानाखण्डलपराक्रमः ॥६६॥
पटे लिखित्वा तत्सीतां दर्शयाम्यस्य येन ताम् ।
हठादपहरत्येष कृते प्रतिकरोम्यदः ॥६७॥
तथैव नारदः कृत्वा सीतारूपमदर्शयत् ।
भामण्डलकुमारस्या दृष्टपूर्वं जगत्त्रये ॥६८॥
सद्यो भामण्डलो भूतेनेवाक्रामि मनोभुवा ।
लेभे न जातुचिन्निद्रां बिन्ध्याकृष्ट इवद्विपः ॥६९॥
बुभुजे नहि भोज्यानि पेयान्यपि पपौ न सः ।
अवतस्थे च मौनेन योगीव ध्यानतत्परः ॥१००॥
तं तथा विधुरं प्रेक्ष्यावोचच्चन्द्रगतिर्नृपः ।
किमाधिर्बाधते कोपि त्वामथ व्याधिरुद्धतः ॥१॥

किमाज्ञा खण्डनं केनाप्यकारि भवतोऽथवा ।
अन्यद्वा ब्रूहि वत्स त्वं यत्ते दुःखस्य कारणम् ॥२॥
भामंडलकुमारोऽभूद्ह्रिया द्वेधाप्यवाङ्मुखः ।
गुरूणां तादृगाख्यातुं कुलीनाः कथं मीशते ॥३॥
ऊचुर्वयस्या अथ भामंडलस्यार्त्तिकारणम् ।
कामवान्नारदानीतपटालिखितयोषिति ॥४॥
वेश्मन्यानीय भक्त्याशु नारदं राजपुङ्गवः ।
कासाकस्यात्मजेत्यादि पप्रच्छ पटयोषितम् ॥५॥
आचख्यौ नारदोऽप्येवं विदेहाजजनकात्मजा ।
नामधेयेन सीता सा या मया दर्शिता पटे ॥६॥
यादृशी साऽस्ति रूपेण लिखितुं तादृशीं पुनः ।
नोऽभिज्ञोऽहं नचान्यो वा मूर्त्तालोकोत्तरैव सा ॥७॥
नामरीषु न नागीषु न गन्धर्वीषु तादृशम् ।
सीताया यादृशं रूपं काकथा मानवीषु च ॥८॥
यादृग् रूपं यथावस्थं विकर्त्तुन्नेश्वराः सुराः ।
नानुकर्त्तुं सुरनरा न च कर्त्तुं प्रजापतिः ॥
अस्या मधुरता काचिदाकृतौ वचनेपि च ।
कण्ठे च पाणिपादे च रक्तता काचिदुच्चकैः ॥१०॥
अथावती यथावस्थां यथा नालक्षितुं क्षमः ।
नालं तथा वक्तुमपि वक्ष्यतः परमार्थतः ॥११॥

योग्या भामण्डलस्येति विचार्य्य मनसा मया।
यथाप्रत्यं समालिख्य दर्शितेयं पटे नृप ॥१२॥
भविष्यति तवैवैषा पत्नी खिद्यस्व मा ततः।
इत्याश्वास्य सुतं राजा व्यसृजन्नारदं मुनिम् ॥१३॥
ततश्च चपलगतिं नाम विद्याधरं नृपः।
इत्यादिदेश जनकमपहृत्यानय द्रुतम् ॥१४॥
रजन्यां जनकं हृत्वाऽनुपलक्षित एव सः।
समानीयार्पयामास राज्ञश्चन्द्रगतेरथ ॥१५॥
जनकं बन्धुवत्स्नेहाद्रथनूपुरपार्थिवः।
समाश्लिष्याससयित्वा च ससौहार्दमदोऽवदत् ॥१६॥
लोकोत्तरगुणापूर्वा तव सीतेति विद्यते।
भामण्डलस्य मे सूनुरनूनोरूपसम्पदा ॥१७॥
द्वयोर्वधूवरत्वेन संयोगोऽस्तूचितोऽधुना।
सम्बन्धादावयोश्चापि मिथोभवतु सौहृदम् ॥१८॥
इत्यूचे जनको दत्ता रामाय स्वसुता मया।
कथमन्यस्य यच्छामि दीयन्ते कन्यकाः सकृत् ॥१९॥
अथ चन्द्रगतिः प्रोचे स्नेहद्विकृते मया।
आनीय याचितोऽसि त्वं तां ज्ञमोहर्तुमप्यहम् ॥२०॥
यद्यपि स्वसुता सीता त्वया रामाय कल्पिता।
तथापि न पराजित्य रामस्तां परिणेष्यति ॥२१॥

वज्रावर्त्तार्णवावर्त्ते धनुषो देवताऽज्ञया ।
सदा यच्च सहस्त्रैरधिष्ठिते दुःसहतेजसी ॥२२॥
पूज्ये ते नः सदा गोत्रं देवतावन्निकेतने ।
कृते भविष्यतो रामशार्ङ्गिणो स्तदृशूहाण ते ॥२३॥
आद्यामारोपयत्येकमपि दाशरथिः सचेत् ।
वयं जितास्तदा तेन स उद्वहतु ते सुताम् ॥२४॥
प्रतिज्ञामित्यनुग्राह्य बलादपि हि मैथिलम् ।
मिथिलायामनैषीत्स चापे तेच सनन्दनः ॥२५॥
मुमोच जनकं राजौकसि चन्द्रगतिर्नृपः ।
स्वयं तु सपरीवारोऽस्थात्सोत्पुर्या बहिर्भुवि ॥२६॥
आचख्यौ जनक स्तच्च वृत्तं निशि तदैव हि ;
महादेव्या विदेहायाः सद्यो हृदयशल्यदम् ॥२७॥
विदेहापि रुरोदैवं रे दैवात्यन्तनिर्घृणः ।
पुत्रं हृत्वा नमे तृप्तः पुत्रीमपि हरिष्यति ॥२८॥
स्वेच्छयैव वरादानं लोके न हि परेच्छया ।
परेच्छया वरादानं दैवादापतितं मम ॥२९॥
परेच्छया प्रतिज्ञातं कोदण्डारोपणं यदि ।
कुर्य्यान्न रामोऽन्यः कुर्य्यात्तदाऽनिष्टो वरोभवेत् ॥३०
अथेत्थं जनकोऽवोचन्मामैषीरेष राघवः ।
दृष्टसारो मया देवि लतावत्तस्य तद्धनुः ॥३१॥

विदेहामिति सम्बोध्य प्रभाते जनकोमुचत् ।
अर्च्चित्वा चापरत्ने ते मण्डपे मञ्चमण्डिते ॥३२॥
सीता स्वयम्बरायाथ विद्याधरनरेश्वराः ।
तत्रैत्य जनकाहूता अधिमञ्चमुपाविशन् ॥३३॥
ततः सखी परिवृता दिव्यालङ्कारधारिणी ।
भूचारिणीव विदुषी तत्रोपेयाय जानकी ॥३४॥
तत्र कृत्वा धनुः पूजां रामं मनसि कृत्य च ।
अतिष्ठज्जानकी तत्र जननेत्रसुधासरित् ॥३५॥
नारदोदितसम्वादि सीतारूपेक्षणात्तदा ।
भामण्डलकुमारस्य मारोभून्मारणात्मकः ॥३६॥
अथोचे जनकद्वास्थो भोभोः सर्व्वेऽपि खेचराः ।
महीचराश्च राजानो जनकोऽयं वदत्यदः ॥३७॥
आरोपयति यः कश्चिदनयोश्चापदण्डयोः ।
अप्येकतरमद्यैव स उद्वहतु नः सुताम् ॥३८॥
एकैकशोऽथ दोष्मन्तः खेचरा भूभुजोपि च ।
उपधन्वं समाजग्मुस्तदारोपणकाम्यया ॥३९॥
वेष्टिते पन्नगैरौद्रैश्चापे ते तीव्रतेजसी ।
नालम्भूवुस्तेस्प्रष्टुमप्यारोपं तु काकथा ॥४०॥
धनुः स्फुलिङ्गज्वालाभिर्निर्यान्तीभिरनेकशः ।
लुप्यमाणानिवृत्येयुस्तेऽन्यतोऽधोमुखाह्रिया ॥४१॥

अथ दाशरथी रामश्चलत्कांचनकुण्डलः ।
गजेन्द्रलीलागमनश्चापोपान्तमुपासरत् ॥४२॥
वीक्ष्यमाणः सोपहासं चन्द्रगत्यादिभिर्नृपैः ।
जनकेन च साशङ्कं निःशङ्को लक्ष्मणाग्रजः ॥४३॥
वज्रमिव वज्रपाणिः वज्रावर्त्तं महाधनुः ।
शान्तोरगानलं सद्यः परिपस्पर्श पाणिना ॥४४॥
स्थापयित्वा महीपीठं नमयित्वा च वेलवत् ।
अधिज्यं विदधे धन्वा तद्रामो धन्विनां वरः ॥४५॥
आकर्णं तं तदाकृष्य रोदः कुक्षिंभरिध्वनिं ।
धनुरास्फालयाबाल स्वयशः पटहोपमम् ॥४६॥
स्वयम्बरस्रजं रामे स्वयं चिक्षेप मैथिली ।
चापाच्चोत्तारयामास रामभद्रोपि सिञ्जिनीम् ॥४८॥
लक्ष्मणोप्यर्णवावर्त्तं कार्मुकं रामशासनात् ।
अधिज्यं विदधे सद्यः प्रेक्षितो विस्मितैर्जनैः ॥४८॥
आस्फालयच्च तन्नादवधिरीकृतदिङ्मुखम् ।
उत्तार्यमौर्वीं सौमित्रिः पुनः स्थाने मुमोचच ॥४९॥
ददुः सौमित्रये विद्याधरास्त्वकितविस्मिताः ।
अष्टादश निजाः कन्याः सुरकन्या इवाद्भुताः ॥५०॥
विलक्षाश्चन्द्रगत्याद्यास्तम्यक्च्चामण्डलान्विताः ।
विद्याधरेन्द्राः प्रययुः पुरं निजनिजं ततः ॥५१॥

अथ मैथिलसन्देशादागाद्दशरथो द्रुतम् ।
महोत्सवेन जज्ञे च विवाहो रामसीतयोः ॥५२॥
तदा च जनकभ्राता कनकोपि निजां सुताम् ।
भरताय ददौ भद्रां सुप्रभाकुक्षिसम्भवाम् ॥५३॥
समं सुतैः स्नुषाभिश्च राजा दशरथोपि हि ।
ययावयोध्यां नगरीं नागरैः प्रकृतोत्सवाम् ॥५४॥
अपरेद्युर्दशरथो राजा चैत्यमहोत्सवम् ।
ऋद्ध्यामहत्या विदधे शान्तिस्नानं चकार च ॥५५॥
स्नानाम्भः सौविदल्लेन महिष्यै प्रथमं तदा ।
पश्चात्त्वपरपत्नीभ्यो दासीभिः प्राहिणोन्नृपः ॥५६॥
यौवनाच्छीघ्रगामिन्यो दास्यः प्रथममेव ताः ।
राज्ञीनामार्पयत्स्नानपयस्ताश्च ववन्दिरे ॥५७॥
वृद्धत्वात् सौविदल्ले तु शनिवन्मन्दगामिनि ।
असंप्राप्तस्नानजला महादेवीत्यचिन्तयत् ॥५८॥
सर्वासामेव राज्ञीनां जिनेन्द्रस्नानवारिणा ।
प्रसादो विदधे राज्ञा महिष्या अपि मे न हि ॥५९॥
तत्कृतं मन्दभाग्याया जीवितेनाप्यतो मम ।
ध्वस्ते मानेहि दुःखाय जीवितं मरणादपि ॥६०॥
विमृश्येति प्रविश्यान्तर्मरणे कृतनिश्चया ।
वस्त्रेणोद्बन्धुमात्मानमारेभे सा मनस्विनी ॥६१॥

तदैवागान्नरेन्द्रस्तां तदवस्थां ददर्श च ।
तन्वत्त्वभीतः सोत्सङ्गे निवेश्यैवमुवाच च ॥६२॥
कुतोपमानाद्दारब्धं दुःसाहसमिदं त्वया ।
किं नामदैवाद्विदधे मया काप्यवमानिता ॥६३॥
सापि गद्गदवागूचे जिनस्नानपयः पृथक् ।
सर्वासांप्रैषि राज्ञीनां भवता न पुनर्मम ॥६४॥
इत्यवोचत् सा यावत्तावदागात्स कंचुकी ।
राज्ञ्यार्हस्नानवारीदं प्रस्थापितमिति ब्रुवन् ॥६५॥
साभ्यषिंचत्स तां मूर्ध्नि तेन पुण्येन वारिणा ।
विलम्बेन किमागास्त्वं राज्ञा चैवमपृच्छत ॥६६॥
कञ्चुक्यपि जगादैवं वार्द्धकं मेऽपराध्यति ।
सर्वकार्याक्षमं स्वामिन्मां पश्य स्वयमप्यमुम् ॥६७॥
ततो मुमूर्षुमिव तं प्रस्खलन्तं पदे पदे ।
घण्टान्तर्ललिकालोलदशनं वलिभाजनम् ॥६८॥
श्वेतसर्वाङ्गरोमाणं भ्रूलोमच्छन्नलोचनम् ।
शुष्कमांसासृजं प्रादुर्भूत सर्वाङ्ग वेपथुम् ॥६९॥
विलोक्याचिन्तयद्राजा मायावन्नेदृशा वयम् ।
चतुर्थपुरुषार्थाय तावद्विप्रयतामहे ॥७०॥
एवं मनोरथो राजा विषयेभ्यः पराङ्मुखः ।
कमप्यनैषीत्समयं भवे वैराग्यतन्मयः ॥७१॥

तस्यां नगर्य्यामन्येद्युश्चतुर्ज्ञानी महामुनिः।
सत्यभूतिरिति सद्यः प्राहृतः समवासरत् ॥७२॥
सपुत्रादिपरिवारो राजादशरथोऽपि तम्।
गत्वा ववन्दे शुश्रूषुर्देशनां निषसाद च ॥७३॥
तदानीमेव वैताव्यगिरेश्चन्द्रगतिर्नृपः।
सीताभिलाषसन्तप्त भामण्डलसमन्वितः ॥७४॥
विद्याधरेन्द्रैरन्योतोरथावर्त्ताचलेऽर्हतः।
वन्दित्वा विनिवर्त्तः स तत्रायातो नभः स्थितः ॥७५॥
तं मुनिं समवसृत्नं वीक्ष्यां चक्रेऽवतीर्य्य च।
ववन्देऽथाग्रतो धर्मं शुश्रूषुर्निषसाद च ॥७६॥
सीताभिलाषसन्तापं ज्ञात्वा भामण्डलस्य तु।
सत्यभूतिः सत्यवादी सूरिः प्रस्तुत्य देशनाम् ॥७७॥
चन्द्रगतिपुष्पवत्योः सभामण्डलसीतयोः।
समाचख्यौ पूर्व्वभवां स्तेषां पापान्निवृत्तये ॥७८॥
सीता भामण्डलयोश्च भवेऽस्मिन् युग्मजाततताम्।
भामण्डलापहारञ्च यथावदवदन्मुनिः ॥७९॥
भामण्डलकुमारोऽपि तदाकर्ण्य मुनेर्व्वचः।
सञ्जातजातिस्मरणो मूर्च्छितोऽन्यपतद्भुवि ॥८०॥
भामण्डलोलब्धसंज्ञः कथितं सत्यभूतिना।
स्वपूर्व्वभववृत्तान्तं शशंस स्वयमप्यथ ॥८१॥

ययुः परमसम्बेगं चन्द्रगत्यादयोप्यथ।
स्वसेति सीतांच नमश्चक्रे भामण्डलः सुधीः ॥८२॥
जातमात्रो योपजह्रे सोयं मम सहोदरः।
इति हृष्टाऽशिषं तस्मै ददौ सीता महासती ॥८३॥
नमश्चकार रामं च ललाटस्पृष्टभूतलः।
भामण्डलो विनयवान् सद्यः सञ्जातसौहृदः ॥८४॥
समं विदेहया देव्या जनकं भूपतिं ततः।
तत्रानैषीच्चन्द्रगतिः प्रेष्य विद्याधरोत्तमान् ॥८५॥
जातमात्रापहारादि वृत्तान्ताख्यानपूर्वकम्।
भामण्डलसुतस्तेसाविति तस्मै शशंस सः ॥८६॥
जहर्ष वचसा तेन स्तनितेनेव बर्हिणः।
जनकोजननी सा च विदेहा स्तन्यमक्षरत् ॥८७॥
भामण्डलोनमश्चक्रे पितरावुपलक्ष्य तौ।
चुम्ब्यमानो मूर्द्धि ताभ्यां स्नाप्यमानोऽश्रुवारिभिः॥८८
अथ चन्द्रगती राज्यं न्यस्य भामण्डले सुते।
भवोद्विग्नः प्रवव्राज सत्वभूतिमुनेः पुरः ॥८९॥
सत्यभूतिं चन्द्रगतिं पितरावनरण्यजम्।
सीतारामौ च नत्वाऽगान्निजं भामण्डलः पुरम् ॥९०॥
सत्यभूतिं महर्षिं तं नत्वा दशरथो नृपः।
अपृच्छतात्मनः पूर्वभवानाख्यन्मुनिस्ततः ॥९१॥

सेनापुरे त्वं वणिजो भावनस्य महात्मनः ।
पत्न्यामभूद्दीपिकाया सुपाख्निर्नाम कन्यका ॥९२॥
साधूनां प्रत्यनीकासा भूत्वा तत्र भवे चिरम् ।
परिबभ्राम कष्टात्तु तिर्यगादिषु योनिषु ॥९३॥
तज्जैव त्वं भवं भ्रान्त्वा पुरे चन्द्रपुरे ततः ।
धनस्याभूत्सुतः पत्न्यां सुन्दर्य्यां वरुणाभिधः ॥९४॥
तदोदारः प्रकृत्या त्वं साधुभ्यः श्रद्धयाऽधिकम् ।
निरन्तरमदाद्दानं कालधर्ममथा सदः ॥९५॥
द्वीपेऽथ धातकीषण्डे युग्म्युत्तरकुरुष्वभूः ।
स्त्वा चागादेव भूयं परिच्युत्य ततोपि हि ॥९६॥
विजये पुष्कलावत्यां पुष्कलायां च पुर्य्यभूः ।
नन्दिघोषनृपः पृथ्वी देव्यास्तु नन्दिवर्द्धनः ॥९७॥
नन्दिघोषः सुतं राज्ये न्यस्य त्वां नन्दिवर्द्धनम् ।
यशोधरमुनेरात्तदीक्षो ग्रैवेयके ययौ ॥९८॥
विद्युल्लताभिधानायां सधर्मिण्यां महाभुजः ।
सूनुः सूर्य्यं जय इति नाम्ना त्वं तनयोऽभवः ॥९९॥
अन्यदा रत्नमाली स दृप्तं विद्याधरेश्वरम् ।
विजेतुं वज्रनयनं पुरं सिंहपुरं ययौ ॥४००॥
स ज्वालयितुमारेभे पुरं सिंहपुरं ततः ।
सबालवृद्धं सस्त्रैणं सपशूपवनं हठात् ॥१॥

अभिधानेनोपमन्योः पूर्व्वजन्मपुरोधसः ।
जीवोदेवः सहस्रारात्तं तदैत्येव मब्रवीत् ॥२॥
भो भो महानुभावैवं माकृथाः पापमुत्कटम् ।
त्वं भूरिनन्दनोनाम राजाभूः पूर्वजन्मनि ॥३॥
तदा मांसनिवृत्तिं त्वं प्रत्यज्ञासीर्व्विवेकतः ।
पुरोहितेन तेनोपमन्युनोक्तश्च भग्नवान् ॥४॥
पुरोधाः सोऽन्यदा पुंसा स्कन्दनाम्ना निपातितः ।
गजश्चाभूद गृहीतश्च भूरिनन्दनभूभुजा ॥५॥
हतश्चेभोरणे सोऽथ भूरिनन्दनभूपतेः ।
गन्धारायामभूत्पत्न्यां सूनुर्नाम्नारिसूदनः ॥६॥
सञ्जातजातिस्मरणः प्रव्रज्य च विपद्य च ।
सोहं देवः सहस्रारे कल्पे जातोस्मि विद्धिमाम् ॥७॥
भूरिनन्दनराजो भूद्द्विपद्याऽजगरो वने ।
दग्धोदावेन सोयास्यद्द्वितीयां नरकावनिम् ॥८॥
नरकेपि मया गत्वा सप्राक् स्नेहात्प्रबोधितः ।
तस्मादुद्धृत्य सोभूत्त्वं रत्नमालीह पार्थिवः ॥९॥
मांसप्रत्याख्यानभंगन्तदानीमिव सम्प्रति ।
अनन्तदुःखोदर्कं तत्पुरदाहं स्मामाकृथाः ॥१०॥
तदाकर्ण्य वचोयुद्धाद्रत्नमाली न्यवर्त्तत ।
राज्ये न्यधत्त च कुलनन्दनं कुलनन्दनम् ॥११॥

सूर्य्यं जयेन पुत्रेण सहैव व्रतमाददे ।
तत्कालमेव तिलकः सुन्दराचार्य्यसन्निधौ ॥१२॥
द्वावप्यभूतान्तौ मृत्वा महाशुक्रेऽमरोत्तमौ ।
सूर्य्यंजयस्ततश्च्युत्वा भोस्त्वं दशरथोऽभवः ॥१३॥
प्रच्युत्य रत्नमालीतु जनकोऽयमजायत ।
अभ्युच्च्युत्वोपमन्युस्तु कनकोऽजनकानुजः ॥१४॥
नन्दिघोषः पिता यस्ते नन्दिवर्द्धनजन्मनि ।
सोऽहं ग्रैवेयकाच्च्युत्वा सत्यभूतिरिहाभवम् ॥१५॥
तच्छ्रुत्वा जातसम्वेगस्तं वन्दित्वाऽनरण्यजः ।
प्रविव्रजिषु राघात्तु रामे राज्यं गृहं ययौ ॥१६॥
राजा राज्ञो सुताऽमात्यानथदीक्षोत्सुकः स्वयम् ।
आपप्रच्छे यथौचित्यं दत्तालापसुधारसः ॥१७॥
नत्वा बभाषे भरतोऽहं सर्व्वविरतिं प्रभोः ।
त्वया सममुपादास्येऽवस्थास्ये त्वां विना नहि ॥१८॥
ममान्यथाहि द्वे कष्टे स्वामिन्नत्यन्तदुःखदे ।
एकं त्वत्पादविरहोऽपरं संसारतर्पणम् ॥१९॥
तच्छ्रुत्वा चाथ कैकेयी निश्चितं भाव्यतः परम् ।
न पतिर्नच मे सूनुरिति भीता ब्रवीदिदम् ॥२०॥
स्वामिन् स्मरसि यो दत्तस्त्वया मह्यम्वरः स्वयम् ।
वरो वरोत्सवे तत्र तेन सारथ्यकर्मणा ॥२१॥

तं प्रयच्छाऽधुना मह्यं नाथ सत्यप्रतिश्रव: ।
प्रस्तरोत्कीर्णरेखेव प्रतिज्ञा हि महात्मनाम् ॥२२॥
अथावद्दशरथ: प्रतिपन्नं स्मराम्यहम् ।
याचस्व यन्ममाधीनं विना व्रतनिषेधनम् ॥२३॥
ततो ययाचे कैकेयी त्वं चेत्प्रव्रजसि स्वयम् ।
स्वामिन् विश्वम्भरामेतां भरताय प्रयच्छ तत् ॥२४॥
अद्यैव गृह्यतामेषा मङ्गूरित्यभिधाय ताम् ।
सलक्ष्मणं समाहूय रामं दशरथोऽवदत् ॥२५॥
अस्या: सारथ्यतुष्टेन दत्त: पर्वं मया वर: ।
सोऽयं भरतराजेत्यन कैकेय्या याचितोऽधुना ॥२६॥
रामोपि हृष्टोऽभाषिष्ट मात्रेदं साधु याचितम् ।
यन्मद्भ्रात्रे भरताय राज्यदानं महौजसे ॥२७॥
आपप्रच्छे प्रसादान्मामिदं तात स्तथाप्यद: ।
दुनोति मामविनयस्तवनाकारणं जने ॥२८॥
अप्येक वन्दिने राज्यं तुष्टस्तातोददात्वद: ।
निषेधेऽनुमतौ वा मे न स्वाम्यं पत्तिमानिन: ॥२९॥
भरतोप्यहमेवास्मि निर्विशेषा वुभौ तव ।
अतोऽभिषिच्यतां राज्ये भरत: पराया मुदा ॥३०॥
इति रामवच: श्रुत्वा भूपति: प्रीतिविस्मित: ।
आदिच्छन्मन्त्रिणो यावद्भरतस्तावद ब्रवीत् ॥३१॥

स्वामिन् सह व्रतादानमादावप्यर्थितं मया ।
तात तस्मादन्यथा कर्तुं कस्यापि वचसाऽर्हसि ॥३२॥
राजाप्युवाच मा वत्स मत्प्रतिज्ञां मुधा कुरु ।
वरोमयाहि त्वन्मातुर्दत्तोन्यासीकृतश्चिरम् ॥३३॥
सोऽथ ते राज्यदानेन कैकेय्या याचितोऽनघ ।
आज्ञां मम च मातुश्च नान्यथा कर्तुमर्हसि ॥३४॥
रामोभरतमित्यूचे न ते गर्वोऽस्ति यद्यपि ।
तथापि सत्यापयितुं तातं त्वं राज्यमुद्वह ॥३५॥
अथाश्रभरितदृष्टिर्भरतो गद्गदाक्षरम् ।
पतित्वा पादयो राममित्युवाच कृताञ्जलिः ॥३६॥
तातपादार्यपादानां महेच्छानामदः खलु ।
उचितं ददतां राज्यमाददानस्य मे ननु ॥३७॥
तातस्य सूनुः किं नाहं किंवा नार्यस्य चानुजः ।
सत्यं मातृमुखोद्भ्रोष ग्राह्यमेवं करोमि चेत् ॥३८॥
रामो राजानमित्यूचे भरतोपरिसत्यसौ ।
राज्यं नादास्यते तस्माद्वनवासाय याम्यहम् ॥३९॥
इत्यनुज्ञाप्य राजानं रामो नत्वा च भक्तितः ।
भरते च रुदत्युच्चैर्निर्ययौ चापतूणवान् ॥४०॥
वनवासाय गच्छन्तं दृष्ट्वा दशरथः सुतम् ।
भूयो भूयो ययौ मूर्च्छामतुच्छां स्नेहकातरः ॥४१॥

अथापराजितां देवीं नत्वा रामोऽभ्यधादिति ।
मातर्यथाहं तनयो भरतोऽपि तथैव ते ॥४२॥
त्वां सत्यापयितुं सन्धां तस्मै राज्यं ददौ पिता ।
मयि सत्येषनादत्ते तद्गन्तव्यं मया वने ॥४३॥
तद्दृष्ट्या भरतं पश्येः सविशेषः प्रसादया ।
कदाचिदपि मामत्वं माद्वियोगेन कातरा ॥४४॥
तामाकर्ण्यगिरं देवी पपात भुवि मूर्च्छिता ।
चेटीभिश्चंदनाम्भोभिः सिक्तोत्तस्थावुवाच च ॥४५॥
आः केन जीवितास्म्यषा मूर्च्छा हि सुखत्यये ।
सहिष्ये रामविरहदुःखं जीवत्यहं कथम् ॥४६॥
वनं व्रजिष्यति सुतः पतिश्च प्रव्रजिष्यति ।
श्रुत्वाप्येतन्न यद्दीर्णा कौशल्ये वज्रमय्यसि ॥४७॥
रामो जगाद भूयोऽपि मातः पत्नासि मत्पितुः ।
ततः किमिदमारब्धं कातरस्त्रीजनोचितम् ॥४८॥
वनान्यटितुमेकाकी याति केशरिणीसुतः ।
स्वस्था नु केशरिण्यस्ति न ताम्यति मनागपि॥४९॥
तातस्य ऋणमस्त्वर्थैः प्रतिपन्नवरोह्ययम् ।
अत्र स्थिते च मय्यस्य तस्यानृण्यं भवेत्कथम् ॥५०॥
इत्यादियुक्तिवचनैर्बोधयित्वा पराजिताम् ।
तां नत्वाऽन्याश्च जननी निर्ययौ लक्ष्मणाग्रजः ॥५१॥

दूराद्दशरथं मत्वा सीतोपेत्यापराजिताम्।
नत्वा ऽयाचताऽऽदेशं रामानुगमनं प्रति ॥५२॥
ऊचे पराजितादेवी क्रोडमारोप्य जानकीम्।
बालामिव स्नपयन्ती कवोष्णैर्नयनोदकैः ॥५३॥
वत्से वत्सो रामभद्रो विनयी पित्रनुज्ञया।
वनं प्रयाति तस्यैव नृसिंहस्य न दुष्करम् ॥५४॥
देवीव लालितासि त्वं माजन्मोत्तमवाहनैः।
सहिष्यसे कथं वत्से पादचंक्रमणव्यथाम् ॥५५॥
तवाङ्गं सौकुमार्य्येण कमलोदरसोदरम्।
क्लिष्टं तापादिना कुर्यात् क्लेशं दाशरथेरपि ॥५६॥
स्वभर्तुरनुयानेनानिष्टकष्टागमेन च।
न निषेधं न चानुज्ञां यान्त्यत्रास्ते कर्तुमुत्सहे ॥५७॥
सीताप्युवाच निःशोका नमस्कृत्यापराजिताम्।
दधती प्रातरुत्फुल्लसरोरुहमिवाननम् ॥५८॥
अधित्वदस्तु मे भक्तिर्नित्यं क्षेमङ्करा पथि।
एषाहमनुयास्यामि रामं विद्युदिवाम्बुदम् ॥५९॥
इत्युक्त्वा तां पुनर्नत्वा निर्ययौ जनकात्मजा।
आत्मानमात्मारामेवं ध्यायन्ती लक्ष्मणाग्रजम् ॥६०॥
अहो अत्यन्तमना या पतिभक्त्याऽद्य जानकी।
अद्योदाहरणं जज्ञे पतिदैवत योषिताम् ॥६१॥

कष्टाद्भीता सीतेयं सती जनमतल्लिका ।
अहोशीलेन महता पुनाति स्वं कुलद्वयम् ॥६२॥
इतिव्यावर्णयन्तीभिः शोकगद्गदया गिरा ।
पौरीभिः कथमप्यैक्षि सीता यान्तीं वनं प्रति ॥६३॥
रामं वनाय निर्यातं श्रुत्वा सपदि लक्ष्मणः ।
सद्यः सन्धुक्षितक्रोधवह्निर्दध्याविदं हृदि ॥६४॥
ऋजुः स्तातः प्रकृत्यापि प्रकृत्याऽनृजवः स्त्रियः ।
इयच्चिरं वरं धृत्वा ययाचे साऽन्यथा कथम् ॥६५॥
दत्तमेतावता राज्यं भरताय महीभुजा ।
अपनीतमृणं स्वस्य गता नच पितृणभीः ॥६६॥
निर्भयः साम्प्रतं हृत्वा भरताकुलसर्पणात् ।
न्यस्यामि राज्यं किं रामे विरामाय निजक्रुधः ॥६७
अथवासौ महासत्त्वस्तृणवद्राज्यमुज्झितम् ।
रामोनादास्यते दुःखं तातस्यतु भविष्यति ॥६८॥
तातस्य मास्मभूद्दुःखं राजास्तु भरतोपि हि ।
अहं त्वनुगमिष्यामि रामपादान्पदातिवत् ॥६९॥
एवं विचिन्त्य सौमित्रिर्नत्वा पृच्छ्य च भूपतिम् ।
ययौ सुमित्रामाप्रष्टुं नत्वा चैवमवोचत ॥७०॥
गमिष्यति वनं रामोऽनुगमिष्यामि तं त्वहम् ।
मर्य्यादाब्धिं विनाह्यार्य्यं न स्थातुं लक्ष्मणः क्षमः ॥७१

कथञ्चिद्धैर्य्यमालम्ब्य सुमित्राप्यऽब्रवीदिदम् ।
साधु वत्सासि मे वत्सो ज्येष्ठं यदनुगच्छसि ॥७२॥
मां नमस्कृत्य वत्सोद्य रामभद्रश्चिरङ्गतः ।
अतिदूरे भवति ते माविलम्बस्व वत्स तत् ॥७३॥
इदं साधु ब्रुवन् साधु मन्मातासीत्युदीर्य्य ताम् ।
नत्वा च लक्ष्मणोगच्छत्प्रणंतुमपराजिताम् ॥७४॥
तान्नत्वोवाच सौमित्रि रार्य्ये एकाक्ष्यगाश्चिरम् ।
त्वामाप्रष्टुमहं त्वागामार्यानुगमनोत्सुकः ॥७५॥
तदश्रुरूचे कौशल्या मन्दभाग्यास्मि हा हता ।
वत्स त्वमपि मां मुक्त्वा प्रस्थितोसि वनाय यत् ॥७६॥
त्वमेकोऽत्रावतिष्ठस्व मा प्रतिष्ठस्व लक्ष्मण ।
ममाश्वासकृते रामविरहार्द्दितचेतसः ॥७७॥
प्रत्यूचे लक्ष्मणोप्येवं माता रामस्य नन्वसि ।
मातःकृतमधैर्य्येणार्हेण सामान्ययोषिताम् ॥७८॥
दूरे गच्छति मे बन्धुरनुयास्यामि तद्गतम् ।
तद्विघ्नं माकृथा देवि रामनिघ्नः सदाप्यहम् ॥७९॥
तामित्युक्त्वा च नत्वा च सौमित्रिरथ सत्वरम् ।
अनुधाल्लक्ष्मणः सीतारामौ कार्मुकतूणभृत् ॥८०॥
त्रयोपि निर्ययुः पुर्य्या विकस्वरमुखाः प्रजाः ।
विलासोपवनायेव वनवासाय सोद्यमाः ॥८१॥

प्राणैरिव विनिर्यद्भिर्मैथिलीराममलक्ष्मणैः ।
कष्टां नराश्च नार्य्यश्च नगर्यां लेभिरे दशाम् ॥८२॥
वेगात्तानन्वधावन्तोऽनुरागेण गरीयसा ।
नागराः क्रूरकैकेयी विधेराक्रोशदायिनः ॥८३॥
वाष्पायमाणोराजापि सान्तःपुरपरिच्छदः ।
द्रुतमन्वसरद्राममाकृष्टः स्नेहरज्जुभिः ॥८४॥
द्रुतं राज्ञि जने चापि रामभद्रानुगामिनि ।
नगर्य्ययोध्या समभूद्दारण्येव समन्ततः ॥८५॥
अथावस्थाय काकुत्स्थः पितरं जननीरपि ।
न्यवर्तयत्कथमपि गिरा विनयसारया ॥८६॥
तथा यथोचितालापैः पौरानपि विसृजरसः ।
सीतासौमित्रिसहित स्त्वरितत्वरितं ययौ ॥८७॥
ग्रामे ग्रामे ग्रामवृद्धैर्महद्भिश्च पुरे पुरे ।
प्रार्थ्यमानोप्यवस्थातुं काकुत्स्थोनह्यवास्थित ॥८८॥
इतश्च भरतोराज्यं नाददे किंतु प्रत्युत ।
कैकेयीं स्वञ्च चुक्रोश स्वभ्रात्रविरहासहः ॥८९॥
परिव्रजोत्सुकोराजा सामन्तसचिवानपि ।
प्राहिणोद्राममानेतुं राज्याय सह लक्ष्मणम् ॥९०॥
पश्चिमायायिनं रामं प्रापुस्त्वरितमेव ते ।
निवृत्तेत्र चाभ्यधुर्भक्त्या राजाज्ञाख्यानपूर्वकम् ॥९१॥

तैर्दीनैः प्रार्थ्यमानोऽपि न न्यवर्त्तत राघवः ।
महतां हि प्रतिज्ञा तु न चलत्यद्रिपादवत् ॥९२॥
विसृज्यमाना अपि ते राघवेण मुहुर्मुहुः ।
सहैव चेलुः सर्वेऽपि कृताशास्तन्निवर्त्तने ॥९३॥
अथोग्रश्वापदपदं निर्मानुष्यां घनद्रुमाम् ।
पारियात्राटवीं प्रापुर्जानकीराम लक्ष्मणाः ॥९४॥
अभिध्यानैः स्यपाराङ्गंभीरावर्त्तभीषणाम् ।
हृद्यप्रवाहां पथि ते समीक्षां चक्रिरे नदीम् ॥९५॥
तत्र स्थित्वाऽवदद्रामः सामन्तादीनिदम्वचः ।
इतःस्थानान्निवर्त्तध्वं यथाकष्टोऽप्यतःपरम् ॥९६॥
अस्माकं कुशलोदन्तं गत्वा तातस्य शंसत ;
उपाध्वं भरतं मत्वा तात वद्वाप्यतःपरम् ॥९७॥
धिगस्मान् रामपादानामयोग्यानितिभूरिशः ।
ते रुदन्तोन्यवर्त्तन्त वाष्पाम्भःस्तिमितांशुकाः ॥९८॥
उत्ततार ततोरामो दुस्तरां तान्तरङ्गिणीम् ।
ससीतालक्ष्मणः साश्रुःप्रेक्षितःस्तैस्तटस्थितैः ॥९९॥
रामेऽथ दृक्पथाऽतीते सामन्ताद्याः कथञ्चन ।
अयोध्यानगरीमीयुस्तद्रामे चावचक्षिरे ॥१००॥
राजाऽप्युवाच भरथं नायातौ रामलक्ष्मणौ ।
राज्यं गृहाण मम तद्दीक्षाविघ्नाय माऽस्मभूः ॥१॥

भरतोऽप्यवदद्राज्यं नादास्येऽहं कथञ्चन ।
आनेष्ये तु स्वयं गत्वा प्रसाद्य निजमग्रजम् ॥२॥
आगात्तदा च कैकेयी राजानमिति चाऽब्रवीत् ।
भरताय त्वया राज्यं दत्तं सत्यप्रतिश्रव ॥३॥
परमेष न गृह्णाति राज्यं ते विनयी सुतः ।
अन्यासाञ्चास्य मातॄणां महद्दुःखं ममापि च ॥४॥
अविमृश्य विधायिन्या पापीयस्या मया कृतम् ।
सति त्वयि सपुत्रेऽपि ह्यहो राज्यमराजकम् ॥५॥
कौशल्यायाः सुमित्रायाः सुप्रभायाश्च दुःश्रवम् ।
रुदितं मम शृण्वत्या हृदयम्भवति द्विधा ॥६॥
भरतेन समं गत्वा तौ वत्सौ रामलक्ष्मणौ ।
अनुनीय समानेष्याम्यनुजानीहि नाथ माम् ॥७॥
अथादिष्टा प्रहृष्टेन राज्ञा दशरथेन सा ।
ययौ सभरताऽमात्या प्रतिरामं कृतत्वरा ॥८॥
कैकेयी भरतौ षड्भिः प्रापतुस्तद्वनं दिनैः ।
अपश्यद्द्रुममूले च जानकीरामलक्ष्मणान् ॥९॥
रथादुत्तीर्य कैकेयी वत्सवत्सेति भाषिणी ।
प्रणमन्तं रामभद्रं च चुम्बोपरि मूर्द्धनि ॥१०॥
पादाब्जायाः प्रणमन्तौ वैदेही लक्ष्मणावपि ।
आक्रम्योपरि बाहुभ्यान्तारं तारं रुरोद सा ॥११॥

भरतोऽपि नमश्चक्रे रामपादावुदश्रुदृक् ।
प्रत्यपद्यत मूर्च्छाञ्च मूर्च्छा श्वेदमहाविषः ॥ १२ ॥
बोधितो रामभद्रेण विनयी भरतोऽवदत् ।
अभक्तमिव मां त्यक्त्वा कथमत्र त्वमागमः ॥१३॥
राज्यार्थी भरत इति मातृदोषेण योऽभवत् ।
ममापवादोऽहरत मात्मना सह मां नयन् ॥१४॥
निवृत्य यद्वाऽयोध्यायां गत्वा राज्यश्रियं श्रय ।
कौलीनशल्यं मे भ्रातरेवमप्यपयास्यति ॥१५॥
जगन्मित्रं हि सौमित्रिस्तवाऽमात्यो भविष्यति ।
अयं जनः प्रतीहारः शत्रुघ्नस्त्वातपत्रभृत् ॥१६॥
एवं ब्रुवाणे भरते कैकेय्यप्यऽब्रवीदिदम् ।
कुरु भ्रातृवचो वत्स सदासि भ्रातृवत्सलः ॥१७॥
अत्र न त्वत्पितुर्दोषो न दोषो भरतस्य च ।
कैकेय्या एव दोषोऽयं सुलभः स्त्री स्वभावतः ॥ १८॥
कौलट्यवर्जं ये केऽपि दोषाःस्त्रीणां पृथक् पृथक् ।
ते सर्वे कृतसंस्थाना मयि दोषखनाविव ॥१९॥
पत्युः सुतानां त्वन्मातृजनस्य च मया कृतम् ।
इदं दुःखाकरं कर्म्म तत्सहस्व सुतोसि यत् ॥२०॥
इत्यादि साश्रु जल्पन्ती तामूचे लक्ष्मणाग्रजः ।
तातस्य सूनुर्भूत्वाऽहं प्रतिज्ञातं त्यजामि किम् ॥२१॥

तातेन दत्तमेतस्मै राज्यं ह्यनुमतं मया ।
अस्त्वन्यथा कथंकारं वाग्द्वयोर्जीवितोरपि ॥२२॥
तदस्तु भरतो राजा द्वयोरपि निदेशतः ।
अस्यास्त्वहमनुल्लंघ्यो मम तात इवाम्बिके ॥२३॥
इत्युक्त्वोत्थाय काकुत्स्थः सीतानीतजलैः स्वयम् ।
राजेऽभिषिंचद्भरतं सर्व्वसामन्तसाक्षिकम् ॥२४॥
रामः प्रणम्य कैकेयीं सम्भाष्य भरतं तथा ।
विससर्ज्ज प्रतस्थेच ककुभं दक्षिणां प्रति ॥२५॥
ययावयोध्यां भरत स्तत्र चाखंडशासनः ।
उरीचक्रे राजऽभारं पितुर्भ्रातुश्च शासनात् ॥२६॥
महामुनेः सत्यभूतेः पार्श्वे दशरथोप्यऽथ ।
भूयसा परिवारेण समं दीक्षामुपाददे ॥२७॥
स्व भ्रातृवनवासेन भरतः शल्यितोहृदि ।
अर्हत्पूजोद्यतो रक्षद्राजंऽ यामिकवत्सुधीः ॥२८॥
सौमित्रि मैथिलसुता सहितोऽथ रामो
गच्छन्नतीत्य गिरिमध्वनि चित्रकूटम् ।
आसादयत् कतिपयैर्दिवसैरवन्ति
देशैक देशमवनिस्थित देवदेश्यः ॥२९॥

इत्याचार्य्य हेमविरचित रामायणे रामजन्मणोत्पत्ति परिणयन वनवासगमनो नाम चतुर्थः सर्गः॥४

## अथ पञ्चमसर्गः ।

आतुरे व्यसने प्राप्ते दुर्भिक्षे शत्रुविग्रहे ।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ॥
रामोऽथ विश्रामयितुं श्रान्तामध्वनि जानकीम् ।
वटस्य मूले न्यषदद्भुञ्जकानामिवेश्वरः ॥१॥
तं देशं सर्व्वतोवीक्ष्य रामः सौमित्रिमभ्यधात् ।
देशः कस्यापि भीत्यायमधुनैवोद्वसोऽभवत् ॥२॥
अशुष्कसुल्यानुद्यानानीक्षुवाटाश्च सेक्षवः ।
सान्तानिच खलान्याक्तु नूतनोद्वसतामिह ॥३॥
तदाच रामः पप्रच्छ गच्छन्तं जनमेककम् ।
किमुद्वचाल देशोयं क्वचासि चरितोनघ ॥४॥
सोऽप्यूचेऽवन्तिदेशेऽस्मिन् पुर्य्यवंत्यां नरेश्वरः ।
अस्ति सिंहोदरोनाम सिंहवद्दुःसहो द्विषाम् ॥५॥
तस्य च प्रतिवद्धोस्मिन्विषयेऽस्ति महामतिः ।
सामंतो वज्रकर्ण्णाख्यो दशाङ्गपुरनायकः ॥६॥
स पापद्धर्याङ्गतोऽन्येद्यु र्वनमध्ये महामुनिम् ।
कायोत्सर्गस्थमैक्षिष्ट नामतः प्रीतिवर्द्धनम् ॥७॥
किं तिष्ठसि द्रुम इवारण्येऽमुत्रेति तेन तु ।
अनुयुक्तो मुनीरात्महितार्थमिति सो ऽवदत् ॥८॥

भूयोऽप्यूचे वज्रकर्णः खाद्यपेयादि वर्जिते ।
अत्र संपद्यते ऽरण्ये किं नामात्महितं तव ॥९॥
तच्छ्रयोग्यं मुनिर्ज्ञात्वा धर्ममात्महितं जगौ ।
श्रावकत्वं सोऽपि सद्यः प्रपेदे तत्पुरःसुधीः ॥१०॥
विनाच देवमर्हन्तं विना साधूंश्च नापरम् ।
नंस्यामीति तदग्रे स जग्राहाभिग्रहं दृढम् ॥११॥
ततश्च तं स वन्दित्वाऽगाद्दशांगपुरं पुरम् ।
पालयन् श्रावकत्वंच चिन्तयामासिवानिदम् ॥१२॥
नमस्कार्योमया नान्य इति तावदभिग्रहः ।
सिंहोदरस्य मे वैरी भविष्यत्यऽनमस्कृतः ॥१३॥
एवं विमृश्योत्प्रतिभः स्वाङ्गुलीये मणीमयीम् ।
मुनिसुव्रतनाथस्य प्रतिमां संन्यवीविशत् ॥१४॥
तद्बिम्बं स्वाङ्गुलीयस्थं नमत्वंच यतेस्म सः ।
सिंहोदरं नरपतिं मायापायोऽवलोयसि ॥१५॥
तं वज्रकर्णवृत्तान्तं सिंहोदरमहीपतेः ।
आचचक्षे खलः कोपि खलाः सर्वंकषाः खलु ॥१६॥
सद्यः सिंहोदरोऽकुप्यन् महाहिरिव निश्वसन् ।
वज्रकर्णाय तत्कोपं कोप्यागत्य शशंसच ॥१७॥
तस्य कोपोमयि कथं त्वया ज्ञात इति स्फुटम् ।
वज्रकर्णेन पृष्टः सन्नाचख्यौ स पुमानिति ॥१८॥

पुरे कुन्दपुरे आढ्यः समुद्रः सङ्गमो वणिक् ।
यमुना नाम तत्पत्नी विद्यदंगोस्मि तत्सुतः ॥१९॥
क्रमाच्च यौवनं प्राप्तो भाण्डमादाय चागमम् ।
उज्जयिन्यामहं पुर्य्यां क्रयविक्रय हेतवे ॥२०॥
तत्र कामलतां नाम्ना पश्यन् वेश्यां मृगीदृशम् ।
सद्यश्च कामबाणानामभूवमहमास्पदम् ॥२१॥
निशामेकां वसामीति तया कृतसमागमः ।
दृढं रागेण बद्धोहं मृगो वागुरया यथा ॥२२॥
आजन्म कष्टेन धनं यन्मत्पित्राऽर्जितं बहु ।
तद्वशेन मया तत्तु षड्भिर्मासैर्विनाशितम् ॥२३॥
सिंहोदरमहिष्या ये श्रीधरायाश्च कुण्डले ।
तादृशे देहि मह्यं त्वमित्यूचे सान्यदा तु माम् ॥२४॥
नमेऽर्थः कश्चिदप्यस्ति त एवापहराम्यहम् ।
इति रात्रौ साहसिकः खात्रेणागां नृपौकसि ॥२५॥
सिंहोदरं श्रीधरेतिपृच्छन्ती शुश्रुवे मया ।
नाथोद्विग्नइवेदानीं निद्रां न लभसे कथम् ॥२६॥
सिंहोदरोऽवदद्देवि तावन्निद्रा कुतोमम ।
प्रणामेविमुखो यावद्वज्रकर्णो न मार्य्यते ॥२७॥
अमुं प्रातर्हनिष्यामि ससुहृत्सुतबान्धवम् ।
जात्वियं रजनी तावद्विनिद्रस्यापि मे प्रिये ॥२८॥

तदाकर्ण्य तवाख्यातुं त्यक्तकुण्डलचौरिकः।
त्वां साधर्म्मिकवात्सल्यादिह त्वरितमागमम् ॥२९॥
वज्रकर्णस्तदाकर्ण्य पुरीद्वारण्टणाधिकम्।
सद्यश्चकाराऽपश्यच्च परचक्ररजोऽम्बरे ॥३०॥
चमूभिश्च रुरुधे सिंहोदरेण वप्रवलैर्बलैः।
तद्दशाङ्गपुरं विष्वक् चन्दनद्रुरिवाहिभिः ॥३१॥
सिंहदरोऽथ दूतेन वज्रकर्णं मदोऽवदत्।
प्रणाममायया मायिन्वञ्चितोऽस्मि त्वया चिरम्॥३२॥
विना तेनाङ्गुलीयेन मामाऽगत्य नमस्कुरु।
अन्यथा सकुटुम्बस्त्वं यमवेश्माद्य यास्यसि ॥३३॥
प्रत्यूचे वज्रकर्णोऽपि मम ह्ययमभिग्रहः।
विनार्हन्तं विना साधुं प्रणामाम्यपरं नहि ॥३४॥
न पौरुषाभिमानोऽत्र किन्तु धर्माभिमानिता।
नमस्कारं विना सर्व्वं ममादत्स्व यथारुचिम् ॥३५॥
धर्मद्वारं देहि मह्यं यथाधर्माय कुत्रचित्।
अहमन्यत्र गच्छामि धर्म एवास्तु मे धनम् ॥३६॥
इत्युक्तो वज्रकर्णेन नहि तत्प्रत्यपादि सः।
जातु धर्ममधर्मं वा गणयन्ति न मानिनः ॥३७॥
पुरं सवज्रकर्णं तद्रुद्ध्वा सिंहोदरो वहिः;
स्थितोऽस्ति मुष्णन् देशञ्च तद्भयादयमुद्वसः ॥३८॥

अहं च सकुटुम्बोपि नष्टोऽस्मिन् राजविग्रहे ।
दग्धान्यत्राद्य सौधानि जीर्णा साच कुटी मम ॥३६॥
शून्येभ्यस्त्वेभ्यवेश्मभ्यो वेश्मोपकरणान्यहम् ।
आनेतुं क्रूरगेहिन्या प्रेषितो यामि तन्मुखः ॥४०॥
तस्यादुर्वचासाऽप्येतत्फलं शुभमभून्मम ।
यन्मया देवकल्पस्त्वं दृष्टो दैववशादसि ॥४१॥
एवमुक्तवतस्तस्य दरिद्रस्य रघूद्वहः ।
रत्नस्वर्णमयं सूत्रमदत्त करुणानिधिः ॥४२॥
तं विसृज्य ततो रामो दशाङ्गपुरमीयिवान् ।
चन्द्रप्रभं वहिश्चैत्ये नत्वा तत्राथवा स्थितः ॥४३॥
रामादेशेन सौमित्रिस्तत्प्रविश्य क्षणात् पुरम् ।
वज्रकर्णान्तिके गच्छद्दलस्यानां ह्यसौ स्थितिः॥४४॥
वज्रकर्णः सदाकारं ज्ञात्वा तन्नरमुत्तमम् ।
ऊचे महाभाग भव भोजनातिथिभाग् मम ॥४५॥
रामानुजोऽप्यभिदधे सकलत्रो मम प्रभुः ।
स्थितोस्ति वहिरुद्याने तमादौ भोजयास्यहम् ॥४६॥
ततः सौमित्रिणा सार्द्धं वज्रकर्णो महीपतिः ।
भूयिष्टव्यजनं भोज्यमुपराममनाययत् ॥४७॥
भुक्तोत्तरे चानुशिष्ट रामेण प्रेषितो ययौ ।
लक्ष्मणोऽवन्तिनृपतिं जगादेति च सौष्टवी ॥४८॥

राजा दाशरथि र्दासीकृताशेष महीपतिः।
विरोधं वज्रकर्णेन भरतस्ते निषेधति॥४९॥
सिंहोदरोऽपि प्रत्यूचे भृत्यानां भरतोपिहि।
भक्तानामेव कुरुते प्रसादं नान्यथा पुनः॥५०॥
अयं पुनर्वज्रकर्णो मत्सामन्तो दुराशयः।
न मां नमति तेनास्य प्रसीदामि कथम्बद॥५१॥
भूयोपि लक्ष्मणोऽवोचन्नासाववविनयी त्वयि।
अस्याऽप्रणामसन्धाहि जज्ञे धर्मानुरोधतः॥५२॥
माकुप्यो वज्रकर्णोयं मान्यं भरतशासनम्।
आसमुद्रान्त मेदिन्या भरतः शासिता यतः॥५३॥
क्रुद्धः सिंहोदरस्साह को नाम भरतोनृपः।
योवज्रकर्णं गृह्यन् सन् वातुलो मां वदत्यदः॥५४॥
कोपारुणाक्षः सौमित्रिः स्फुरदोष्ठदलोऽवदत्।
रे न जानासि भरतं ज्ञापयाम्येष मत्स्रुतम्॥५५॥
उत्तिष्ठस्व युधे सर्वात्मना सम्बर्मितो भव।
न भवस्येष गोधेर मद्ध जाशनिताडितः॥५६॥
सिंहोदरः ससैन्योथ सौमित्रिं हन्तु मुद्यतः।
वालः परिस्प्रष्टु मिव भस्मच्छन्नं हुताशनम्॥५७॥
लक्ष्मणोपि गजालानं भुजेनोन्मूल्य वालवत्।
विद्विष स्ताडयामास हस्तदण्ड इवान्तकः॥५८॥

अथ सौमित्रिरुत्पत्य सिंहोदर मिभस्थितम् ।
तद्वाससा पशुमिवाऽबध्नात्कण्ठे महाभुजः ॥५९॥
आश्चर्य्यं पश्यतां तत्र दशाङ्गपुरवासिनाम् ।
तन्निन्ये गामिवाकृष्य लक्ष्मणो रामसन्निधौ ॥६०॥
दृष्टा सिंहोदरो रामं नत्वा चेदमभाषत ।
न ज्ञातस्त्वमिहायातो मया रघुकुलोद्वह ॥६१॥
अथवा किमिदं देव मत्परीक्षाकृते कृतम् ।
कृतं नः प्राणितेनापि यूयं च्छलपरा यदि ॥६२॥
क्षमस्वाऽज्ञानदोषं मे यत्कर्त्तव्यं तदादिश ।
भृत्ये कोपः शिक्षामात्रकृते शिष्ये गुरोरिव ॥६३॥
सन्धेहि वज्रकर्णेनेत्यादिशत्तं रघूद्वहः ।
सिंहोदरोपि तां वाचं तथेति प्रत्यपद्यत ॥६४॥
तत्रागाद्वज्रकर्णोपि रामभद्रस्य शासनात् ।
विनयेन पुरोभूय कृताञ्जलिरुवाच च ॥६५॥
स्वामिनौ वृषभस्वामिवंशजौ रामशार्ङ्गिणौ ।
युवां दृष्टे मया दिष्ट्या किन्तु ज्ञातौ चिरादिह॥६६॥
भरतार्द्धस्य सर्व्वस्य युवान्नाथौ महाभुजौ ।
अहमन्येच राजानो युवयोरेव किङ्कराः ॥६७॥
मुञ्चैनं मत्प्रभुं नाथ साधि चैनमतःपरम् ।
यथाऽसौ सहते मेऽन्यप्रणामाभिग्रहं सदा ॥६८॥

विनार्हन्तं विना साधुं नमस्यो मापरो मया ।
इतिह्यभिग्रहोऽग्राहि महर्षेः प्रीतिवर्द्धनात् ॥ ६८॥
रामभूसंज्ञया सिंहोदरस्तत्प्रत्यपद्यत ।
सौमित्रिणा विमुक्तःसन् वज्रकर्णञ्च सस्वजे ॥७०॥
सिंहोदरोपि परया प्रीत्या राघवसाक्षिकम् ।
राज्यार्द्धं वज्रकर्णाय सोदरायेव दत्तवान् ॥७१॥
श्रीधराकुण्डले तेच याचित्वावन्तिपार्थिवात् ।
अदत्त विद्युदङ्गाय दशाङ्गपुरपार्थिवः ॥७२॥
सौमित्रये वजकर्णौ ददावष्टौ स्वकन्यकाः ।
सिंहोदरः समामन्तः पुनःकन्याशतत्रयम् ॥७३॥
अथोचे लक्ष्मणं कन्याः पार्श्वे वःसन्तु संप्रति ।
भ्राता नो भरतोराज्ये यतः पित्रा निवेशितः ॥७४॥
समयेऽङ्गीकृतराज्यः परिणेष्यामि वः सुताः ।
इदानीन्तु वयङ्गत्वा स्थास्यामो मलयाचले ॥७५॥
एवमित्युक्त्वा स्थितौ वज्रकर्णसिंहोदरौ नृपौ ।
विसृष्टौ रामभद्रेण ययतुर्निजपुरं पुरम् ॥७६॥
रामस्तत्र निशान्नीत्वा ससीतालक्ष्मणःप्रगे ।
गच्छन् क्रमेण संप्रापद्दशङ्कमपि निर्जलम् ॥७७॥
पिपासितायां सीतायां विश्रान्तायां तरोस्तले ।
रामाज्ञयाऽथ सौमित्रिर्जलमानेतुमभ्यगात् ॥७८॥

गच्छन् सरो ददर्शैकमऽनेकांभोजमण्डितम् ।
दूरादानन्दजननं वयस्यमिव वल्लभम् ॥७९॥
तदा च क्रीडितुं तत्राऽगा त्कूवरपुराधिभूः ।
नृपः कल्याणमालाख्यः प्रेक्षाञ्चक्रे च लक्ष्मणम् ८० ॥
सकामवाणैः सद्योपि विभिदे भिदुरात्मकैः ।
नत्वा लक्ष्मणमूचे च भव मे भोजनातिथिः ॥८१॥
विकारं मान्मथं देहि लक्षणानि च लक्ष्मणः ।
निरीक्ष्य दध्यौ नार्य्येषा पुंवेषा कारणेन तु ॥८२॥
ध्यात्वेत्युवाच सौमित्रिः सभार्य्योस्ति मम प्रभुः ।
इतस्त्वादूरदेशेऽस्मिन् भुङ्क्ते तेन विना नहि ॥८३॥
तेन प्रधानपुरुषैर्भद्राकारैः प्रियम्बदैः ।
तत्राऽनिन्ये समभ्यर्च्य ससीतोऽपि रघूद्वहः ॥८४॥
सोऽनमद्भद्रामभद्रं भद्रधी मैथिलीमपि ।
तयोःकृते पटकुटीं तत्कालञ्च न्यवेशयत् ॥८५॥
तत्र रामं कृतस्नानभोजनं स उपाययौ ।
सहैकमन्त्रिणा युक्तःस्त्रीवेषो निःपरिच्छदः ॥८६॥
लज्जानतमुखीन्ताञ्च निजगादेति राघवः ।
भद्रे पुरुषवेषेण स्त्रीभावं निह्नुषे कुतः ॥८७॥
ऊचेऽथ कूवरपतिः कूवरेऽस्मिन् महापुरे ।
वालिखिल्योनाम राजा प्रथ्वीनामाऽस्यतु प्रिया ।८८।

आपन्नसत्वा सन्नेऽनेद्याच्छ म्लेच्छैर्महाभटैः
अवस्कंदागतैर्निन्ये वालिखिल्यो नियम्य सः ॥८९॥
पश्चाच्च पृथिवी देवी तनयां मामसूत सा ।
पुत्रोऽजनीति चाघोषि सचिवेन सुबुद्धिना ॥९०॥
तज्ज्ञापितः पुत्रजन्म प्रभुः सिंहोदरोऽवदत् ।
तत्र राजास्तु वालोयं वालिखिल्यागमावधिः ॥९१॥
क्रमेण वर्द्धमानाऽहं मूलात्पुंवेषधारिणी ।
मातृमन्त्रजनं मुक्त्वा परैरनुपलक्षिता ॥९२।
राज्यं करोमि कल्याणमालाख्या प्रथिता सती ।
मन्त्रिणां मन्त्रसामर्थ्यात् स्यादलोकेऽपि सत्यता ॥९३॥
म्लेच्छानां भूरि यच्छामि द्रविणं पितृमुक्तये ।
द्रव्यमेते तु गृह्णन्ति मुञ्चन्ति पितरं न तु ॥९४॥
तत्प्रसीदत मे तातं तेभ्यो मोचयताऽधुना ।
सिंहोदरान्मोचितः प्राग् वज्रकर्णो नृपो यथा ॥९५॥
रामोऽप्युवाच पुंवेषैव स्वराज्यं प्रशासती ।
यावद्धत्वा मोचयामो म्लेच्छेभ्यः पितरं तव ॥९६॥
महाप्रसाद इत्यूचे सा स्त्रीपुंवेषधारिणी ।
ऊचे सुबुद्धिमन्त्रीतु लक्ष्मणोस्यावरोऽस्त्विति ॥९७॥
राघवोऽप्यब्रवीत्ततो देशाद्देशान्तरं वयम् ।
यास्यामोऽथ निवृत्तेषु लक्ष्मणः परिणेष्यति ॥९८॥

प्रतिपद्येति काकुत्स्थ स्तस्थौ तत्र दिनत्रयम् ।
निशाशेषे सुप्तजने ससीतालक्ष्मणो ययौ ॥९९॥
सापि प्रातरपश्यन्ती जानकीरामलक्ष्मणान् ।
विमनाः स्वं पुरमऽगाच्चक्रे राज्यं तथैवतु ॥१०००॥
प्राप क्रमेण रामोपि नर्म्मदामुत्ततार च ।
पथिकैर्वार्य्यमाणोपि विंध्याटव्यां विवेश च ॥१॥
तत्रादौ दक्षिणदिशि कण्टकिद्रुस्थितो द्विजः ।
रराास विरसं क्षीरद्रुस्थोऽन्यो मधुरं पुनः ॥२॥
न विषादो नवा हर्षोऽभूद्रामस्य तथापिहि ।
शकुनञ्चाशकुनञ्च गणयन्ति हि दुर्व्वलाः ॥३॥
गच्छन् ददर्श चागच्छन् म्लेच्छसैन्यमुदायुधम् ।
असंख्यभरथाम्बीयं देशघाताय निर्गतम् ॥४॥
युवा सेनापतिस्तत्र दृष्ट्वा सीतां स्मरातुरः ।
स्वच्छन्दवृत्तिः स्वान् म्लेच्छानुच्चकैरेवमादिशत् ॥५॥
अरेरे पथिकावेतौ नाशयित्वा विनाश्य वा ।
एतामवरस्त्रियं हृत्वा समानयत मत्कृते ॥६॥
इत्युक्ताः सह तेनैवाऽधावन्त प्रति राघवम् ।
प्रहरन्तः शरप्रासप्रायैः प्रहरणैः शितैः ॥७॥
उवाच लक्ष्मणो रामं तिष्ठार्येह सहार्यया ।
अमून्शुनइव म्लेच्छान् यावद्विद्रावयाम्यहम् ॥८॥

इत्युक्त्वा लक्ष्मणोऽधिज्यं कृत्वा धनुरनादयत्।
तन्नादाच्चावसन्म्लेच्छाः सिंहनादादिवद्द्विपाः ॥९॥
असह्यश्चापनादोऽपि शरमोचः सुदूरतः।
इत्यर्थं विमृश्य स म्लेच्छराजो राममुपाययौ ॥१०॥
विमुक्तशस्त्रो दीनास्यः स्यन्दनादवतीर्य्य सः।
रामभद्रं नमश्चक्रे क्रुधा सौमित्रिणेक्षितः ॥११॥
सोऽवोचद्देव कौशांब्यां पुर्य्यां वैश्वानरो द्विजः।
सावित्रीनाम तत्पत्नी रुद्रदेवोऽस्मि तत्सुतः ॥१२॥
आजन्म क्रूरकर्मा च तस्करः पारदारिकः।
न तत्किमपि कर्मास्ति यत्पापो नाचराम्यहम् ॥१३॥
अथैकदा खात्रमुखे प्राप्तोऽहं राजपूरुषैः।
शूलं समारोपयितुं नीतश्च नृपशासनात् ॥१४॥
उपशूलञ्च दीनोऽहमुपशूनमिव च्छगः।
दृष्टः श्रावकवणिजा दत्वा दण्डञ्च मोचितः ॥१५॥
मा कार्षीश्चौरिकां भूय इत्युदीर्य्य महात्मना।
विसृष्टो वणिजा तेन तन्देशं त्यक्तवानहम् ॥१६॥
भ्रमन्नागामिमां पल्लीं काक इत्याख्ययानया।
इह ख्यातः क्रमात्पल्लीपतित्वमिदमासदम् ॥१७॥
इह स्थितश्च लुण्टाकैर्लुण्टयामि पुरादिकम्।
आनयामि स्वयं गत्वा बद्ध्वा नृपानपि ॥१८॥

वश्योस्मि व्यन्तर इव तव स्वामिन् समादिश ।
किङ्करः किङ्करोम्येष सहस्वाविनयं मम ॥१९॥
वालिखिल्यं विमुञ्चेति रामेणोक्तः किरातराट् ।
तं मुमोच नमश्चक्रे वालिखिल्योऽपि राघवम् ॥२०॥
रामाज्ञया च काकेन स निन्ये कूबरं पुनः ।
कल्याणमालां पुंवेषामपश्यच्च सुतां निजाम् ॥२१॥
रामलक्ष्मणवृत्तान्तं मिथोऽकथयताञ्च तौ ।
कल्याणमालिका वालिखिल्यायाऽखिलमप्यथ ॥२२॥
काकोपि स्वां ययौ पल्लिं ततो रामोऽपि निर्गतः ।
विन्ध्याटवीमतिक्रम्य प्राप तापीं महानदीम् ॥२३॥
तापीमुत्तीर्य्य चक्रामंस्तद्देशप्रान्तवर्त्तिनम् ।
अरुणग्रामनामानं रामोग्राममथाऽसदत् ॥२४॥
पिपासितायाः सीताया स्तत्र रामः सलक्ष्मणः ।
गृहे ययौ कोपितस्य कपिलस्याग्निहोत्रिणः ॥२५॥
ब्राह्मणीच सुशर्माख्या तेभ्योऽदात् पृथगासनम् ।
स्वयञ्च पाययामास सलिलं स्वादुशीतलम् ॥२६॥
आगात्तदाच कपिलः पिशाच इव दारुणः ।
निरीक्ष्यचोपविष्टांस्तान् रुष्टोऽभाषिष्ट गेहिनीम्॥२७॥
मलिनानां किमेतेषां प्रवेशो मम वेश्मनि ।
पापीयसि त्वया दत्वाऽग्निहोत्रमशुचीकृतम् ॥२८॥

एवमाक्रोशिनं विप्रं क्रूरं रामानुजः क्रुधा ।
करीवारभतोद्धृत्य परिभ्रमयितुं दिवि ॥२९॥
रामोप्युवाच कोनाम कोपोऽस्मिन् कीटमात्रके ।
द्विजक्रूरं विब्रुवन्तमप्यमुं मुञ्च मानद ॥३०॥
रामाज्ञयाच सौमित्रिस्तंमुमोचशनै द्विजम् ।
ससीतालक्ष्मणोरामो निर्जगामच तद्गृहात् ॥३१॥
ते गच्छन्तः क्रमात्प्रापुररण्यमपरं महत् ।
कज्जलश्यामजलदः कालश्च समुपाययौ ॥ ३२॥
वर्षत्यब्देच काकुत्स्थ स्तस्थौ वटतरोरधः ।
वर्षाकालं वटेऽत्रैव नयाम इति चावदत् ॥३३॥
आकर्ण्यतद्वचोभीत स्तन्नग्रोधाधिदैवतम् ।
इभकर्णाभिधो यक्षो गोकर्णं स्वप्रभुं ययौ ॥३४॥
तं प्रणम्येत्यभाषिष्ट स्वामिन्नुद्वासित स्ततः ।
कैश्चि द्दुःसहतेजोभिर्निजावासाद्वटादहम् ॥३५॥
तत्कुरुष्व परित्राणमत्राणस्य मम प्रभो ।
ते हि स्थास्यन्ति सकलं प्रावृषं मद्वटद्रुमे ॥३६॥
गोकर्णोप्यवधिंज्ञात्वा चरूयाविति विचक्षणः ।
अर्च्याविती गृहायातावष्टमौ रामशार्ङ्गिणौ ॥३७॥
इत्युक्त्वा निशि तत्रैत्य नव योजनविस्तृताम् ।
द्वादशयोजनायामां धनधान्यादि पूरिताम् ॥३८॥

उत्तुङ्गवप्रप्रासादमारूढपूर्णापणावलिम् ।
पुरींरामपुरीं नामाकृत रामाय सोऽमरः ॥३६॥ युग्०
प्रातर्मङ्गलशब्देन प्रबुद्धो राम ऐक्षत ।
तं वीणाधारिणं यक्षं महर्द्धिं नगरीञ्च ताम् ॥४०॥
सोऽवोचद्विस्मितं रामं स्वामी त्वमतिथिस्त्वमे ।
गोकर्णनाम यक्षोऽहमकार्षं त्वत्कृते पुरीम् ॥४१॥
मया सपरिवारेण सेव्यमानो दिवानिशम् ।
इह तिष्ठ सुखं स्वामिन्यथाकालं यथारुचि ॥४२॥
इति तेनार्थितोरामो यक्षपुंभिर्निषेवितः ।
अवतस्थे सुखं तत्र सीतासौमित्रिसंयुतः ॥४३॥
इतश्च विप्रःकपिलः समिदादिकृते ऽन्यदा ।
भ्रामंस्तस्मिन्महारण्ये परशुपाणिः समाययौ ॥४४॥
स ददर्श पुरीं ताञ्च दध्यौ चेतसि विस्मयात् ।
मायेयमिन्द्रजालम्वा गान्धर्व्वमथवा पुरम् ॥४५॥
तत्रैकां मानुषीरूपां चारुनेपथ्यवाससाम् ।
सोऽपृच्छद्यक्षिणीं दृष्ट्वा कस्येयं नूतना पुरी ॥४६॥
सोचे गोकर्णयक्षेण कृतेयं नूतना पुरी ।
नाम्ना रामपुरी रामसीतासौमित्रिहेतवे ॥४७॥
दीनादिभ्यो ददात्यर्थमत्र रामो दयानिधिः ।
सर्व्वःकृतार्थीभूतोऽत्र योयो दुःस्थः समाययौ ॥४८॥

त्यक्त्वा सोपि समिद्भारं पतित्वा तत्पदाब्जयोः ।
उचे मया कथं रामो द्रष्टव्यः संश मेऽनघे ॥४९॥
साप्यवादीदत्र पुर्य्यामस्ति द्वारचतुष्टयम् ।
नित्यञ्च रक्ष्यते यक्षैः प्रवेशोऽमुत्र दुर्लभः ॥५०॥
पूर्व्वद्वारेऽत्र यच्चैत्यं तद्वंदित्वा यथाविधि ।
श्रावकीभूय चेद्यासि प्रवेशं लभसे तदा ॥५१॥
तद्गिरा कपिलोऽर्थार्थी साधूनामन्तिके ययौ ।
अभ्यवन्दत तान् साधून् धर्म्मं तेभ्योऽश्रृणोच्च सः॥५२॥
ततः स लघुकर्म्मत्वाद्विशुद्धः श्रावकोऽभवत् ।
गत्वौको धर्म्ममाख्याय भार्य्याञ्च श्राविकांव्यधात्॥५३॥
श्राजन्म दौस्थ्यदग्धौ तौ रामादर्थयितुं धनम् ।
उपेयतू रामपुरीं तच्च चैत्यं प्रणेमतुः ॥५४॥
राजवेश्म प्रविश्याऽथ मैथिलीरामलक्ष्मणान् ।
उपलक्ष्य विभायोच्चै र्दत्ताक्रोशान् द्विजःस्मरन् ॥५५॥
तं दृष्टमनसं सानुक्रोशः सौमित्रिरब्रवीत् ।
माभैषी र्भोद्विजायो चेदेह्यऽर्थं प्रार्थयस्व तत्॥५६॥
ततोऽपशङ्कः कपिलो गत्वा रामाय चाशिषम् ।
दत्वोपाविशदग्रेच गुह्यकैरर्प्पितासने ॥५७॥
कुतस्त्वमागतोसीति पृष्टो रामेण सोऽवदत् ।
किं मां नवेत्सि तं विप्रमरुणग्रामवासिनम् ॥५८॥

यूयं येनाऽतिथीभूता अपि दुर्व्वचसा मया।
आकृष्टामोचितोस्मात्स्मादृयुष्माभिश्च कृपापरैः॥५८॥
सुशर्म्मा ब्राह्मणी सापि प्रागृत्ताख्यानपूर्व्वकम्।
गत्वोपसीतं दीना यत्प्रदत्तासीत्प्राविशत्॥६०॥
ततः स विप्रो द्रविणैः कृतार्थीकृत्य भूरिभिः।
राघवेण विसृष्टः सन् स्वग्राममगमत्पुनः॥६१॥
प्रबुद्धो ब्राह्मणः सोऽपि दत्वा दानं यथारुचि।
नन्द्यावर्त्तंसस्त्रीणामन्तिके व्रतमग्रहीत्॥६२॥
अथ प्राट्ष्यतीतायां यियासुं प्रेक्ष्य राघवम्।
गोकर्णयक्षो विनयादेवमूचे कृताञ्जलिः॥६३॥
यद्यऽतो यास्यसि स्वामिंस्तत्प्रसीद क्षमस्व मे।
यदुक्तस्खलितं किञ्चिन्मनागप्यभवत्त्वयि॥६४॥
तवानुरूपाङ्कःपूजां कर्तुमीशो महाभुज।
इत्युक्त्वादत्तरामाय हारं नाम्ना स्वयंप्रभम्॥६५॥
सौमित्रयेच ताडङ्के दिव्यरत्नविनिर्म्मिते।
चूडामणिञ्च सीतायै वीणाञ्चेप्सितनादिनीम्॥६६॥
रामोऽनुमान्य तं यक्षं प्रतस्थे स्वेच्छया ततः।
तां पुरीमुपसंजह्रे सोपि यक्षः स्वयं कृताम्॥६७॥
ते क्रामन्तः प्रतिदिनं जानकीरामलक्ष्मणाः।
त्यक्त्वा रण्यानि विजयपुरं सन्ध्याक्षणे ययुः॥६८॥

तस्मिंश्च बहिरुद्याने महद्दिसि महीयसः ।
तले न्यग्रोधवृक्षस्य तेऽवात्सुर्वेश्म सन्निभे ॥६९॥
पुरे च तस्मिन्नभवद्राजा नाम्ना महीधरः ।
इन्द्राणीनाम तत्पत्नी वनमालेति तत्सुता ॥७०॥
वनमाला च बाल्येऽपि सौमित्रेर्गुणसम्पदम् ।
रूपञ्चाकर्ण्य तं मुक्त्वा नान्यं वरमियेष सा ॥७१॥
तदा प्रव्रजितं श्रुत्वा नृपं दशरथं तथा ।
निर्गतौ रामसौमित्री विषस्णोऽभून्महीधरः ॥७२॥
अदत्त चन्द्रे नगरे वृषभज्ञापजन्मने ।
नाम्ना सुरेन्द्ररूपाय वनमालां महीधरः ॥७३॥
वनमालापि तच्छ्रुत्वा मरणे कृतनिश्चया ।
तस्यां निश्येकाकिका दैवात्तदुद्यानमुपाययौ ॥७४॥
प्रविश्य तत्रायतने पूजयद्वनदेवताम् ।
जन्मान्तरेऽपि सौमित्रिः पतिर्मेऽस्त्वित्युवाच च॥७५॥
वनमाल वचःश्रुत्वा सा न्यग्रोधं ययोचतम् ।
प्रसुप्तजानकीराम यामिकेन प्रजाग्रता ॥७६॥
ददृशे लक्ष्मणेनैव वनमाला हितेरता
इदञ्च दध्यौ सौमित्रिः किमियं वनदेवता ।
अधिष्ठात्री वटतरोरथवा कापि यक्षिणी ॥७७॥
एवं चिन्तयतस्तस्य साऽध्याऽरोहद्वटद्रुमम् ।
करिष्यति किमिषेति लक्ष्मणोप्यारुरोह तम् ॥७८॥

सा प्रोचे प्राञ्जलिर्भूत्वा मातरो वनदेवताः ।
दिग्देव्यो व्योमदेव्यश्च सर्वाः शृण्वन्तु मद्वचः ॥७९॥
नाभूदिह भवे तावन्मम भर्त्ता स लक्ष्मणः ।
भूयाद्भवान्तरे तर्हि भक्तिस्तव ममास्ति चेत् ॥८०॥
इत्युदित्वा कण्ठपाशं विधायोत्तरवाससा ।
बद्धा च वटशाखायां द्राक् सात्मानमवलम्बयत् ॥८१॥
भद्रे मासाहसङ्कार्षीर्लक्ष्मणोऽहमिति ब्रुवन् ।
लक्ष्मणोऽपाश्य तत्पाशं तामादायोत्ततारच ॥८२॥
प्रबुद्धयोर्निशाशेषे लक्ष्मणो रामसीतयोः ।
शशंस वनमालाया वृत्तान्तं तमशेषतः ॥८३॥
ह्रियाऽवगुण्ठितमुखी वनमालापि तत्क्षणम् ।
जानकीरामचरणारविन्देभ्यो नमोऽकरोत् ॥८४॥
इतोपि च तदेन्द्राणी महीधरनृपप्रिया ।
वनमालामपश्यन्ती प्रचक्रे करुणस्वरम् ॥८५॥
वनमालान्वेषणाय निर्ययौ च महीधरः ।
इतस्ततः परिभ्राम्य स्वबलश्चाञ्च ददर्श ताम् ॥८६॥
हतहतैतान् कुमारी तस्करानिति भाषिषु ।
उद्गतेषु च सैन्येषूत्तस्थौ रामानुजः क्रुधा ॥८७॥
धनुष्यारोपयामास स ज्यां भाल इव भ्रुवम् ।
अकारयच्च टङ्कारं वैर्य्यहङ्कारहारकम् ॥८८॥

चचुमुस्तत्रसुः पेतुस्तद्धनुर्ध्वनिना परे ।
महीधरः पुरः स्थित्वा सौमित्रिं स्वयमैक्षत ॥७९॥
उपलक्ष्य ततोऽवादीज्ज्यामुत्तारय धन्वनः ।
सौमित्रे मत्सुतापुण्यैरिष्यमाणस्त्वमागतः ॥८०॥
उत्तारितज्ये सौमित्रौ सुस्थितः सन् महीधरः ।
प्रेक्ष्य रामं नमश्चक्रेऽवतीर्य स्यन्दनोत्तमात् ॥८१॥
उवाच च तवभ्रात्रेऽमुष्मै सौमित्रये मया ।
स्वयं जातानुरागेति कल्पितेयं पुराप्यभूत् ॥८२॥
इदानीमनयोर्जज्ञे मद्भाग्येन समागमः ।
जामाता लक्ष्मणस्त्वञ्च सम्बन्धो दुर्लभः खलु ॥८३॥
इत्युदित्वा महत्याच प्रतिपत्त्या महीधरः ।
निनाय जानकीराम लक्ष्मणान्निजसद्मनि ॥८४॥
तेषु तत्र च तिष्ठत्सु कदाचन सभास्थितम् ।
एत्यातिवीर्यराड्दूतो नृपमूचे महीधरम् ॥८५॥
नन्द्यावर्त्तपुराधीशोऽतिवीर्य्यो वीर्य्यसागरः ।
साहाय्यायाह्वयति त्वां जाते भरतविग्रहे ॥८६॥
भूयांसो भूभुजोऽप्येयु स्तस्य दाशरथे बले ।
तत्त्वमप्यतिवीर्य्येणाहूयसे सुमहाबलः ॥८७॥
अथैवं लक्ष्मणोऽपृच्छन् नद्यावर्त्तमहीभुजः ।
भरतस्याभुजा सार्द्धं किं विरोधनिबन्धनम् ॥८८॥

दूतोप्युवाच नः स्वामी भरताद्भक्तिमिच्छति ।
सतु प्रतीच्छति न तामिदं विग्रहकारणम् ॥९९॥
रामः पप्रच्छ तं दूतमतिवीर्य्यस्य सङ्गरे ।
समर्थो भरतः किंभो स्तत्सेवां यन्न मन्यते ॥२००॥
दूतोऽप्यूचे महावीर्य्योऽतिवीर्य्यस्तावद्देषनः ।
भरतोपि न सामान्य स्तद्द्वयोः संशयो जये ॥१॥
इत्युक्तवन्तं तं दूतमागच्छाम्येष सत्वरम् ।
इत्युक्त्वा व्यसृजद्राजा रामश्चैवमभाषत ॥२॥
अहो अज्ञत्वमेतस्याऽतिवीर्य्यस्याल्पमेधसः ।
यदस्मानयमाहूय भरतं योधयिष्यति ॥३॥
तत्सर्व्वसेनया गत्वाऽनुपलक्षितदौहृदा ।
अमुमेव हनिष्यामो भारतादिव शासनात् ॥४॥
ऊचे रामोऽत्र तिष्ठ त्वं त्वत्सुतैः सबलैः सह ।
तवाहमेव यास्यामि करिष्यामि यथोचितम् ॥५॥
एवमस्त्विति तेनोक्त स्तत्पुत्रबलसंयुतः ।
नन्द्यावर्त्तपुरं रामः ससीतालक्ष्मणो ययौ ॥६॥
उषितं बहिरुद्याने रामं तं क्षेत्रदेवता ।
अभाषत महाभाग किमभीष्टं करोमि ते ॥७॥
ननः किमपि कर्त्तव्यमित्युक्ते राघवेण तु ।
साऽप्यवादेवमेतद्धि तथाप्युपकरोम्यहं ॥८॥

अतिवीर्य्यो जितः स्त्रीभिरिति तस्यायशस्कृते ।
ससैन्यस्य करिष्यामि स्त्रीरूपं कामिकं तव ॥९॥
स्त्रीराज्यमिव तत्सैन्यं स्त्रीरूपमभवत्क्षणात् ।
स्त्रीरूपौ रामसौमित्री चाभूतां सुन्दराकृती ॥१०॥
महीधरेण स्वं सैन्यं तव साहाय्य हेतवे ।
प्रैषीदमिति राम स्तं द्वास्थेनाज्ञापयन्नृपम् ॥११॥
अतिवीर्य्योप्युवाचैवं स्वयं नागान्महीधरः ।
हतं तदस्य सैन्येन मुमूर्षो र्बज्ञमानिनः ॥१२॥
जेष्याम्येकोपि भरतं साहाय्य किं ममापिहि ।
निर्वास्यतां द्रुतमिदं तत्सैन्यमयशस्करम् ॥१३॥
अथान्यः कश्चिदप्यूचे स्वयमागान्न केवलम् ।
सप्रत्युवाचोपहासाय स्त्रीसैन्यं प्राहिणोदिह ॥१४॥
तच्छ्रुत्वा सुमहाक्रोधं नन्द्यावर्त्तेश्वरोऽकरोत् ।
स्त्रीरूपधारिणस्तेच रामाद्या द्वारमाययुः ॥१५॥
आदिक्षदतिवीर्य्योपि दासीवद्दिमिकाः स्त्रियः ।
गाढ़ं गृहीत्वा ग्रीवासु निर्वास्यन्तां पुराद्बहिः ॥१६॥
समन्तात्तस्य सामन्ता उत्थाय सपदातयः ।
स्त्रीसैन्यं तदुपद्रोतुं प्रावर्त्तन्त महाभुजाः ॥१७॥
रामभद्रो भुजस्तम्भेनेभस्तंभमथोच्चकैः ।
समुत्पाट्यायुधीकृत्य तान् शमन्तादपातयत् ॥१८॥

तेन सामन्तभङ्गेनातिवीर्य्यः कुपितोऽग्रम् ।
रणाय स्वयमुत्तस्थौ खड्गमाकृष्य भीषणम् ॥१८॥
अथ तत् खड्गमाच्छिद्य लक्ष्मणस्तत्क्षणादपि ।
तमाचकर्ष केशेषु तद्वस्त्रेण बबन्ध च ॥२०॥
मृगं व्याघ्र इवादाय तं नृव्याघ्रश्चचाल सः ।
दृश्यमानोजनैः पौरैस्तत्रास तरलेक्षणैः ॥२१॥
अथ तं मोचयामास मैथिली करुणापरा ।
सद्योभरतसेवाञ्च सौमित्रिः प्रत्यपादयत् ॥२२॥
स्त्रीवेषमथ सञ्जह्रे सर्व्वेषां क्षेत्रदेवता ।
अज्ञासीदतिवीर्य्योऽपि तौ तदा रामलक्ष्मणौ ॥२३॥
अतिवीर्य्यस्तयोः पूजां महतीं विदधे ततः ।
दध्यौ च मानध्वंसेन मानी वैराग्यमुच्चकैः ॥२४॥
किं सेविष्येऽहमप्यन्यमित्यहङ्कारभाग् हृदि ।
दीक्षार्थे विजयरथे पुत्रे राज्यं न्यधत्त सः ॥२५॥
द्वितीयो भरतो मेऽसि शाधिष्मः प्रव्रजस्म मा ।
रामेणेत्यं निषिद्धोपि स प्राव्राजीन्महामनाः ॥२६॥
तत्सूनुर्विजयरथो रतिमालाभिधां निजाम् ।
लक्ष्मणाय ददौ जामिन्तां प्रतीयेष लक्ष्मणः ॥२७॥
ययौ ससैन्योविजयपुरं रामोपि पत्तनम् ।
अयोध्यां विजयरथो भरतं सेवितुं पुनः ॥२८॥

विज्ञाततद्वृत्तान्तोपि भरतोगरिमाचलः।
सच्चकार तमायातं सन्तोहि नतवत्सलाः॥२९॥
कनिष्ठां रतिमालाया नाम्ना विजयसुन्दरीम्।
ददौ स्वसारं स्त्रीसारं भरताय स भूभुजे॥३०॥
तदा च विहरं स्तत्रातिवीर्य्यो मुनिराययौ।
वन्दित्वा चमयाञ्चक्रे भरतेन स भूभुजा॥३१॥
विसृष्टः सप्रसादेन भरतेन महीभुजा।
सानन्दोविजयरथो नन्द्यावर्त्तपुरं ययौ॥३२॥
महीधरमनुज्ञाप्य रामे गन्तुं समुद्यते।
वनमालाञ्च पप्रच्छ यियासुरथ लक्ष्मणः॥३३॥
जगाद वनमालापि वाष्पपूर्णविलोचना।
प्राणत्राणं तदाकार्षीः प्राणेश मम किं मुधा॥३४॥
वरं भवेत्सुखं मृत्युः तदैव मम वल्लभ।
तत्वद्वैधसमिदं दुःखं त्वद्विरहोत्थितम्॥३५॥
अद्यैव परिणीय त्वं सहैव नय मां प्रभोः;
तद्वियोगक्कलं प्राप्य नेष्यत्यपरथान्तकः॥३६॥
अन्वनैषील्लक्ष्मणोथ भ्रातुः शुश्रूषकोह्यहम्।
शुश्रूषाविघ्नकृन्माभूः सहायान्तो मनस्विनि॥३७॥
प्रापय्याभीप्सितं स्थानं ज्यायांसं वरवर्णिनि।
त्वां समेष्यामि भूयोपि स्तवाव्य हृदयेह्यसि॥३८॥

घोरेभ्यः श्वपथेभ्यो यं त्वङ्कारयसि मानिनि ।
तं करोमि पुनरिहागमप्रत्ययहेतवे ॥३९॥
न चेदायामि भूयोऽपि तदहं रात्रिभोजनाम् ।
गृह्णेऽयं सेतिशपथं सौमित्रिः कारितस्तया ॥४०॥
रात्रिशेषे ततो रामः ससीतालक्ष्मणोऽचलत् ।
क्रमाद्वनानि लंघित्वा प्राप क्षेमाञ्जलिं पुरीम् ॥४१॥
रामस्तद्बहिरुद्याने वन्याहारः फलादिभिः ।
बुभुजे लक्ष्मणानीतैर्जानकीकरसंस्कृतैः ॥४२॥
तत्र राममनुज्ञाप्य कौतुकात्प्राविशत्पुरीम् ।
सौमित्रिस्तत्र चाश्रौषीदुच्चैराघोषणामिति ॥४३॥
शक्तिप्रहारं सहते योऽमुष्य पृथिवीपतेः ।
तस्मै परिणयनाय ददात्येष स्वकन्यकाम् ॥४४॥
तेन चाघोषणाहेतुं पृष्ट एकोऽवदत्पुमान् ।
अत्रास्ति शत्रुदमनो नाम राजा महाभुजः ॥४५॥
तस्यास्ति कनका देवी कुक्षिजा वरकन्यका ।
जितपद्मेति पद्मायाः साङ्गैकं पद्मलोचना ॥४६॥
वरस्योजः परीक्षार्थमिदमारभ्यते ततः ।
प्रत्यहं क्ष्माभुजाऽनेन तादृग्जोनेति कोपि ना ॥४७॥
श्रुत्वेत्थं लक्ष्मणोऽगच्छत्तं राजानं सभास्थितम् ।
कुतोहेतोः कुतस्त्यस्त्वं तत्पृष्टश्चैवमब्रवीत् ॥४८॥

अहं भरतदूतोऽस्मि गच्छन्नर्थेन केनचित् ।
तव कन्यामिमां श्रुत्वा परिणेतुमिहागमम् ॥४९॥
सहिष्यसे शक्तिवातं ममेत्युक्तो महीभुजा ।
किमेकेन सहिष्येहं पञ्चेत्यूचे च लक्ष्मणः ॥५०॥
जितपद्मा तदानीञ्च तत्रागाद्राजकन्यका ।
बभूव लक्ष्मणं प्रेक्ष्य क्षणाच्च मदनातुरा ॥५१॥
तया सद्योऽनुरागिण्या वार्य्यमाणोपि भूपतिः ।
चिक्षेप लक्ष्मणायाशु दुःसहं शक्तिपञ्चकम् ॥५२॥
द्वे कराभ्यां द्वे कक्षाभ्यां दन्तैरेकाञ्च लक्ष्मणः ।
अग्रहीज्जितपद्मायाः कन्याया मनसा सह ॥५३॥
जितपद्माऽक्षिपत्तत्र स्वयं वरणमालिकाम् ।
उदुह्य तामियं कन्येत्यब्रवीत्यार्थिवोपितम् ॥५४॥
लक्ष्मणोप्यवदद्बाह्योपवनेस्ति ममाग्रजः ।
रामो दाशरथि स्तेन परतन्त्रोस्मि सर्व्वदा ॥५५॥
तौ रामलक्ष्मणौ ज्ञात्वा तत्क्षणं स क्षमापतिः ।
गत्वा रामं नमस्कृत्य स्ववेश्मन्यानिनाय च ॥५६॥
महत्या प्रतिपत्त्या स राजा राममपूजयत् ।
सामान्योप्यतिथिः पूज्यः किं पुनः पुरुषोत्तमः ॥५७॥
ततोपि चलिते रामे सौमित्रिस्तं महीपतिम् ।
उवाच परिणेष्यामि व्यावृत्तस्त्वत्सुतामिति ॥५८॥

निशायां निर्ययौ रामः प्राप सायञ्च पत्तनम् ।
वंशस्थलं नाम वंशशैलाभ्याद्रितटस्थितम् ॥ ५९ ॥
तस्मिन् स भूपतिं लोकमालुलोके भयाकुलम् ।
पप्रच्छ च नरं कञ्चिद्राम स्तद्भयकारणम् ॥ ६० ॥
आचख्यौ पुरुषो सोपि तार्त्तीयीकोद्य वासरः ।
अमुष्मिन्पर्वते रात्रौ रौद्रश्चोच्छलितोध्वनेः ॥ ६१ ॥
तद्भयाद्रात्रिमन्यत्र गमयत्यखिलो जनः ।
प्रातश्च पुनरायाति कष्टा नित्यमियं स्थितिः ॥ ६२ ॥
ततश्च कौतुकाद्रामः प्रेरिते लक्ष्मणेन च ।
तत्रारुरोहाऽपश्यच्च कायोत्सर्गस्थितौ मुनी ॥ ६३ ॥
भक्त्या ववन्दिरे तौ तु जानकी रामलक्ष्मणाः ।
तदग्रेऽवादयद्रामो गोकर्णार्पित वल्लकीम् ॥ ६४ ॥
हृद्यं जगौ च सौमित्रिर्ग्रामरागमनोहरम् ।
चित्राङ्गहारकरणं सीतादेवी ननर्त्त च ॥ ६५ ॥
तदा चास्तं ययावर्को जजृम्भे च विभावरी ।
विकृताऽनेकावतालश्चागाद्देवोऽनलप्रभः ॥ ६६ ॥
स्वयं वेतालरूपः सोऽट्टहासैः स्फोटयन्नभः ।
महर्षी तावुपद्रोतुं प्रावर्त्तत दुराशयः ॥ ६७ ॥
मुक्त्वोपसाधु वैदेहीं सन्नद्धौ रामलक्ष्मणौ ।
उत्तस्थाते तं निहन्तुमकाले कालवां गतौ ॥ ६८ ॥

सोऽपि देवस्तयोस्तेजः प्रसरं सोढुमक्षमः ।
निजं स्थानं ययौ साध्वोस्तयोश्चाजनि केवलम् ॥६९॥
देवैश्च केवलज्ञानमहिमा विदधे तयोः ।
नत्वा रामश्च पप्रच्छोपसर्गविधिकारणम् ॥७०॥
तत्राख्यादेको महर्षिराख्यया कुलभूषणः ।
आसीन्नगर्य्यां पद्मिन्यां राजा विजयपर्व्वतः ॥७१॥
तस्याऽमृतस्वराख्योऽभूद् दूतो दूतस्य तस्य च ।
भार्य्योपयोगा तत्पुत्रावुदितो मुदितोऽपि च ॥७२॥
वयस्यस्तस्य दूतस्य वसुभूतिरिति द्विजः ।
उपयोगा तदासक्ता जिघांसदमृतस्वरम् ॥७३॥
नृपादेशाद्विदेशायाऽन्यदागादमृतस्वरः ।
सह गच्छन् वसुभूतिर्मार्गे तञ्चावधीच्छलात् ॥७४॥
वसुभूतिः पुरीमेत्य जनायैवमवोचत ।
कुतोऽपि कार्य्यादमृतस्वरेणाहं निवर्त्तितः ॥७५॥
शशंस चोपयोगायाः सतौ सम्भोगविघ्नकृत् ।
मया व्यापादितो मार्गे छलं लब्ध्वाऽमृतस्वरः ॥७६॥
साप्यूचे साधु कार्षीस्त्वं जहि पुत्राविमावपि ।
अस्तु निष्कण्टकमिति सोऽपि तत्प्रत्यपद्यत ॥७७॥
दैवाच्छ्रुत्वा च तं मन्त्रं वसुभूतिसधर्म्मिणी ।
ईर्ष्ययाख्यच्च तत्सून्वोर्मुदितस्योदितस्य च ॥७८॥

उदितेन रुषा सद्यो वसुभूतिर्निपातितः ।
मृत्वैष नलपल्ल्यां स म्लेच्छः समुदपद्यत ॥७९॥
धर्म्मं श्रुत्वान्यदा राज्यमहर्षे र्मतिवर्द्धनात् ।
प्रव्रज्यामाददे तावप्युदितो मुदितोऽपि च ॥८०॥
समेते वन्दितुञ्चैत्यान्युदितो मुदितोऽपि च ।
प्रचेलतुः पथि भ्रान्तौ पल्लीं ताञ्च समेयतुः ॥८१॥
पूर्व्ववैराद्वसुभूतिर्जीवो म्लेच्छो निरीक्ष्य तौ ।
हन्तुं दध्यौ च स म्लेच्छपतिना चन्यषिध्यत ॥८२॥
म्लेच्छेशः प्राग्भवे सोऽभूत् मृगो व्याधाच्च मोचितः ।
मुदितोदितजीवाभ्यां कर्षकाभ्याञ्च तद्भवे ॥८३॥
तेन म्लेच्छाधिपेनात स्त्रातौ सस्नेहमेत्य च ।
तौ चैत्यानि ववन्दाते विजह्राते चिराय च ॥८४॥
विधायाऽनशनं मृत्वा महाशुक्रे सुरोत्तमौ ।
तौ सुन्दरसुकेशाख्यावजायेतां महर्द्धिकौ ॥८५॥
भ्रान्त्वा भवं वसुभूतिर्जीवो म्लेच्छः कथञ्चन ।
अवाप मानुषं जन्म तत्र सोऽभूच्च तापसः ॥८६॥
स विपद्य समुत्पेदे ज्योतिःकेषु सुरेषु तु ।
धूमकेतुर्नाम देवो मिथ्यादृष्टिर्दुराशयः ॥८७॥
उदितमुदितजीवौ शुक्राच्च्युत्वात्र भारते ।
महापुरेऽरिष्टपुरे प्रियम्वदमहीपतेः ॥८८॥

पद्मावत्यां सधर्म्मिण्यामजायेतामुभौ सुतौ ।
नामतो विश्रुतौ रत्नरथश्चित्ररथाविति ॥८९॥
धूमकेतुरपि च्युत्वा पत्न्यां तस्यैव भूपतेः ।
बभूव कनका भार्य्या नाम्ना सूनुरनुद्धरः ॥९०॥
अभूत्समत्सरो रत्नरथे चित्ररथे च सः ।
तस्योपरि न मात्सर्य्यं बिभराञ्चक्रतु स्तुतौ ॥९१॥
न्यस्य रत्नरथे राज्यं यौवराज्यं द्वयोः पुनः ।
प्रियम्वदः षड्दिनानि प्रायं कृत्वा सुरोऽभवत् ॥९२॥
राज्यं पालयतो रत्नरथस्यैको नृपो ददौ ।
श्रीप्रभां नाम कन्यां स्वां याच्यमानेऽप्यनुद्धरे ॥९३॥
क्रुद्धोऽथानुद्धरो रत्नरथस्योर्वीं मलुण्टयत् ।
पातयित्वा रणे रत्नरथेन जगृहे च सः ॥९४॥
विडम्ब्य बहुधा रत्नरथेन मुमुचेऽथ सः ।
तापसोऽभूच्च स्त्रीसङ्गान् मोघीचक्रे निजं तपः ॥९५॥
ततो मृत्वा भवं भ्रान्त्वा चिरान् मर्त्यो बभूव सः ।
तापसीभूय भूयोऽपि चकाराऽज्ञानकं तपः ॥९६॥
मृत्वाऽनलप्रभः सोयं ज्योतिष्कस्त्रिदशोऽभवत् ।
दीक्षां रत्नरथचित्ररथौ जगृहतु स्ततौ ॥९७॥
विपद्य चाच्युतकल्पेऽतिबलोऽथ महाबलः ।
नामधेयेन जज्ञाते त्रिदशौ प्रवरर्द्धिकौ ॥९८॥

व्युत्वा च सिद्धार्थपुरे च्चेमङ्करमहीपतेः।
महिष्या विमलादेव्याः स्तौ कुक्षाववतेरतुः॥९९॥
क्रमाद्‌जनिषाव्ताञ्च विमलायामुभौ सुतौ।
कुलभूषण एषोऽहं तथाऽयं देशभूषणः॥१००॥
उपाध्यायस्य घोषस्यार्पितौ पाठाय भूभुजा।
अपठाव: कलाः सर्वा द्वादशाब्दमवस्थितौ॥१॥
त्रयोदशेऽब्दे घोषेण सहायातौ नृपान्तिके।
राजवेश्मन्यपश्याव: कन्यां वातायनस्थिताम्॥२॥
जातानुरागौ तस्याञ्च सद्योपि विमनायितौ।
अगमावान्तिकं राज्ञो दर्शयावोऽखिलाः कलाः॥३॥
उपाध्यायोऽर्चितो राज्ञा जगाम निजमन्दिरम्।
आवाञ्च मातरं रन्तुं गतौ राजाज्ञया ततः॥४॥
तत्र चावामपश्याव तां कन्यां मातुरन्तिके।
असंसज्ञाप्ना युवयोः स्वसेयं कनकप्रभा॥५॥
घोषोपाध्यायसदने युवयोस्तस्थुषोः सतोः।
जातेयं वत्सौ तेनेमां नोपलक्षयथो युवाम्॥६॥
तच्छ्रुत्वा लज्जितावावामज्ञानात्स्वसृकाङ्क्षिणौ।
क्षणाद्वैराग्यमापन्नौ प्राव्रजावान्तिके गुरोः॥७॥
तप्यमानौ तपस्तीव्रमिहायातौ महागिरौ।
कायोत्सर्गेण वास्थावनिरपेक्षौ वपुष्यपि॥८॥

पिताऽवयोर्वियोगेन गृहीत्वाऽनशनं मृतः ।
गरुडेशो भवद्देवो महालोचननामकः ॥९॥
विज्ञायासनकम्पेन चोपसर्गं स आवयोः ।
स प्रत्ययमिहायातः प्राग्जन्मस्नेहपीडितः ॥१०॥
अनलप्रभदेवः सोऽनन्तवीर्य्यमहामुनेः ।
पार्श्वे केवलिनोऽगच्छत्सह देवैः कुतूहलात् ॥११॥
देशनान्ते तेऽनन्तवीर्य्यः पृष्टः शिष्येण केनचित् ।
मुनिसुव्रततीर्थेऽस्मिन् कः पश्चात्तव केवली ॥१२॥
सोप्याख्यन्मन्निर्वाणे केवली कुलभूषणः ।
देशभूषण इति च भ्रातरौ द्वौ भविष्यतः ॥१३॥
तच्छ्रुत्वाऽनलप्रभः श्रुत्वा निजं स्थानमुपेत्य च ।
विभङ्गेनान्यदा ज्ञात्वा कायोत्सर्गस्थिताविह ॥१४॥
मिथ्यात्वेनानन्तवीर्य्यवचनं कर्तुमन्यथा ।
प्राग्जन्मवैराच्च स नावुपद्रुद्राव दारुणम् ॥१५॥
दिनान्यतीयुश्चत्वारि तस्योपद्रवतो दृढम् ।
अद्यायातो युवामत्र युष्मद्भीत्याऽनशच्च सः ॥१६॥
कर्म्मक्षयादावयोश्च केवलं समजायत ।
कर्म्मक्षये सहायोऽयमुपसर्गपरोप्यभूत् ॥१७॥
महालोचनदेवोपि तदोचे गरुडाधिपः ।
काकुत्स्थ साध्वकार्षीस्त्वं किं प्रत्युपकरोमि ते ॥१८॥

नार्थीनः कश्चिदप्यस्तीत्युक्ते रामेण सोऽमरः ।
तथाप्युपकरिष्यामि क्वापीत्युक्त्वा तिरोदधे ॥१९॥
अथ वंशस्थलाधीशो राजा नाम्ना सुरप्रभः ।
तत्रागत्य नमस्चक्रे राममानर्च्च चोच्चकैः ॥२०॥
रामाज्ञया तत्र शैले सोऽर्हच्चैत्यान्यकारयत् ।
रामनाम्ना रामगिरिर्गिरिः सोऽभूत्तदादि च ॥२१॥
सुरप्रभमथापृच्छ्य प्रतस्थे रघुपुङ्गवः ।
उद्दस्थं दण्डकारण्यं प्रविवेश च निर्भयः ॥२२॥
विधाय तत्र चावासं महागिरिगुहागृहे ।
काकुत्स्थः सुस्थितस्तस्थौ स्वकीय इव वेश्मनि ॥२३॥
तत्र भोजनवेलायामन्ये द्युचारणौ मुनी ।
नाम्ना त्रिगुप्तसुगुप्तौ नभसा समुपेयतुः ॥२४॥
द्विमासोपोषितौ तौ तु पारणार्थमुपस्थितौ ।
भक्त्या ववन्दिरे रामसीतासौमित्रयस्त्रयः ॥२५॥
यथोचितैरन्नपानैः सीता तौ प्रत्यलाभयत् ।
तदा देवैर्विदधिरे रत्नगन्धाम्बुवृष्टयः ॥२६॥
तदा रत्नजटीकम्बुद्वीपविद्याधरेश्वरः ।
द्वौ सुरौ चैत्य रामाय प्रीताः साश्वं रथन्ददुः ॥२७॥
गन्धाम्बुवृष्टिगन्धेन तत्र गन्धाभिधः खगः ।
उत्तीर्य्य पादपाद्भोगी तद्वात्तन्व्यः समाययौ ॥२८॥

सञ्जाति जातिस्मरणो मुनेर्दर्शनमात्रतः ।
पपात मूर्च्छया भूमौ सीताऽम्भोभिः सिषेच तम् ॥२९॥
लब्धसंज्ञः समुत्थाय साधु पादेषु सोऽपतत् ।
साधोः स्पर्शौषधीलब्ध्या नीरोगश्चाभवत्क्षणात् ॥३०॥
पक्षौ हैमावजायेतां चञ्चुर्विद्रुमविभ्रमा ।
पद्मरागप्रभौ पादौ नानारत्नप्रभं वपुः ॥३१॥
रत्नाङ्कुरश्रेणिनिभजटाः शिरसि चाभवन् ।
जटायुर्नाम तस्याऽभूत्ततः प्रभृति पक्षिणः ॥३२॥युग्मम्॥
रामोऽपृच्छन्महर्षिं तं गृध्रः क्रव्यादयं कुधीः ।
स्थित्वा वः पादयोःपार्श्वे शान्तःकस्मादजायत ॥३३॥
भवन्तावयमत्यन्तविरूपावयवः पुरा ।
कथमस्य क्षणाज्जातो हेमरत्नोत्करद्युतिः ॥३४॥
सुगुप्तर्षिस्त्वाचख्यावासीदिह पुरा पुरम् ।
कुम्भकारकुटं नाम राजा तत्रैष दण्डकः ॥३५॥
अन्यदा श्रावकेनापि जितशत्रुर्नृपान्तिके ।
प्राहिणोद्दण्डका दूतं पालकं नामतो द्विजः ॥३६॥
जितशत्रुः सदाचारैर्धर्मगोष्ठीपरोऽभवत् ।
आरेभे पालकस्तस्य धर्मं दूषयितुं कुधीः ॥३७॥
स स्कन्दककुमारेण मिथ्यादृष्टिर्दुराशयः ।
युक्त्या निरुत्तरी चक्रे सत्यसम्वादपूर्वकम् ॥

तदा स हसितः सर्व्वैरमर्षं स्कन्दके दधत्।
विसृष्टश्चान्यदा राज्ञः कुम्भकारकटं ययौ ॥३९॥
विरक्तश्चान्यदा पञ्च राजपुत्रशतान्वितः।
मुनिसुव्रतपादान्ते स्कन्दको व्रतमाददे ॥४०॥
पुरन्दरयशोऽमुष्य लोकं बोधयितुं पुरे।
कुम्भकारकटे यामीत्यापप्रच्छे स च प्रभुम् ॥४१॥
उवाच प्रभुरप्येवं तत्र ते मारणान्तिकः।
गतस्य सपरीवारस्योपसर्गो भविष्यति ॥४२॥
वयमाराधका स्तव भाविनो वानवेत्यथ।
भूयोऽपि स्कन्दकोऽपृच्छत् स्वामिनं मुनिसुव्रतम् ॥४३॥
त्वां विनाराधकाः सर्व्वेऽपीत्याख्यद्भगवानपि।
सर्व्वमेतर्हि संपूर्णमित्युक्त्वा स्कन्दकोऽचलत् ॥४४॥
क्रमेण स्कन्दकाचार्य्यो मुनिपञ्चशतीवृतः।
गच्छन्नासादयामास कुम्भकारकटं पुरम् ॥४५॥
तं दृष्ट्वा पालकः क्रूरः संस्मरंस्तं पराभवम्।
साधूपयोग्योद्यानेषु शस्त्राण्युर्व्यामखानयत् ॥४६॥
उद्याने स्कन्दकाचार्य्य एकस्मिन् समवासरत्।
आययौ वन्दितुं तञ्च दण्डकः सपरिच्छदः ॥४७॥
स्कन्दकोदेशनां चक्रे जहृषुर्बहवो जनाः।
प्रहृष्टो देशनान्ते च वेश्मागाद्दण्डको नृपः ॥४८॥

गत्वा रहसि राजानमित्यूचे पालकः कुधीः ।
स्वामिन्नेष वकाचारः पाषण्डीस्कन्दकः खलु ॥४९॥
सहस्रयोधिभिः पुंभिर्मुनिवेषधरैरसौ ।
त्वां हत्वा राज्यमादातुमागादिह महाशठः ॥५०॥
अतोद्याने स्वस्थाने च मुनिर्वेषैर्महाभटैः ।
छन्नं चिप्तानि शस्त्राणि दृष्ट्वा प्रत्येतु भूपतिः ॥५१॥
ततस्तत्राखानयद्राजा मुनिस्थानानि सर्वतः ।
चिप्तान्यस्त्राण्यपश्यच्च विषादञ्च परं ययौ ॥५२॥
अविचार्य्य ततो राजाऽप्यादिदेशेति पालकम् ।
साधुमन्त्रिंस्त्वया ज्ञातं चक्षुष्मान् भवताद्यहम् ॥५३॥
कर्तुं त्वमेव जानासि दुर्मतेरस्य चोचितम् ।
तत्कुरुष्व न भूयोपि प्रष्टव्योऽहं महामते ॥५४।
इत्युक्तः पालकः शीघ्रं गत्वा यन्त्रमकारयत् ।
स्कन्दकस्याग्रतः साधूनेकैकञ्च न्यपीलयत् ॥५५॥
निःपील्यमानानेतांस्तु देशनापूर्वकं स्वयम् ।
अकारयत् स्कन्दकोपि सम्यगाराधनाविधिम् ॥५६॥
उपनीते शिशौ नीते परिवारान्तिमे मुनौ ।
कारुण्यात् स्कन्दकाचार्य्य इत्यभाषत पालकम् ॥५७॥
आदौ पीलय मामेव कुरुष्वैतद्वचो मम ।
बालिं मुनिं न पश्यामि पील्यमानं यथाद्यसुम् ॥५८॥

तत्पीडापीडितं ज्ञात्वा स्कन्दकं पालकोपि हि ।
तमेव बालकमुनिं तत्पीडार्थमपीलयत् ॥५९॥
उत्पन्नकेवलाः सर्वेप्यवापुः पदमव्ययम् ।
प्रत्याख्याय स्कन्दकस्तु निदानमिति निर्ममौ ॥६०॥
दण्डकस्य पालकस्य तथात्र कुलराष्ट्रयोः ।
व्यापादनाय भूयासन्तपसोऽस्य फलं यदि ॥६१॥
एवं कृतनिदानः सन् पीलितः पालकेन सः ।
देवोवह्निकुमारोऽभूत् कालाग्निरिव तत्क्षणे ॥६२॥
पुरन्दरयशोदत्त रत्नकं वलतन्तुजम् ।
तद्रजोहरणं रक्तेनाक्तं शकुनिकाऽहरत् ॥६३॥
दोर्दण्डबुध्या यत्नेन गृहीतमपि तत्वतः ।
पुरः पुरन्दरयशो देव्या दैवात्पपात सः ॥६४॥
विदाञ्चकार साभर्त्तुर्महर्षेर्विपदं ततः ।
किमकार्षीः पापमित्याक्रोशच्च दण्डकम् ॥६५॥
तां शोकमग्नामुद्धृत्यानैषीच्छासनदेवता ।
मुनिसुव्रतपादान्ते प्रव्रज्यामाददे च सा ॥६६॥
स्कन्दकोऽग्नेः कुमारोपि प्राग्जन्मावधिनाविदन् ।
स पालकं सपूर्लोकमदहद्दण्डकं नृपम् ॥६७॥
तदादि दण्डकारण्यमिदं दारुणमुद्वसम् ।
दण्डकस्याभिधानेन वभूव भुवि विश्रुतम् ॥६८॥

दण्डकोपि भवेभ्रान्त्वा दुःखखानिषु योनिषु ।
गन्धाख्योऽयमभूत्पक्षी महारोगी स्वकर्म्मभिः ॥६९॥
अस्याऽस्मद्दर्शनाज्जातिस्मरणं समजायत ।
अस्मत्स्पर्शौषधीलब्ध्या रोगाश्च क्षयमासदन् ॥७०॥
तच्छ्रुत्वा मुदितः पक्षी भूयोपि मुनिपादयोः ।
पपात धर्म्मञ्चाश्रौषीच्छ्रावकत्वञ्च शिश्रिये ॥७१॥
जीवघातपलाहाररात्रिभोजनकर्म्मणाम् ।
प्रत्याख्यानं ददौ तस्येप्सितं ज्ञात्वा महामुनिः ॥७२॥
इत्यूचे च मुनी रामं साधर्मिक इहैष वः ।
साधर्मिकेषु वात्सल्यमुक्तं श्रेयस्करञ्जिनैः ॥७३॥
बन्धुर्न एष परम इत्युक्त्वा राघवेण तौ ।
वन्दितौ नभसोत्पत्य मुनी जग्मतुरन्यतः ॥७४॥
तं दिव्यं रथमारुह्य जानकीरामलक्ष्मणाः ।
विजह्रुः क्रीडयाव्यक्तसहचारिजटायवः ॥७५॥
पातालङ्कायां च खरचन्द्रणखात्मजौ ।
सम्बूकसुन्दनामानावभूतां नवयौवनौ ॥७६॥
पितृभ्यां वार्य्यमाणोपि दण्डकारण्यमन्यदा ।
सम्बूकः सूर्य्यहासासि साधनार्थमुपेयिवान् ॥७७॥
सोऽथ क्रौञ्चरवातीरे स्थित्वान्तर्वंशगह्वरम् ।
वारयिष्यति मां यस्तं हनिष्यामीत्यवोचत ॥७८॥

एकान्नभुग्विशुद्धात्मा ब्रह्मचारी जितेन्द्रियः ।
अधोमुखो वटशाखानिबद्धचरणद्वयः ॥७९॥
विद्यां जपितुमारेभे सूर्य्यहासासिसाधिनीम् ।
सप्ताहाग्रद्वादशाब्दादथ सिद्धिमुपगच्छति ॥८०॥
एवञ्च तस्थुषस्तस्य वल्गुलीस्थानकस्पृशः ।
वर्षाणि द्वादशातीयुश्चत्वारि दिवसानि च ॥८१॥
सेद्धुकामः सूर्य्यहासः प्रत्याकारतिरोहितः ।
स्फूर्य्यत्यरिमखो व्योम्ना तत्र गाढंशगह्वरे ॥८२॥
क्रीडयेतस्ततो भ्राम्यंस्तत्र सौमित्रिराययौ ।
ददर्श सूर्य्यहासासिं सूर्य्यस्येव करोत्करम् ॥८३॥
तं खड्गमाददे सोऽथ प्रत्याकारञ्चकर्ष च ।
अपूर्व्वशस्त्रालोके हि क्षत्रियाणां कुतूहलम् ॥८४॥
तत्तीक्ष्णत्वपरीक्षार्थं तत्क्षणं तेन लक्ष्मणः ।
अभ्यर्णस्थां वंशजालीं नलतीवं लुलाव च ।८५॥
वंशजालान्तरस्थस्य सम्बूकस्याथ कर्त्तितम् ।
भूतले मौलिकमलं सोऽपश्यत्पतितं पुरः ॥८६॥
प्रविवेशाग्रतो यावत् सौमित्रिर्वंशगह्वरम् ।
तावत्कवन्धमैक्षिष्ट वटशाखावलम्बिनम् ॥८७॥
अयुध्यमानोऽशस्त्रश्च पुमान्कोपि हतो मया ।
अमुना कर्मणा धिग्मामित्यात्मानं निनिन्द सः ॥८८॥

गत्वा च रामभद्राय तदशेषं शशंस सः।
असिञ्च दर्शयामास रामोऽप्येवमभाषत ॥८९॥
असावसिः सूर्य्यहासः साधकोऽस्य त्वया हतः।
अस्य सम्भाव्यते नूनं कश्चिदुत्तरसाधकः ॥९०॥
अत्रान्तरे दशग्रीवस्वसा चन्द्रणखाऽभिधा।
मत्सूनोः सूर्यहासोद्य सेत्स्यतीति कृतत्वरा ॥९१॥
पूजापानान्नसहिता तत्र प्रमुदिता ययौ।
ददर्श च शिरःसूनोश्छिन्नं लुलितकुण्डलम् ॥९२॥
क्वासि हा वत्स सम्बूक शम्बूकेति रुदत्यथ।
अपश्यल्लक्ष्मणस्याङ्घ्रिन्यासपंक्तिं मनोहराम् ॥९३॥
मम सूनुर्हतोऽनेन तस्येयं पदपद्धतिः।
इति तत्पदपद्धत्या द्रुतं चन्द्रणखा ययौ ॥९४॥
यावत्किञ्चिदगात्तावत्सीतालक्ष्मणयोः पुरः।
नेत्राभिरामं रामं साऽपश्यत्तरुतले स्थितम् ॥९५॥
निरीक्ष्य रामं सा सद्यो रिरंसाविवशाऽभवत्।
कामावेशः कामिनीनां शोकोद्रेकेऽपि कोऽप्यहो ॥९६॥
कन्यारूपं विकृत्याथ नागकन्या सहोदरम्।
सामन्मथार्त्ता काकुत्स्थमुपतस्थे सवेपथुः ॥९७॥
बभाषे रामभद्रस्तां भद्रे कुत इहागमः।
दारुणे दण्डकारण्ये कृतान्तैकनिकेतने ॥९८॥

साप्यूचे वह्निराजस्य कन्याहं भवनोपरि ।
सुप्ता हृतास्मि केनापि खेचरेण क्षपान्तरे ॥९९॥
इहारण्ये समायातो दृष्टः सोऽन्येन केनचित् ।
विद्याधरकुमारेण जगदे चेति सासिना ॥४००॥
स्त्रीरत्नमपहृत्येदं चिक्षेपहारलताविम ।
क्व गमिष्यसि रे पाप मृत्युस्तेहमुपस्थितः ॥१॥
इत्युक्तः सोऽत्र मां मुक्त्वा तेनाजिं सुचिरं विधात् ।
उभावपि विपेदाते मत्तौ वनगजाविव ॥२॥
एकाकिनी कान्दिशीका भ्राम्यन्त्यहमितस्ततः ।
प्राप्ता त्वां पुण्ययोगेन च्छायाद्रुमिव जङ्गले ॥३॥
तन्मां परिणय स्वामिन् कुमारीं कुलसम्भवाम् ।
महत्सु जायते जातु न वृथा प्रार्थनार्थिनाम् ॥४॥
ध्रुवं मायाविनी काचिन्नटवद्वेषधारिणी ।
कूटनाटकमुत्पाद्यागादुञ्छयितुमत्र नः ॥५॥
चिन्तयन्ताविति चिरं बुद्धिसम्वादिनौ मुखम् ।
अन्योऽन्यमीक्षां चक्राते स्मेराक्षौ रामलक्ष्मणौ ॥६॥
अथ रामः स्मितज्योत्स्ना पूरस्नवकिताधरः ।
तामित्यूचे सभार्य्योऽहमभार्य्यं भज लक्ष्मणम् ॥७॥
तयाऽर्थित स्तथैवैत्य लक्ष्मणोप्येवमब्रवीत् ।
आर्य्यं गता त्वमार्य्ये च तदलं वार्त्तयाऽनया ॥८॥

सा याञ्चाखण्डनात्पुत्रबधाच्च रुषिताऽधिकम् ।
आख्यद्गत्वा खरादीनां तत्कृतं तनयक्षयम् ॥९ ।
विद्याधरसहस्रैस्ते चतुर्दशभिरावृताः ।
ततोऽभ्येयुरुपद्रोतुं रामं शैलमिव द्विपाः ॥१०॥
किमार्य्यः सत्यपि मयि योत्स्यते स्वयमीदृशैः ।
इति राममथाविश्य तेषां युद्धाय लक्ष्मणः ॥११॥
गच्छ वत्स जयाय त्वं यदि ते सङ्कटं भवेत् ।
सिंहनादं समाहूत्यै कुर्य्या इत्यन्वगात्सतम् ॥१२॥
रामाज्ञां प्रतिपाद्योच्चैर्लक्ष्मणोऽथ धनुःसखः ।
गत्वा प्रववृते हन्तुं सतां स्तार्क्ष्य इवोरगान् ॥१३॥
प्रवर्त्तमाने तद्युद्धे स्वभर्तुः पार्ष्णिवृद्धये ।
गत्वा त्वरितमित्यूचे रावणं रावणस्वसा ॥१४॥
आयातौ दण्डकारण्ये मनुष्यौ रामलक्ष्मणौ ।
अनात्मज्ञौ निन्यतुस्ते जामेवं यमगोचरम् ॥१५॥
श्रुत्वा खरपतिस्तेतु सानुजः सबलो ययौ ।
तत्र सौमित्रिणा सार्द्धं युद्ध्यमानोऽतिसम्प्रति ॥१६॥
कनिष्ठभ्रातृवीर्य्येण स्ववीर्य्येण च गर्व्वितः ।
पुरतोऽतिस्थितो रामो विलसन् सीतया सह ॥१७॥
सीता च रूपलावण्यश्रिया सीमेव योषिताम् ।
न देवी नोरगी नापि मानुष्यन्यैव कापि सा ॥१८॥

कनिष्ठभ्रातृवीर्य्येण स्ववीर्य्येण च गर्व्वितः।
पुरतोऽस्ति स्थितो रामो विलसन् सीतया सह ॥१९॥
सीता च रूपलावण्यश्रिया सीमेव योषिताम्।
न देवी नोरगीनापि मानुष्यन्यैव कापि सा ॥२०॥
तस्या दासीकृताशेष सुरासुरवधूजनम्।
त्रैलोक्येऽप्यप्रतिच्छन्दं रूपं वाचामगोचरम् ॥२१॥
आसमुद्रमुनीन्द्राद्रि यानिकान्यपि भूतले।
तवैवार्हन्ति रत्नानि तानि सर्व्वाणि बान्धव ॥२२॥
दृशामनिमिषीकारकारणं रूपसम्पदा।
स्त्रीरत्नमेतद् गृह्णीया नचेत्त्वन्नासि रावण ॥२३॥
आरुह्य पुष्पकमथादिदेश दशकन्धरः।
विमानराज त्वरितं याहि यत्रास्ति जानकी ॥२४॥
ययौ चात्यन्तवेगेन विमानमनुजानकिम्।
सद्य एव दशग्रीवमनसस्तत्र गच्छतः ॥२५॥
दृष्ट्वापि रामादत्युग्रतेजसो दशकन्धरः।
बिभाय दूरे तस्थौ च व्याघ्रो ज्वलतवह्निादिव ॥२६॥
इति चाचिन्तयदितः कष्टं रामोदुरासदः।
इतश्च सीताहरणमितोव्याघ्र इतस्तटी ॥२७॥
विमृश्य च ततो विद्यामस्मार्षीदवलोकनीम्।
उपतस्थे च सामुंस्तु किङ्करीव कृताञ्जलिः ॥२८॥

ततस्ताज्ञापयामास तत्कालं तां दशाननः।
कुरु साहाय्यमद्याय मम सीतां हरिष्यतः॥२९॥
साऽवोचद्रामुकेर्मौलि रत्नमादीयतेँ सुखम्।
नतु रामसमीपस्था सीतादेवी सुरैरपि॥३०॥
उपायः किन्त्वसावस्ति याघाद्येनैष लक्ष्मणम्।
तस्यैव सिंहनादेन सङ्केतो ह्यनयोरयम्॥३१॥
एवं कुर्विति तेनोक्ता व्रजित्वा परतस्ततः।
सा साक्षादिव सौमित्रिः सिंहनादं विनिर्ममे॥३२॥
सिंहनादञ्च तं श्रुत्वा रामो दध्यौ ससंभ्रमः।
जगत्यप्रतिमल्लोमे हस्तिमल्ल इवानुजः॥३३॥
तं न पश्यामि सौमित्रि र्येन प्राप्नोति सङ्कटम्।
तस्य सङ्कटशङ्कैतच्चेऽन्यत्र निशम्यते॥३४॥
एवं वितर्कव्यग्रोऽभूद्यावद्रामो महामनाः।
सीतालक्ष्मणवात्सल्यात्तावद्देवमवोचत॥३५॥
आर्य्यपुत्र किमद्यापि वत्से सङ्कटमागते।
विलम्बसे द्रुतं गत्वा त्रायस्व ननु लक्ष्मणम्॥३६॥
इत्यादि सीतावचनैः सिंहनादेनचेरितः।
जगाम त्वरितं रामो कुशेनान्ध्यमानयत्॥३७॥
अथोत्तीर्य्य दशग्रीवो विमाने पुष्पकाभिधे।
आरोपयितुमारेभे रुदन्तीं जनकात्मजाम्॥३८॥

स्वामिन्नेषोऽस्मि माभैषीस्तिष्ठतिष्ठनिशाचर ।
रोषादिति वदन् दूराज्जाटायुस्तमधावत् ॥३९॥
सकोटि नखकोटीभिर्न्निशितामिर्म्महाखगः ।
चकर्ष रावणस्योरः सीरैः कृषिमहीमिव ॥४०॥
ततः क्रुद्धो दशग्रीवः खड्गमारोप्य दारुणम् ।
पक्षौ छित्त्वापातयत्तं पतङ्गं पृथिवीतले ॥४१॥
निःशङ्कोथ दशग्रीवः सीतामारोप्य पुष्पके ।
चचाल नभसा तूर्णं पूर्णप्रायमनोरथः ॥४२॥
हा नाथ विश्विनग्नोथ राम हा वत्स लक्ष्मण ।
हा तातपादा हा भ्रातर्भामण्डल महाभुज ॥४३॥
सीता वोह्रियते ऽनेन काकेनेव बलिस्थलात् ।
एवं सीता करोदोच्चै रोदयन्तीव रोदसीम् ॥४४॥
श्रुत्वा तद्रुदितं तत्तु जांबार्कजटिनन्दनः ।
खेचरो विमम्शैवं नूनं रामस्य पत्न्यसौ ॥४५॥
समुद्रोपरि शब्दोऽयं श्रूयते येन तेन तु ।
ह्रियते रावणेनैषं च्छलितौ रामलक्ष्मणौ ॥४६॥
प्रभो भामण्डलस्याद्योपकरोमीति जातधीः ।
दधावे खड्गमाकृष्य दशकन्धरमाक्षिपत् ॥४७॥
युद्धायाह्वयमानन्तं हसित्वैष दशाननः ।
सद्योजहार तद्दिव्यां विद्यासामर्थ्यतोऽखिलाम् ॥४८॥

निष्कृत्तपक्षः पक्षीव हृतविद्युः पपात सः।
कम्बुद्वीपे कम्बुशैलमारुह्य समवास्थित: ॥४९॥
रावणोपि विमानस्थो गच्छन् व्योमार्णवोपरि।
इति सानुनयं प्रोचे मैथिलीं मन्मथातुरः ॥५०॥
नभश्वरच्माचराणां भर्तुर्मे महिषीपदम्।
प्राप्तासि रोदिषि कथं हर्षस्थाने कृतं शुच ॥५१॥
मन्दभाग्येन रामेण सह त्वां योजयन्विधिः।
नानुरूपं पुराचक्रे मयाऽकार्य्यमुनोचितम् ॥५२॥
मां पतिं देवि मन्यस्व सेवया दाससन्निभम्।
मयि दासे तव दासाः खेचर्य्यः खेचरा अपि ॥५३॥
ब्रुवाणे रावणे त्वेवं सीता तस्थावधोमुखी।
स्मरन्ती मन्त्रवन्नित्या राम इत्यक्षरद्वयम् ॥५४॥
जानकीपादयोर्मूर्ध्ना स पपात स्मरातुरः।
साप्यपासारयत्पादौ परपुंस्पर्शकातरा ॥५५॥
आचुक्रोश च सीतैवं निरनुक्रोश निस्त्रप।
अचिराल्लप्स्यसे मृत्युं परस्त्रीकामनाफलम् ॥५६॥
तदानीं संमुखाययुर्मन्त्रिणः सारणादयः।
अन्ये च रक्षःसामन्ताः समन्ताद्राक्षसप्रभोः ॥५७॥
महोत्सवां महोत्साहो महासाहसकृत्पुरीम्।
आगमद्रावणो लङ्कामलंकर्मीणविक्रमः ॥५८॥

न यावद्रामसौमित्रि क्षेमोदन्तसमागमः ।
भोक्ष्ये न तावदित्युच्चैः सीताभिग्रहमाददे ॥५९॥
लङ्कापूर्व्वदिशि स्थिते सुरवारोद्यानोपमे खेचरे ।
स्त्रीणां विभ्रमधाम्नि देवरमणोद्याने स्वयं जानकीं॥
रक्ताशोकतरोस्तले त्रिजटया चारक्षकैरावृताम् ।
मुक्तागाद्दशकन्धरःप्रमुदितःस्वं धाम धाम्नांनिधिः॥६०

इत्याचार्य्य श्रीहेमचन्द्रविरचिते सीताहरणो
नाम पञ्चमः सर्गः ॥५॥

इतश्च रामः सम्प्राप्त त्वरितं तत्र चापभृत् ।
अमित्रैः सह सौमित्रि र्यत्राभूद्रणकेलिकृत् ॥१॥
आयान्तं राममालोक्य सौमित्रिरिदमब्रवीत् ।
आर्य्यामेकाकिनीं मुक्त्वा किमार्य्येह त्वमागमः ॥२॥
आहूतः सिंहनादेन तव वैधुर्यलक्ष्मणा ।
लक्ष्मणार्हमिहायातो व्याजहारेति राघवः ॥३॥
लक्ष्मणोप्यवदत्सिंहनादोऽकारि मया नहि ।
श्रुतश्चार्य्येण तन्नूनं वयं केनापि वञ्चिताः ॥४॥
अपनेतुं सत्यमार्य्यामपनीतस्त्वया यतः ।
सिंहनादस्य करणं शङ्के स्तोकं न कारणम् ॥५॥

तद्गच्छ शीघ्रमेवार्य्य त्रातुमार्य्यां महाभुज।
हत्वाऽरीनहमप्येष यावद्यायामि पृष्ठतः ॥६॥
इत्युक्तो रामभद्रोऽगात् स्वस्थानं तत्र जानकीम्।
नापश्यच्च महीपृष्ठे मूर्छितो निपपात च ॥७॥
लब्धसंज्ञः समुत्थाय तं मुमूर्षुं जटायुषम्।
ईक्षांचक्रे रामभद्रो दध्याविति च तीक्ष्णधीः ॥८॥
केनापि दयिता नूनं जह्रे छलपरेण मे।
तेनापि शरकुड्डोऽयं महात्मा निहतः खगः ॥९॥
ततः प्रत्युपकाराय मारुतस्य जटायुषः।
ददौ रामो नमस्कारं परलोकाध्वशंबलम् ॥१०॥
स विपद्याऽभवत्कल्पे माहेन्द्रे प्रवरः सुरः।
रामोपि सीतामन्वेष्टु माटाटव्यामितस्ततः ॥११॥
इतश्च लक्ष्मणोवीरः खरेण प्राज्यपत्तिना।
योद्धुं प्रावर्त्तते कोपि न सिंहस्य सखा युधि ॥१२॥
अत्रान्तरे च त्रिशिराः खरस्यावरजो भटः।
कोनामाऽस्मिंस्त्वयाच्चेप इति जेष्ठं न्यवारयत् ॥१३॥
अथोरथस्थं त्रिशिरो राक्षसं समरोद्यतम्।
जघान रामावरजो गणयं स्तं पतङ्गवत् ॥१४॥
तदा पातालल‌‌ङ्केश चन्द्रोदरनृपात्मजः।
विराधः सर्व्वसन्नाहि सैन्यस्तत्र समाययौ ॥१५॥

आरिराधयिषु र्नीत्वा विभीषणो रामसोदरम्।
इत्यूचे तव भृत्योऽहमेतेषां त्वद्विषां द्विषन् ॥१६॥
चन्द्रोदराख्यं निर्व्वास्य पितरं मे महाभुज।
पाताललङ्कां जगृहुरमी रावणपत्तयः ॥१७॥
खरांशास्तमोध्वंसे द्विषद्विदलने च ते।
तथापि भृत्यलेशत्वाद्रणायादिश मां प्रभो ॥१८॥
स्मित्वा च लक्ष्मणोऽवोचद्धन्यमानान्मया द्विषः।
पश्यास्मद्विजयोद्यन्य साहाय्यादद्दोष्मणां ह्रिये॥१६॥
अद्यप्रभृति ते स्वामी ज्येष्ठो मम रघूद्वहः।
पाताललङ्काराज्येऽपि स्थापितोसि मयाद्य भो ॥२०॥
विरोधिनं विराधं स्वस्मं दृष्ट्वा लक्ष्मणान्तिके।
क्रुद्धोऽधिकं खरोऽभेत्याधिज्यधन्वैवमब्रवीत् ॥२१॥
तनयो मम सम्बूकः क्वास्ते विस्रस्तघातक।
विराधेन वराकेण सख्या किं रक्षसेऽधुना ॥२२॥
स्मित्वा चोवाच सौमित्रिस्त्रिशिरा अपि तेऽनुजः।
भ्रातुःपुत्रस्य सोत्कण्ठ स्तमनुप्रेषितो मया ॥२३॥
पुत्रे भ्रातरि चोत्कण्ठा चेत्तवापि बलीयसी।
नेतुं त्वामपि तत्रास्मि सद्यः सज्जधनुर्ननु ॥२४॥
मया प्रमादघातेन पादन्यासेन कथं वत्।
तव सूनुर्हतो मूढ तत्र मे पौरुषं नहि ॥२५॥

अधुना त्वं भटं मन्यश्चेत्पूरयसि कौतुकम्।
त्वया प्रीणामि कीनाशं नववासेपि सत्वरम् ॥२६॥
इत्युक्तवति सौमित्रावमित्रो राक्षसः खरः।
खरं प्रहर्तुमारेभे दन्तीव गिरिसानुनि ॥२७॥
लक्ष्मणः सानुजः सोऽपि कङ्कपत्रैः सहस्रशः।
अम्बरं तीरयामास भानुभिर्भानुमानिव ॥२८॥
भयङ्करः खेचराणां गरीयान् सङ्गरस्तयोः।
अजायत आह्वदेव दैवतैकमहोत्सवः ॥२९॥
विष्णुनापि रणे यस्य शक्तिरीदृक् खरः सहि।
प्रतिविष्णोरप्यधिकोऽव्योमन्येवं गिरोऽभवन् ॥३०॥
कालक्षेपो वधेऽस्यापीत्यमर्षोल्लङ्घितः स्वयम।
सौमित्रिः खरमूर्द्धानं क्षुरप्रेणाच्छिदत् क्षणात् ॥३१॥
दूषणो लक्ष्मणेनापि ससैन्यो योद्धुमुद्यतः।
सञ्जह्रे कुञ्जर इव सयूथो दवबह्निना ॥३२॥
ततः सार्द्धं विराधेन ववले रामसोदरः।
स्फुरद्वामेक्षणः कामामासं तन्नार्यग्रयोः शुभम् ॥३३॥
गत्वा दूरमपश्यच्च रामभद्रं द्रुमान्तरे।
सीताविरहितं दृष्ट्वा विषादं परमं ययौ ॥३४॥
पुरस्थमपि सौमित्रिमपश्यन् रघुपुङ्गवः।
सीताविरहशल्येन पीडितः खेदवोदिति ॥३५॥

वनं भ्रान्तमिदं तावन्मया दृष्टा न जानकी ।
युष्माभिः किं न सा दृष्टा ब्रूत हे वनदेवताः ॥३६॥
अमुष्मिन् भीषणेऽरण्ये भूयः श्वापदसङ्कुले ।
विमुच्यैकाकिनीं सीतां लक्ष्मणाय गतोस्मि हा ॥३७॥
रक्षोभटसहस्राग्रे संयात्येकञ्च लक्ष्मणम् ।
मुक्त्वा भूयोऽहमवागामहोऽधीर्मम दुर्द्धियः ॥३८॥
हा सीते निर्जनेऽरण्ये कथं मुक्ता मया प्रिये ।
हा वत्स लक्ष्मण कथं मुक्तोसि रणसङ्कटे ॥३९॥
एवं ब्रुवन् रामभद्रो मूर्च्छया न्यपतत् क्षितौ ।
क्रन्दद्भिः पक्षिभिरपि वीक्ष्यमाणो महाभुजः ॥४०॥
लक्ष्मणोऽप्यब्रवीदेवमार्य्याय किमिदन्ननु ।
तवायं लक्ष्मणोभ्राता जित्वारीन्समुपस्थितः ॥४१॥
पीयूषेणेव संसिक्तो रामभद्रस्तया गिरा ।
लब्धसंज्ञो ददर्शाग्रे सस्वजे च निजानुजम् ॥४२॥
उदश्रु रूचे सौमित्रिः सिंहनादस्य कारणम् ।
जानकीहरणमिदं ध्रुवं कस्यापि मायिनः ॥४३॥
तस्य प्राणैः सहैवाऽहमाहरिष्यामि जानकीम् ।
तत्प्रवृत्त्युपलम्भाय सम्प्रति प्रयतामहे ॥४४॥
पातालङ्काराज्ये च स्थाप्यतामेष पैत्रिके ।
विराधः प्रतिपन्नं हि मयाऽमुष्मै खराहवे ॥४५॥

२९

सीताप्रवृत्तिमानेतुं विद्याधरभटानथ ।
प्रजिघाय विराधस्तावारिराधयिषुः प्रभू ॥४६॥
काकुत्स्थौ तस्थतुस्तत्र शोकानलकरालितौ ।
मुहुर्मुहुर्निश्वसन्तौ निर्दशन्तौ क्रुधाऽधरम् ॥४७॥
दूरं विद्याधरा भ्रान्त्वा विराधप्रहिताश्च ते ।
सीताप्रवृत्तिं न प्रापुस्तत्रैत्याभ्युरधोमुखाः ॥४८॥
तेषामधोमुखत्वेन ज्ञात्वा रामोऽब्रवीदिति ।
स्वामिकार्य्यं यथाशक्ति साधु युष्माभिरुद्यतम् ॥४९॥
सीताप्रवृत्तिर्न प्राप्ता कोदोष स्तत्रवो भटाः ।
दैवस्य विपरीतस्य के यूयं कोऽपरोऽथवा ॥५०॥
नत्वा विराधोऽप्यवदन्मानिर्वेदं कृथाः प्रभो ।
अनिर्वेदश्रियोमूलं तव भृत्योऽस्मि नन्वहम् ॥५१॥
एहि पाताललङ्कायां निवेशयितुमद्यमाम् ।
सीता प्रवृत्तिःसुलभा तत्र भर्तुर्भविष्यति ॥५२॥
विराधेन ससैन्येन तातो रामस्तु सत्वरम् ।
ययौ पाताललङ्कायाः पुर्य्याः परिसरावनौ ॥५३॥
तत्रारिसूदनः सुन्दो रामरुद्धः खरात्मजः ।
संमुखीनोरणायागान् महासैन्यसमावृतः ॥५४॥
पुरोगेण विराधेन रामपूर्व्वविरोधिना ।
सुन्दश्चक्रे रणं घोरं सद्यः पितृवधक्रुधा ॥५५॥

अथो रणस्थे काकुत्स्थे सुन्दश्चन्द्रणखागिरा ।
सद्यः प्रणश्य लङ्कायां रावणं शरणं ययौ ॥५६॥
ततः पाताललङ्कायां प्रविश्य रघुपुङ्गवौ ।
निवेशयामासतु स्तं विराधं पैतृके पदे ॥५७॥
प्रासादे खरराजस्य तस्थतु रामलक्ष्मणौ ।
युवराज इव पुनर्विराधः सुन्दवेश्मनि ॥५८॥
इतश्च साहसगते श्चिरं ताराभिलाषिणः ।
सिद्धा प्रतारणी विद्या हिमवद्गिरिकन्दरे ॥५९॥
तया सुग्रीवरूपः स कामरूप इवामरः ।
जगाम किष्किन्धपुरे द्वितीयोऽर्क इवाम्बरे ॥६०॥
क्रीडार्थं वहिरुद्याने सुग्रीवे च गते तदा ।
स तदन्तःपुरमगात्ताराद्देवी विभूषितम् ॥६१॥
आगाच्च सत्यसुग्रीवो द्वारि च द्वारपालकैः ।
स्खलितोऽग्रे गतो राजा सुग्रीव इति वादिभिः ॥६२॥
सुग्रीवद्वितयं दृष्ट्वा सन्देहाद्वालिनन्दनः ।
शुद्धान्तविप्लवं त्रातुं तद्द्वारं त्वरितो ययौ ॥६३॥
शुद्धान्ते विटसुग्रीवः प्रविश्यन् वालिसूनुना ।
मार्गाद्रिणा सरित्पूर इव प्रस्खलितस्ततः ॥६४॥
अथाभिलत्सैनिकानामक्षौहिण्यश्चतुर्दश ।
आहूतानि जगत्सारसर्व्वस्वानीव सर्वतः ॥६५॥

द्वयोरपि तयोर्भेदमजानन्तोऽथ सैनिकाः ।
सत्यसुग्रीवतोऽर्द्धेर्द्धे विटसुग्रीवतोऽभवत् ॥६६॥
ततः प्रवव्रृते युद्धं सैन्ययोरुभयोरपि ।
कुन्तपातैर्दिवं कुर्व्वदुल्कापातमयीमिव ॥६७॥
युयुधे सादिना सादी निषादी च निषादिना ।
पदातिना पदातिश्च रथिको रथिकेन च ॥६८॥
चतुरङ्गचमूचक्रविमर्द्दादथ मेदनी ।
अवाप कम्पं मुग्धेव प्रौढप्रियसमागमात् ॥६९॥
एह्येहि रे परगृहप्रवेशन्निति तं ब्रुवन् ।
विटसुग्रीवमुद्ग्रीवः सुग्रीवो योद्धुमाह्वत ॥७०॥
ततश्च विटसुग्रीवो मत्तेभ इव तर्ज्जितः ।
तर्ज्जितं गर्ज्जितं कुर्व्वन् संमुखीनो युधेऽभवत् ॥७१॥
युयुधाते महायोधौ तौ क्रोधारुणलोचनौ ।
विदधानौ जगत्त्रासं कीनासस्येव सोदरौ ॥७२॥
तौ निशातैर्निशातानि शस्त्रैः शस्त्राण्यथो मिथः ।
चिच्छिदाते टणच्छेदं रणच्छेकावुभावपि ॥७३॥
शस्त्रषण्डैरुच्छलद्भिः दुद्रुवे खेचरीगणः ।
महायुद्धे तयोर्द्दन्त्वखण्डोमहिषयोरिव ॥७४॥
तौ च्छिन्नास्त्रावथान्योन्यममर्षणशिरोमणी ।
मल्लयुद्धेनास्फलतां पर्व्वताविव जङ्गमौ ॥७५॥

उत्पतन्तौ क्षणाद्व्योम्नि पतन्तौ च क्षणाद्भुवि ।
ताम्रचूडाविवाभातां वीरचूडामणी उभौ ॥७६॥
तौ द्वावपि महाप्राणौ मिथो जेतुमनीश्वरौ ।
अपसृत्य च दूरेण वृषभौ इव तस्थतुः ॥७७॥
सहायकार्थं सुग्रीवः समाहूयाञ्जनासुतम् ।
भूयोपि युयुधे मायासुग्रीवेणोग्रकर्म्मणा ॥७८॥
हनूमतः पश्यतोपि द्वयोर्भेदमजानतः ।
कुट्टयामास सुग्रीवं विटसुग्रीव उत्कटः ॥७९॥
पुनर्युद्धेन सुग्रीवः खिन्नः खिन्नतनुस्ततः ।
बहिर्न्निर्गत्य किष्किन्धपुरादावासमग्रहीत् ॥८०॥
तत्रैव विटसुग्रीव स्तस्थावस्वस्थमानसः ।
अन्तःपुरप्रवेशञ्च न लेभे वालिनन्दनात् ॥८१॥
सुग्रीवोऽप्यञ्चितग्रीवमथैवं पर्य्यचिन्तयत् ।
अहो स्त्रीलम्पटः कूटपटुः कोप्येष नो द्विषन् ॥८२॥
आत्मीया अप्यनात्मीया द्विषन्मायावशीकृताः ।
अहो बभूव तदसावनवस्कन्दो निजैर्द्वयैः ॥८३॥
मायापराक्रमोत्कृष्टः कथं वध्योद्विषन्मया ।
धिग्मां पराक्रमभ्रष्टं वालिनाम्नस्त्रपाकरम् ॥८४॥
धन्यो महाबलो वाली योऽखण्डपुरुषव्रतः ।
राज्यं तृणमिव त्यक्त्वा जगाम परमं पदम् ॥८५॥

चन्द्ररश्मिः कुमारो मे बलीयान् जगतोप्यसौ ।
किन्तु द्वयोरभेदज्ञः कं रक्षतु निहन्तु कम् ॥८६॥
इदन्तु विदधे साधु साध्वक्षो चन्द्ररश्मिना ।
तस्य पापीयसो रुद्धं शुद्धान्ते यत्प्रवेशनम् ॥८७॥
वधाय बलिनोऽमुष्य बलीयांसं श्रयामि किम् ।
यद्घात्या एव रिपवः स्वतोपि परतोपि वा ॥८८॥
भूर्भुवः स्वस्त्रयीवीरं मरुत्तमखभञ्जनम् ।
भजामि विद्विषद्घातहेतवे किं दशाननम् ॥८९॥
असौ किन्तु प्रकृत्या स्त्रीलोलस्त्रैलोक्यकण्टकः ।
तञ्च माञ्च निहत्याशु तारामादास्यते स्वयम् ॥९०॥
ईदृशे व्यसने प्राप्ते साहाय्यं कर्तुमीश्वरः ।
आसीत्खरः खरतरो राघवेण हतः स तु ॥९१॥
तातेव रामसौमित्री गत्वा मित्री करोमि तत् ।
तत्कालोपनतस्यापि यौ विराधस्य राज्यदौ ॥९२॥
तौ तु पातालङ्कायामलङ्कर्मीणदोर्बलौ ।
विराधस्योपराधेन तथैवाद्यापि तिष्ठतः ॥९३॥
एवं विमृश्य सुग्रीवोऽनुशिष्य रहसि स्वयम् ।
विराधपुर्य्यां विश्वासभूतं दूतं न्ययोजयत् ॥९४॥
गत्वा पातालङ्कायां विराधाय प्रणम्य सः ।
स्वामिव्यसनवृत्तान्तं कथयित्वाऽब्रवीदिदम् ॥९५॥

महति व्यसने स्वामी पतितो नस्तदीदृशे ।
राघवो शरणीकर्तुं तव द्वारेण वाञ्छति ॥९६॥
द्रुतमायातु सुग्रीवः सतां सङ्गो हि पुण्यतः ।
तेनेत्युक्तो दूत एत्य सुग्रीवाय शशंस तत् ॥९७॥
प्रचचालाथ सुग्रीवोऽश्वानामश्वेयकस्वनैः ।
दिशो मुखरयत्सर्वा वेगात् दूरमदूरयत् ॥९८॥
पाताललङ्कां स प्राप क्षणेनाप्युपवेश्मवत् ।
विराधमुपतस्थे वाभ्युत्तस्थौ सोऽपि तं मुदा ॥९९॥
विराधोऽपि पुरोभूय रामभद्राय तायिने ।
तं नमस्कारयामास तद्दुःखञ्च व्यजिज्ञपत् ॥१००॥
सुग्रीवोऽप्येवमर्चेऽस्मिन् दुःखे त्वमसि मे गतिः ।
च्युते हि सर्वथा मूढे शरणं तरणिः खलु ॥१॥
स्वयं दुःख्यपि तद्दुःखं छेत्तुं रामोऽभ्यपागमत् ।
स्वकार्यादधिको यत्नः परकार्ये महीयसाम् ॥२॥
सीताहरणवृत्तान्तं विराधेनाऽवबोधितः ।
रामं विज्ञापयामास सुग्रीवोऽथ कृताञ्जलिः ॥३॥
त्रायमाणस्य ते विश्वं तथा द्योतयतो रवेः ।
न क्वापि कारणापेक्षा देव चमि तथाप्यदः ॥४॥
त्वत्प्रसादात् क्षतारिः सन् ससैन्योऽस्मि तवानुगः ।
आनेष्यामि प्रवृत्तिञ्च सीताया न चिरादहम् ॥५॥

ससुग्रीवः प्रतस्थे च किष्किन्धां प्रति राघवः।
विराधमनुगच्छन्तं सम्बोध्य विससर्ज च ॥६॥
रामभद्रेऽथ किष्किन्धापुरद्वारमधिष्ठिते।
सुग्रीवो विटसुग्रीवमाह्वास्त रणकर्मणा ॥७॥
निनदन्विटसुग्रीवोऽप्यागाद्राह्वानमात्रतः।
रणाय नालसाः शूरा भोजनाय द्विजा इव ॥८॥
दुर्द्धरैश्च रणन्यासैः कम्पयन्तौ वसुन्धराम्।
तावुभावप्ययुध्येतां मत्ताविव वनद्विपौ ॥९॥
रामः सरूपौ तौ दृष्ट्वा कोऽस्मदीयः परश्च कः।
इति संशयत स्तस्थावुदासीन इव क्षणम् ॥१०॥
भवत्वेवं तावदिति विमृशन् रघुपुङ्गवः।
वज्रावर्त्ताभिधधनुष्टङ्कारमकरोत्ततः ॥११॥
धनुष्टङ्कारत स्तस्मात्सा साहसगतेः क्षणात्
रूपान्तरकरी विद्या हरिणीव पलायिता ॥१२॥
विमोह्य मायया सर्व्वं परदारैरिरंससे।
पापाऽरोपय रे चापमिति रामस्ततर्ज्ज तम् ॥१३॥
एकेनापीषुणा प्राणां स्तस्याऽहार्षीद्रघूद्वहः।
न द्वितीया चपेटा हि हरेर्हरिणमारणे ॥१४॥
विराधमिव सुग्रीवं रामो राजेऽन्यवेशयत्।
सुग्रीवोऽपि च लोकेन प्राग्वद्देवाऽनमस्यत ॥१५॥

त्रयोदश निजाः कन्या दातुमत्यन्तसुन्दरीः ।
रामभद्रमथाविष्ट प्राञ्जलिर्वानरेश्वरः ॥१६॥
रामोऽप्युवाच सुग्रीवं सीतान्वेषणकर्मणा ।
प्रयतस्व किमेताभिरपरेणापि वस्तुना ॥१७॥
इत्युक्त्वा वहिरुद्याने गत्वा तस्थौ रघूद्वहः ।
सुग्रीवोऽपि तदादेशात्प्रविवेश निजां पुरीम् ॥१८॥
इतश्च पुर्य्यां लङ्कायां रावणान्तःपुरस्त्रियः ।
खरादिहननोदन्तान्मन्दोदर्य्यादयोऽरुदन् ॥१९॥
रुदती सह सुन्देन स्वसा चन्द्रणखापि च ।
प्राविशद्रावणगृहं पाणिभ्यां कुट्टयन्त्युरः ॥२०॥
दृष्ट्वा च रावणं कण्ठे लगित्वोच्चतरस्वरम् ।
रुदती निजगादैवं दैवेन निहतास्मि हा ॥२१॥
हतः पुत्रो हतौ भर्त्ता हतौ च मम देवरौ ।
चतुर्दश सहस्राणि हतास्च कुलपत्तयः ॥२२॥
पातालल‍ङ्का च च्छिन्ना राजधानी त्वदर्पिता ।
दर्पवद्भिर्विद्विषद्भिर्बन्धो जीवत्यपि त्वयि ॥२३॥
जीवग्राहं प्रणश्याहं सुन्देन सह सूनुना ।
त्वां शरण्यमिहायाता कुत्र तिष्ठामि साधि माम् ॥२४॥
अबोधयद्दशास्योऽपि रुदन्तीं तां ससौष्टवः ।
त्वद्भर्टपुत्रहन्तारं हनिष्याम्यचिरादपि ॥२५॥

शोकेन तेन वैदेह्या विप्रलम्भरुजापि च।
फलच्युत इव द्वीपी तल्पे तस्थौ निपत्य सः॥२६॥
अथ मन्दोदरी देवी तमुपेत्याभ्यधादिति।
कथं प्राकृतवत्स्वामिन्निश्चेष्ट इव तिष्ठसि॥२७॥
रावणोऽप्यब्रवीदेवं वैदेही विरहज्वरात्।
न चेष्टितुं न वक्तुञ्च न चालोकयितुं क्षमः॥२८॥
मया चेज्जीवता तेऽर्थे तन्मानं प्रोह्य मानिनि।
गत्वाऽनुनय वैदेहीं यथा मयि रिरंसते॥२९॥
नान्यनारीमनिच्छन्तीं भुञ्जे जातुचिदप्यहम्।
अर्गलानि यमोद्यत ममास्ति गुरुसाक्षिकः॥३०॥
पीडिता पीडयापत्युः कुलीना सापि तत्क्षणम्।
जगाम देवी रमणोद्याने सीतामुवाच च॥३१॥
एषा मन्दोदरीनाम दशाननमहिष्यहम्।
पप्रश्ये त्वयि दासीत्वं भजस्व दशकन्धरम्॥३२॥
सीते त्वमेव धन्यासि यां सिसे विषते निशम्।
विश्वसेव्याङ्घ्रिकमलः पतिर्मम महाबलः॥३३॥
अद्यापि तव रामेण भूचरेण तपस्विना।
पत्तिमात्रेण किं पत्या प्राप्यते स्व दशाननः॥३४॥
कथा बलापि सीतैवं क्व सिंहः क्व च जम्बुकः।
क्व सुपर्णः क्व वा काकः क्व रामः क्व च ते पतिः॥३५॥

दम्पतित्वमहोयुक्तं तव तस्य च पाप्मनः ।
रिरंसुरेकोऽन्य स्त्रीषु दूती भवति चाऽपरा ॥३६॥
द्रष्टुमप्युचिता नासि किमु सम्भाषितुं हले ।
स्थानादितो गच्छ गच्छ त्यज दृष्टिपथं मम ॥३७॥
रावणोपि तदा तत्राजगाम निजगाद च ।
कुपितासि कुतः सीते दासी मन्दोदरी तव ॥३८॥
दासस्ते स्वयमप्यस्मि प्रसादं कुरु देवि मे ।
जानकि त्वं जनमसुं प्रीणासि न दृशापि किम् ॥३९॥
सीता पराङ्मुखी भूयेत्यभाषत महासती ।
कृतान्तदृष्ट्या दृष्टोऽसि हरन्मां रामगेहिनीम् ॥४०॥
धिगाशान्ते हताशस्याऽप्रार्थितप्रार्थकस्य रे ।
जीविष्यसि कियद्रामे सानुजे द्विषदन्तके ॥४१॥
तयेत्याक्रुश्य मानोपि भूयो भूयो दशाननः ।
तथैवोवाच धिगहो कामावस्था बलीयसी ॥४२॥
अत्रान्तरे विपन्मग्नां सीतां द्रष्टुमिवाक्षमः ।
निममज्ज निधिर्धाम्नां पश्चिमे लवणाम्बुधौ ॥४३॥
प्रावर्त्तत निशा घोरा घोरबुद्धिश्च रावणः ।
सीतायै क्रोधकामान्ध उपसर्गान्प्रचक्रमे ॥४४॥
घूत्कारिणो महाघूकाः फेत्कुर्वाणाश्च फेरवः ।
दृका विचित्रं क्रन्दन्त उत द्योम्न्योन्ययोधिनः ॥४५॥

पुच्छास्फोटकृतो व्याघ्राः फूत्कुर्वाणाः फणाभृतः ।
पिशाचप्रेतवेतालभूताश्चाकृष्टकर्त्तिकाः ॥४६॥
उल्ललन्तोदुर्ललिता यमस्येव सभासदः ।
विकृता रावणेनेयुरुपसीतं भयङ्कराः ॥४७॥त्रि०वि०॥
ध्यायन्ती मनसा पञ्चपरमेष्ठिनमस्क्रियाम् ।
सीता तस्थावभीतैव नतु भेजे दशाननम् ॥४८॥
विभीषणः प्रभाते तु निशावृत्तं निशम्य तत् ।
आगादुपदशग्रीवं सीताञ्चैव मवोचत ॥४९॥
भद्रेका त्वं कुतःस्थानात्कस्य वाऽसि किमत्र च ।
माभैषीः सर्व्वमाख्याहि परस्त्रीसोदरस्य मे ॥५०॥
तं मध्यस्थं परिज्ञाय सीतापराख्यदधोमुखी ।
अहं जनकपुत्र्यस्मि सीता भामण्डलस्वसा ॥५१॥
गृहिणी रामभद्रस्य स्नुषा दशरथस्य च ।
समं पत्या सानुजेन दण्डकारण्यमागमम् ॥५२॥
तत्रैकदा देवरोमे क्रीडयैतस्ततोभ्रमत ।
खे मण्डासिं ददर्शैकं जग्राह च कुतूहलात ॥५३॥
अभ्यर्णस्थां वंशजालीं तेन चिच्छेद सोऽसिना ।
अज्ञानाच्च तदन्तस्थतत्साधकशिरोऽच्छिदत ॥५४॥
अयुध्यमानोऽनागस्कः कोप्ययं हा हतो मया ।
सानुताप इव भ्रातुः समीपं स उपागमत ॥५५॥

तस्याऽसिसाधकस्यैव काचिदुत्तरसाधिका।
महेश्वरस्यानुमतं तत्र कोपादुपाऽगमत् ॥५६॥
भर्त्तारं मम दृष्ट्वा चाऽद्भुतरूपपुरन्दरम्।
अयाचीद्रन्तुकामास्तीऽस्वाज्ञासीत्ताञ्च मत्पतिः ॥५७॥
साऽगच्छद्दागमदथ रक्षसां बलमुल्बणम्।
ज्वेडां वैधुर्य्यसङ्कीती कृत्यागाल्लक्ष्मणो युधि ॥५८॥
मायाज्वेडामथो कृत्वा दूरं नीत्वा च मत्पतिम्।
दुराशोऽहृत मामेष स्ववधायैव राक्षसः ॥५९॥
तच्छ्रुत्वा रावणं नत्वा बभाषे च विभीषणः।
कुलस्य दूषणमिदं स्वामिन्कर्म्म त्वया कृतम् ॥६०॥
न यावदिह हन्तुं नः काकुस्थोऽभ्येति सानुजः।
मुच्यतां तावदाश्वेव नीत्वा सीतां तदन्तिके ॥६१॥
इत्युक्तो रावणः क्रोधारुणाक्षोऽप्यब्रवीदिति।
किमिदं भाषसे भीरो व्यस्मार्षीर्मम पौरुषम् ॥६२॥
सीताऽनुनीताऽवश्यं हि मम भार्य्या भविष्यति।
तौ चायातौ हनिष्यामि वराकौ रामलक्ष्मणौ ॥६३॥
उचे विभीषणो भ्रातः सत्यं तज्ज्ञानिनो वचः।
यद्रामपत्न्याः सीतायाः कृते नः कुलसंक्षयः ॥६४॥
भक्तस्य बन्धोर्मे वाचं मन्यसे नान्यथा कथम्।
मया हतो दशरथः स तावज्जीवितः कथम् ॥६५॥

न यद्यप्यन्यथाभावि भावि वस्तु महाभुज।
तथापि प्रार्थ्यसे मुञ्च सीतां नः कुलघातिनीम्॥६६॥
अनाकर्णितकेनैव विभीषणगिरामथ।
आरोप्य पुष्पके सीतां भ्रमन्नेवमदर्शयत्॥६७॥
अमी क्रीडाद्रयो रत्नसानवः स्वादुनिर्झराः।
नन्दनोद्यानसोदर्य्याण्यमून्युपवनानि च॥६८॥
यथा कामीनहर्ष्टीनि धारावेश्मान्यमूनि च।
अमूश्च केलिकूलिन्यः सहंसा हंसगामिनि॥६९॥
एतानि रतिवेश्मानि स्वर्गखण्डोपमानि च।
मया सह रमस्वैषु सुभ्रुर्यत्र रतिस्तव॥७०॥
ध्यायन्ती रामपादाब्जे हंसीव जनकात्मजा।
वसुन्धरेव धैर्य्येण चुक्षोभ नहि तद्गिरा॥७१॥
सर्वेषु रम्यस्थानेषु भ्रांत्वा भ्रांत्वा दशाननः।
मुमोचाशोकवनिकामध्ये भूयोपि जानकीम्॥७२॥
प्रेच्योन्मत्तमिव ज्येष्ठं वाचोयुक्तेरगोचरम्।
विभीषणो मन्त्रयितुं कुलामात्यानथाह्वयत्॥७३॥
ऊचे च भोः कुलामात्याः कामाद्या ह्यान्तरद्विष।
भूता इवैते तेष्वेकोऽप्युन्मथाति प्रमादिनम्॥७४॥
कामं कामातुरः स्वामी कामस्त्वेकोऽपि दुर्ज्जयः।
किं पुनः कृतसाहाय्यः परनारीरिरंसया॥७५॥

तदतःपरमत्यन्तं महति व्यसनार्णवे ।
पतिष्यति पतिर्लङ्कापुर्य्यादोषमानपि द्रुतम् ॥७६॥
अथते मन्त्रिणः प्रोचुर्वयं नाम्नैव मन्त्रिणः ।
त्वमेव मन्त्रीमन्त्वातुं यस्येदृग्दूरदर्शिता ॥७७॥
किं करोमि परं मन्त्रः प्रभौ कामवशम्वदे ।
मिथ्यादृष्टौ जने जैनधर्म्मस्येवोपदेशनम् ॥७८॥
सुग्रीवहनुमन्मुख्या मिलिता राघवस्य ये ।
महात्मनां न्ययभाजां कः पक्षं नावलम्बते ॥७९॥
सीतानिमित्तोऽस्मैक्ष्वाकोद्भवान्युक्तो नः कुलक्षयः ।
तथापि पुरुषाधीनं कर्त्तव्यं समयोचितम् ॥८०॥
ततो विभीषणश्चक्रे वप्रे यन्त्रादिरोपणम् ।
अनागतं हि पश्यन्ति मन्त्रिणो मन्त्रचक्षुषा ॥८१॥
इतश्च कालं कमपि कथमप्यत्यवाहयत् ।
सौमित्रिणाऽस्वास्यमानो-रामोविरहपीडितः ॥८२॥
अनुशिष्याथ रामेण प्रेषितो लक्ष्मणः स्वयम् ।
प्रतस्थे प्रतिसुग्रीवं तूणचापकृपाणभृत् ॥८३।
दलयन् क्ष्मां पदन्यासैः कम्पयंस्तञ्च पर्वतम् ।
वेगान्दोलितदोःस्पर्शान्मार्गवृक्षांश्च पातयन् ॥८४॥
उत्कटभ्रुकुटीभीमललाटोऽरुणलोचनः ।
भीतैर्द्वास्थैर्मुक्तमार्गः प्राप सुग्रीववेश्म सः ॥८५॥

आयान्तं लक्ष्मणं श्रुत्वा निर्गत्यान्तःपुराद्द्रुतम्।
उपतस्थे कपिराजः कम्पमानवपुर्भयात् ॥८६॥
उचे च लक्ष्मणः क्रुद्धः कृतकृत्योऽसि वानर।
सुखन्तिष्ठसि निःशङ्कं स्वान्तःपुरसमावृतः ॥८७॥
स्वामी तरुतलासीनो दिवसान्माससन्निभान्।
यथात्येति न तद्वेत्सि प्रतिपन्नञ्च विस्मृतम् ॥८८॥
सीताप्रवृत्तिमानेतु मुत्तिष्ठ साधुनापि हि।
मा साहसगतेर्मार्गमगमः सङ्कुचितोऽथ सः ॥८९॥
पतित्वा पादयोस्तस्य सुग्रीवो,थाऽब्रवीदिति।
प्रसीदैकं प्रमादं मे सह स्वामिन् प्रभुर्यतः ॥९०॥
एवमाराध्य सौमित्रि मग्रे कृत्वा कपीश्वरः।
द्रुतं ययौ रामभद्रं नमश्चक्रे च भक्तितः ॥९१॥
इत्यादिशच्च स्वान् सैन्यान् भोभोः सर्वैपि दोर्म्मतः।
सर्व्वत्रास्खलितायूयं गवेषयत मैथिलीम् ॥९२॥
इत्युक्ता स्तेन ते सैन्या द्वीपेष्वद्रिषु सिन्धुषु।
भूमिरन्ध्रेषु चान्यत्र त्वरितं त्वरितं ययुः ॥९३॥
सीताहरणमाकर्ण्य तदा भामण्डलोपि हि।
आगमद्रामसम्पार्श्वं स इवात्यन्तदुःखितः ॥९४॥
विराधोपि समं सैन्यैः स्वामिव्यसनपीडितः।
एत्य शुश्रूषणमणोऽस्थात्तत्रैव चिरपत्तिवत् ॥९५॥

सुग्रीवोऽपि स्वयं गच्छन् कम्बद्वीपमुपाययौ ।
तञ्च रत्नजटीदृष्ट्वा दूरादेवमचिन्तयत् ॥१९६॥
संस्मृत्य किं ममागस्तत्प्रैष्यय दशमौलिना ।
मद्वधाय महाबाहुः सुग्रीवो वानरेश्वरः ॥१९७॥
हृता विद्या दशास्येन पुरा तावन्महौजसा ।
इदानीमेष मे प्राणान् हरिष्यति हरीश्वरः ॥१९८॥
इति चिन्तापरं तन्द्राक् सुग्रीवोगादुवाच च ।
नाभ्युदस्थाःकथंमांत्वं व्योमयानेऽलसोऽसि किम्॥१९९॥
सोऽभ्यधाच्च दशास्येन विद्या मे सर्व्वतो हृता ।
जानकीं हरत स्तस्य युद्धोयं समुपस्थितः ॥२००॥
ततश्च रामपादान्ते स नीतः कपिकेतुना ।
तेन विज्ञापितः सीतोदन्तमेवं व्यजिज्ञपत् ॥१॥
देव देवी नृसंसेन सती सीता दुरात्मना ।
हृता लङ्कापुरीशेन विद्या च मम क्रुध्यतः ॥२॥
हा राम वत्स सौमित्रे भ्रातर्भामण्डलेति च ।
देव्यां रुदत्यां सीतायामक्रुध्यं दशमौलये ॥३॥
सीतोदन्तेन तेनाऽथ मुदितो रघुपुङ्गवः ।
सुरसङ्गीतपुरेशं तं रत्नजटिनमाश्लिषत् ॥४॥
भूयोऽपि च पप्रच्छ सीतोदन्तं रघूद्वहः ।
मयोऽपि सोप्याख्यात्तन्मनसः प्रीतिहेतवे ॥५॥

अपृच्छद्रामभद्रस्तान् सुग्रीवादीन्महाभटान् ।
इतः कियति दूरे सा लङ्कापूस्तस्य रक्षसः ॥६॥
तेऽप्यूचुः किं तया पुर्य्या सन्नयाथ दविष्टया ।
रावणस्य जगज्जिष्णो र्यत्सर्व्वेऽनृणवद्वयम् ॥७॥
रामोऽप्यूचे कृतं तस्य जय्याजय्यविचिन्तया ।
दर्शनप्रतिभूवन्त स्तं दर्शयत केवलम् ॥८॥
तस्य दर्शितमात्रस्य सामर्थ्यं ज्ञास्यथाचिरात् ।
सौमित्रिमुक्तनाराचपीयमानगलासृजः ॥९॥
बभाषे लक्ष्मणोऽप्येवं क एष ननु रावणः ।
सारमेय इवासारश्छलेनैवञ्चकार यः ॥१०॥
क्षत्राचारेण तस्याहं छेत्स्यामि छलिनः शिरः ।
संग्रामनाटकं यूयं सभ्यीभूयैव पश्यत ॥११॥
जाम्बवान् व्याजहाराथ सर्व्वं वो युज्यते परम् ।
योहि कोटिसिलोत्पाटी स हनिष्यति रावणम् ॥१२
साधुनाऽनन्तवीर्य्येणाख्यातज्ञानवता ह्यदः ।
अस्मत्प्रत्ययहेतो स्तत्समुत्पाटयतां शिलाम् ॥१३॥
एवमस्त्वित्युक्तवन्तं ते नयन्तिस्म लक्ष्मणम् ।
सपदि व्योमयानेन यत्र कोटिशिलास्ति सा ॥१४॥
उच्चिक्षेप शिलां दोष्णा लक्ष्मणस्तां लतामिव ।
साधु साध्वित्युच्यमानस्त्रिदशैः पुष्पवर्षिभिः ॥१५॥

सञ्जातप्रत्ययास्तेपि व्योमयानेन पूर्व्ववत् ।
किष्किन्धायां समानिन्युर्लक्ष्मणं रामसन्निधौ ॥१६॥
कपिष्टद्वा स्ततः प्रोचुर्युष्मत्तो रावणाच्चयः ।
आदौ प्रेष्योद्विषां दूत इति नीतिमतां स्थितिः ॥१७॥
सन्देशहारकेणापि यदि सिद्ध्येत्प्रयोजनम् ।
पर्य्याप्तं स्वयमुद्योगं कर्म्मणा भूभुजान्तदा ॥१८॥
समर्थः प्रेष्यतां तत्र कोपि दूतो महाभुजः ।
सा दुःप्रवेशनिःकाशा लङ्काहि श्रूयते चितौ ॥१९॥
गत्वा दूतः स लङ्कायां भणिष्यति विभीषणम् ।
सीतार्पणकृते रक्षःकुले स खलु नीतिवान् ॥२०॥
सीतां मोचयितुं सोऽपि रावणं बोधयिष्यति ।
रावणेन त्ववज्ञात स्त्वामेष्यति तदैव हि ॥२१॥
एवं वचसि तेषान्तु रामेणाऽनुमते सति ।
श्रीभूतिं प्रेष्य सुग्रीवो हनूमन्तमथाह्वत ॥२२॥
अथ रामं सभासीनं सुग्रीवादिसमावृतम् ।
नमश्चकार हनुमान् भानुमानिव तेजसा ॥२३॥
ततो रामाय सुग्रीवः शशंसैवमयं हिनः ।
विधुरे परमो बन्धुर्विनयी पावनञ्जयी ॥२४॥
नास्य तुल्यो द्वितीयोऽस्ति सर्व्वविद्याधरेष्वपि ।
सीताप्रवृत्तिलाभार्थं स्वामिन्नेतं तदाऽदिश ॥२५॥

हनुमानप्युवाचैवं कपयः सन्त्यनेकशः ।
मत्समायाः स्नेहतस्त्वेतद्वक्ति सुग्रीवभूपतिः ॥२६॥
गवो गवाक्षो गवयः शरभो गन्धमादनः ।
नीलो द्विविदमैन्दौ च जाम्बवानङ्गदोनलः ॥२७॥
अन्येपि बहवः स्वामिन् सन्तीह कपिपुङ्गवाः ।
तेषां संख्यापूरणोऽहमपि त्वत्कार्य्यसिद्धये ॥२८॥
लङ्कां सराक्षसद्वीपामुत्पाट्येह किमानये ।
बध्वा सवान्धवमथाऽनयामि दशकन्धरम् ॥२९॥
सकुटुम्बं दशग्रीवं हत्वा तत्रैव वा द्रुतम् ।
देवीं जनकजामेवानयामि निरुपद्रवाम् ॥३०॥
रामोपि च जगादैवं सर्वं सम्भवति त्वयि ।
तद्गच्छ पुर्य्यां लङ्कायां सीतां तत्र गवेषय ॥३१॥
मदूर्मिकामिमां देव्या मदभिज्ञानमर्पय ।
तस्याश्चूडामणिश्चाभिज्ञानमत्र समानयेः ॥३२॥
ब्रूहि मद्वाचिकं पंसेर्देवि यल्लक्ष्मणाग्रजः ।
त्वद्वियोगातुरोऽत्यन्तं ध्यायंस्त्वामेव तिष्ठति ॥३३॥
मात्याक्षीर्मद्वियोगेन जीवितं जीवितेश्वरि ।
लक्ष्मणेन हतं द्रक्ष्यस्यचिरादेव रावणम् ॥३४॥
हनुमानप्युवाचैवं यावदाज्ञां विधाय ते ।
लङ्कायाः पुनरायामि तिष्ठेस्तावदिह प्रभो ॥३५॥

इत्युक्त्वा राघवं नत्वा मारुतिः सपरिच्छदः।
लङ्कापुरीं प्रत्यचालीद्विमानेनातिरंहसा ॥३६॥
स गच्छन्नभसाऽपश्यन्महेन्द्रगिरिसानुनि।
मातामहमहेन्द्रस्य महेन्द्रपुरपत्तनम् ॥३७॥
एवञ्च दध्यौ हनुमान्महेन्द्रस्य पुरं स्मरः।
येन मेऽनपराधेऽपि माता निर्वासिता तदा ॥३८॥
इति संस्मृत्य संक्रुद्धो रणतूर्य्यमवादयत्।
ब्रह्माण्डं स्फोटयदिव दिग्मुखः प्रतिशब्दितः ॥३९॥
दृष्ट्वा परबलं राजा महेन्द्रो शक्रविक्रमः।
समं सैन्यैर्निरगमन् स पुत्रो रणकर्म्मणे ॥४०॥
माहेन्द्रराड्हनुमतोरजायत महारणः।
व्योमन्युत्पातजीमूत इवाऽस्त्रवृष्टिभीषणः ॥४१॥
प्राभञ्जनिर्बभञ्जाथ प्रभञ्जन इव द्रुमान्।
परसैन्यानि क्षणेनापि भ्रमन् वेगेन सङ्गरे ॥४२॥
प्रसन्नकीर्त्तिर्माहेन्द्रिरयुध्यत हनूमता।
निघ्नन्निःशङ्कं जामेयसम्बन्धमविदन्नथ ॥४३॥
उभावपि महाबाहू उभावप्यत्यमर्षणौ।
अन्योन्यं दृढयुद्धेन जनयामासतुः श्रमम् ॥४४॥
अथैवं चिन्तयामास युध्यमानोऽपि पावनिः।
आरब्धश्चिरमया युद्धं स्वामिकार्य्यविलम्बकृत् ॥४५॥

न येऽजीवन्ते चणात्तेऽन्ये मम मातृकुलं ह्यदः ।
तथाप्यारब्धनिर्वाहकृते जेतव्यमेव हि ॥४६॥
ध्यात्वेति हनुमान्क्रुद्धः प्रहारैर्मोहयन् चणात् ।
प्रसन्नकीर्त्तिं जग्राह भग्नास्त्ररथसारथिम् ॥४७॥
अग्रहीट् क्षणमायोध्य महेन्द्रमपि मारुतिः ।
नत्वा चैवं समाचख्यौ नप्ता तेऽस्म्यञ्जनासुतः ॥४८॥
रामाज्ञया च वैदेह्या शुद्धैय लङ्कां व्रजन्नहम् ।
अत्रायातः समास्माष्र्यं मातृनिर्वासनं चिरात् ॥४९॥
जातामर्षेण तत्तात योधितोसि सहस्व मे ।
स्वामिकार्याय यास्यामि याहि नः स्वामिसन्निधौ ॥५०॥
महेन्द्रोऽपि समालिङ्ग्य तमित्यूचे महाभुजः ।
प्राक् श्रुतोसि जनश्रुत्या दिष्ट्या दृष्टोऽद्य विक्रमी॥५१
गच्छ स्वस्वामिकार्य्याय पन्थानः सन्तु ते शिवाः ।
इत्युदित्वा महेन्द्रोऽगात् ससैन्यो राघवान्तिके ॥५२॥
व्योम्नाथ हनुमान् गच्छन् द्वीपे दधिमुखाभिधे ।
कायोत्सर्गे तस्थिवांसौ प्रेक्षाञ्चक्रे महामुनी ॥५३॥
तयोरनतिदूरेचाऽपश्यत्तिस्रः कुमारिकाः ।
ध्यानस्था निरवद्याङ्गीर्विद्यासाधनतत्पराः ॥५४॥
दावानलस्तदा द्वीपे प्रजज्वालाऽखिलेपि हि ।
तौ साधू ताः कुमार्य्यश्च निपेतुर्दैवसङ्कटे ॥५५॥

तद्वात्सल्येन हनुमान् विद्ययादाय सागरात् ।
तं दावाग्निं मेघ इव शमयामास वारिभिः ॥५६॥
तदैव सिद्धविद्यास्ताः कन्या ध्यानस्थितौ मुनी ।
मुनी प्रदक्षिणीकृत्य हनूमन्तं बभाषिरे ॥५७॥
साधूपसर्गं साधूनामरक्षः परमार्हतः ।
त्वत्साहाय्येन विद्यानः सिद्धा कालं विनापि हि ॥५८॥
का यूयमिति तेनोक्ताः कन्यास्ता एवमब्रुवन् ।
अस्मिन् गन्धर्वराजोस्ति राजा दधिमुखे पुरे ॥५९॥
स्मस्तस्य कन्याः कुसुम माला कुक्षिभवा वयम् ।
तातं ययाचिरे स्मासु बहवः खेचरेश्वराः ॥६०॥
खेचराङ्गारकोनामोन्मत्तस्त्वास्मास्तस्तेऽभवत् ।
ततस्तस्मै न चान्यस्मै ददौ तातस्त्वरोचकी ॥६१॥
मत्पुत्रीणां पतिः कः स्यादित्यपृच्छत्पिता मुनिम् ।
यः साहसगतेर्हन्ता स स्यादिति च सोवदत् ॥६२॥
।ङ्गिरा न्वेषयंस्तातो नोपलेभे तु तं क्वचित् ।
विद्यासाधनमस्माभि स्तं ज्ञातुञ्च प्रचक्रमे ॥६३॥
विद्याध्वंसनिमित्तं वाङ्गारकेण कृतोद्रवः ।
त्वया च शमितः साधु भो निष्कारणबन्धुना ॥६४॥
मासैः सिद्ध्यति या षड्भिस्त्वत्साहाय्यात्क्षणादपि ।
सा मनोगामिनीनाम विद्या नः सिद्धिमाययौ ॥६५॥

आमूलात्साहसगते वधं रामेण निर्म्मितम् ।
शशंस हनुमांस्तासां लङ्कायां चात्मनोगतिम् ॥६६॥
मुदिता स्ताः पितुर्गत्वा शशंसु स्तदशेषतः ।
सोपि ताभिः समं सद्यः ससैन्योगाद्रघूद्वहम्॥६७॥
उत्पपाताथ हनुमानुपलङ्कं गतश्च सन् ।
ददर्श शालिकां विद्यां घोरां कालनिशामिव ॥६८॥
अरे कपे क्वयासि जातोसि मम भोज्यताम् ।
इति ब्रुवाणा साक्षेपं व्याददातिस्म सा मुखम् ॥६९॥
हनूमांश्च गदापाणिः प्रविवेश तदाननम् ।
अभ्रमध्यमिवादित्य स्तां विदार्य्य च निर्ययौ ॥७०॥
तया कृतञ्च प्राकारं लङ्कापुर्य्याप्रपित्सुनः ।
विद्यासामर्थ्यतोऽभाङ्क्षीन्मंक्षुकर्प्परलीलया ॥७१॥
तद्रक्षारत्नमत्युच्चैः क्रुद्धं वज्रामुखाभिधम् ।
सोऽवधीत्सह युध्वानं युध्वाध्वन्यधुरन्धरः ॥७२॥
हतेवज्रामुखे लङ्का सुन्दरी तस्य कन्यका ।
विद्यावलवती कोपाद्युद्धायाह्वास्त मारुतिम् ॥७३॥
व्योमनीव तडिल्लेखा साचारीच्चतुरं रणे ।
प्रहरन्ती मुहुः सानुमतीव हि हनूमति ॥७४॥
तदस्त्राणि निजैरस्त्रैश्छिन्दानः पावनञ्जयिः ।
तां निरस्त्रीं चकाराशु निष्पत्रामिव वीरुधम् ॥७५॥

क एष इति साश्चर्य्यादाञ्जनेयमुदीक्षितुम् ।
सम्प्रवृत्ता च कामेन ताडिताच्च शिलीमुखैः ॥७६॥
सा हनूमन्तमित्यूचे मद्यापिह्लवघोत्थया ।
अविचार्य्य क्रुधा वीर योधितोसि मुधैव हि ॥७७॥
आख्यातं साधुना पूर्व्वं यस्ते जनकघातकः ।
भावी भर्त्तेति तन्नाथ मामुद्वह वशम्वदाम् ॥७८॥
सकलेपि जगत्यस्मिन् कोन्यस्तव समोन्मदः ।
ततस्त्वाख्यामि नारीषु त्वया पत्यातिगर्व्विता ॥७९॥
एवं विनीतां कन्यां मुदितो हनुमानपि ।
गान्धर्व्वेण विवाहेन सानुरागमुपायत ॥८०॥
स्नातुकाम इव व्योमाटवीपर्य्यटनश्रमात् ।
तदा त्विषामधिपति र्ममज्जापरवारिधौ ॥८१॥
प्रतीचीमुपभुज्याशां गच्छता भानुमालिना ।
सन्ध्याभ्रच्छद्मना तस्या वासांसीवोपनिन्यिरे ॥८२॥
चकाशे दिशि वारुण्यामरुणाभ्रपरम्परा ।
अस्तकाले रवित्यक्ता तेजः पृथगिव स्थितम् ॥८३॥
नवरागो नवरागां तां सिषेवे वारुणीमसौ ।
मां हित्वेत्यपमानेन म्लानास्यात्प्राच्यभूध्रुवम् ॥८४॥
क्रीडास्थानभुवान्तासां परित्यागभुवा रुजा ।
खगैः कोलाहलमिषादाक्रन्द स्तत्र निर्ममे ॥८५॥

ग्लानिमासादयामास चक्रवाकी वराकिका ।
दूरीभूतप्रियतमा ललनेव रजस्वला ॥८६॥
पद्मिनी कलयामास मुखसङ्कोचमुच्चकैः ।
पतिव्रता व्रतेवास्तं गते पत्यावहर्पतौ ॥८७॥
तर्णकोत्कण्ठितास्तूर्णं गावो व्याघ्राघुर्द्रवनात् ।
वायव्यस्नानसम्प्राप्ति मुदितैर्वन्दितोर्द्विजैः ॥८८॥
अस्तकाले त्विषामीशो निजं तेजोऽहर्विभुजे ।
राजेव युवराजाय राज्यसम्पदमार्पयत् ॥८९॥
नागरीभिः प्रतिपदमदीप्यन्त प्रदीपकाः ।
दिवोऽवतीर्णनक्षत्रश्रेणिश्रीपरिमोषिणः ॥९०॥
अस्तमीयुषि चण्डांशौ शशिन्यनुदिते सति ।
तमोत्तम्भितुमारेभे च्छलच्छेकाः खलाः खलु ॥९१॥
किमञ्जनाद्रेश्चूर्णेन पूर्णमेतदथाञ्जनैः ।
रोदसी भाण्डमभितस्तमः पूर्णमलक्ष्यत ॥९२॥
नहि स्थलं नहि जलं न दिशो न नभो न भूः ।
तदानीं किम्बहूक्तेन स्वहस्तोऽपि न लक्ष्यते ॥९३॥
तारा व्योमन्यभिश्यामे तमोलिप्ते विशेषतः ।
चिरं विडम्बयन् द्यूतकटितस्थ वराटिकाः ॥९४॥
व्यक्तोडु कलयामास कज्जलश्यामलं नभः ।
उत्पुण्डरीककालदोहदः सब्रह्मचारिताम् ॥९५॥

एकाकारकरे विष्वक् तमःपूरे प्रसर्पति ।
विश्वं विश्वमनालोकमभूत्पातालसन्निभम् ॥९६॥
स्फीतेऽन्धकारे निःशङ्काः कामिसंघट्टनोत्सुकाः ।
स्वैरं जजृम्भिरे दूत्यो ह्रदे शफरिका इव ॥९७॥
आजानुत्क्षिप्तमञ्जीरा स्तमालश्यामलांशुकाः ।
मृगनाभिविलिप्ताङ्गोऽभिसस्रुरभिसारिकाः ॥९८॥
अथोदयाद्रिप्रासादे सुवर्णकलशोपमः ।
कराङ्कुरमहाकन्द उदियाय निशाकरः ॥९९॥
नैसर्गिकेण वैरेण लक्ष्म्या व्याजात्स्वहेन्दुना ।
नियुद्धमिव तन्वानमन्धकारमलक्ष्यत ॥३००॥
विपुले गोकुल इव क्रीडति स्म नभःस्थले ।
स्वैरङ्गोष्विव एतासु गवेन्द्र इव चन्द्रमाः ॥१॥
व्यक्तमन्तःस्फुरल्लक्ष्मा मृगलक्ष्मा व्यराजत ।
मृगनाभिद्रवाधाररूप्यभाजनसन्निभः ॥२॥
स्खल्यमाना विरहिभिरन्तरादत्तपाणिभिः ।
प्रसस्रुः शीताग्रकराः शरा इव मनोभुवः ॥३॥
चिरभुक्तामपि प्रोष्य पद्मिनीं प्राप्तदुर्दशाम् ।
भृङ्गाः कुमुद्वतीं भेजुर्धिगहो नीचसौहृदम् ॥४॥
शेफाल्या कुसुमानीन्दुः करपातैरपातयत् ।
प्रियमिलत्स्य पुष्पेषोः सज्जीकर्तुमिषूनिव ॥५॥

प्रवर्षयन्निन्दुकान्तान् कुर्व्वाणः सरसीर्न्नवाः ।
खानि शीतरुचिः पूर्व्वंकीर्त्तिनानीव निर्म्ममे ॥६॥
कुलटानामटन्तीनां पद्मिनीनामिवोच्चकैः ।
वितताम मुखम्लानिं सा ज्योत्स्नाधौतदिङ्मुखा ॥७॥
समञ्च लङ्कासुन्दर्य्यां पवनञ्जयनन्दनः ।
रममाणोनिराशङ्कस्तामतीयाय यामिनीम् ॥८॥
अथोदियाय किरणैः स्वर्णस्रवसहोदरैः ।
मार्त्तण्डोमण्डयन्नाशां प्रियां प्राचीन वर्हिषः ॥९॥
अव्याहतं निष्पतन्तो रुचयस्तण्डरोचिषः ।
कुमद्वतीषु सोरासु ययुः प्रस्वापनास्त्रताम् ॥१०॥
त्यक्तानि मौलिमाल्यानि प्रबुद्धाभिः पुरन्ध्रिभिः ।
केशपाशवियोगेनाऽलिनादैररुदन्निव ॥११॥
रात्रिजागरणायासकषायितविलोचना ।
निवर्त्तन्तेस्म गणिकाः कामुकानां निकेतनात् ॥१२॥
स्मरपङ्कजकोशेभ्यो निर्ययुर्भृङ्गराशयः ।
खण्डितामुखपद्मेभ्य इव निश्वासवल्लयः ॥१३॥
उदितादित्यतेजोऽभिर्ल्लुण्ठितद्युतिवैभवः ।
अभवद्रजनीजानिर्ल्लूतातन्तुपटोपमः ॥१४॥
यद्ब्रह्माण्डेपि मातं न तत्तमस्तण्डरोचिषा ।
मेघखण्डानिलेनेव निर्द्धूय क्वापरनीयत ॥१५॥

रात्रेरिवानुबद्धाया निद्राया अपसर्पणात् ।
स्वस्वकर्म्माणि निर्म्मातुं प्रावर्त्तत पुरीजनः ॥१६॥
तदा च हनुमांल्लङ्कां सुन्दरीं सुन्दरोक्तिभिः ।
आपृच्छ्य प्राविशल्लङ्कां नगरीं गुरुविक्रमः ॥१७॥
विभीषणस्य सदनं द्विषद्भटविभीषणम् ।
जगाम श्यामधामाथ पवनञ्जयनन्दनः ॥१८॥
विभीषणेन सत्कृत्य पृष्टस्यागमकारणम् ।
अवोचदञ्जनासूनुः सारगम्भीरगीरदः ॥१९॥
यद्भ्राता रावणस्यासि शुभोदर्कं विचिन्तय तत् ।
रामपत्नीं हृतां सीतां सतीं मोचय रावणात् ॥२०॥
दुःखाकृदिह लोकेऽपि परलोके न केवलम् ।
काकुत्स्थपत्नीहरणं त्वद्भ्रातुर्बलिनोऽपि हि ॥२१॥
विभीषणोऽप्यऽभाषिष्ट साधूक्तं हनुमंस्त्वया ।
सीतां मोचयितुं पूर्वमपुरक्तः स्वाग्रजो मया ॥२२॥
भूयोऽपि हि सनिर्बन्धं प्रार्थयिष्ये स्वबान्धवम् ।
सीतां यदि पुनर्मुञ्चत्येषः सम्प्रति मद्गिरा ॥२३॥
एवं विभीषणेनोक्ते समुत्पत्याञ्जनासुतः ।
जगाम देवरमणोद्याने वैदेह्यधिष्ठिते ॥२४॥
तत्राऽशोकतरोर्मूले कपोललुलितालकाम् ।
सन्तताश्रुपयोधारपल्वलीकृतभूतलाम् ॥२५॥

अम्लानवदनाम्भोजां हिमार्त्तां पद्मिनीमिव।
अत्यन्तक्षामवपुषं प्रथमेन्दुकलामिव ॥२६॥
उष्णनिश्वाससन्तापविधुराधरपल्लवाम्।
ध्यायन्तीं रामरामेति निःस्पन्दां योगिनीमिव ॥२७॥
मलिनीभूतवसनां निरपेक्ष्यां वपुष्यपि।
ददर्श देवीं वैदेहीं पवनञ्जयनन्दनः ॥२८॥चतुर्भिः॥
एवञ्च दध्यौ हनुमानहो सीता महासती।
अस्यादर्शनमात्रेण पवित्रीभवति जनैः ॥२९॥
अस्याश्च विरहे रामः स्थाने सखलु खिद्यति।
रूपवच्छीलवच्चेदृक्कलत्रं कस्य पावनम् ॥३०॥
द्विजोपि हि वराकोऽयं पतिष्यत्येव रावणः।
रघूद्वहप्रतापेन स्वपापेन च भूयसा ॥३१॥
ततो विद्यातिरोभूतः सीतोत्सङ्गेऽङ्गुलीयकम्।
हनुमान् पातयामास तद्दृष्ट्वा मुमुदे च सा ॥३२॥
तदैव गत्वा त्रिजटा दशकण्ठं व्यजिज्ञपत्।
इयत्कालं विषण्णासीत्सानन्दा त्वद्य जानकी ॥३३॥
मन्ये विस्मृतरामेयं रिरंसुर्मयि सम्प्रति।
तज्ज्ञात्वा बोध्यतामेव मूचे मन्दोदरीं स तु ॥३४॥
ततश्च पत्युर्दौत्येन पुनर्मन्दोदरी ययौ।
प्रलोभनकृते सीतां विनीता सेत्यवोचत् ॥३५॥

अद्वैतैश्वर्य्य सौन्दर्य्यवर्य्यस्तावद्दृशाननः।
त्वमप्यप्रतिरूपैव रूपलावण्यसम्पदा ॥३६॥
तदप्यन्येन दैवेन युवयोरुभयोरपि।
न व्यधादुचितो योगस्तथापरद्यास्तु सम्प्रति ॥३७॥
उपेत्य भजनीयन्त्वं भजन्तं भज जानकि।
अहमन्याश्च तत्पत्न्य स्त्वदाज्ञां सुभ्रु बिभ्र त ॥३८॥
सीताप्यवोचदाः पापे पतिद्रूत्यविधायिनि।
त्वद्भर्तुरिव वीच्येत मुखं दुर्मुखि कस्तव ॥३९॥
रामस्य पार्श्वे मां विद्धि सौमित्रिमिह चागतम्।
खरादीनिव हन्तुं द्राग्भवं स्तव सबान्धवम् ॥४०॥
उत्तिष्ठोत्तिष्ठ पापिष्ठे वाच्यं नातःपरं त्वया।
सीतया तर्जितैवं सा सकोपा प्रययौ ततः ॥४१॥
अथाविर्भूय हनुमान् सीतां नत्वा कृताञ्जलिः।
इत्यूचे देवि जयति दिष्ट्या रामः स लक्ष्मणः ॥४२॥
त्वत्प्रवृत्तिकृते रामेणादिष्टोहमिहागमम्।
मयि तत्र गते राम इहैष्यति रिपुच्छिदे ॥४३॥
वाष्पायितेक्षणाऽसीताप्रच्छ त्वमसि को ननु।
दुर्लङ्घ्यमर्णवं चैतं कथं लङ्घितवानसि ॥४४॥
कच्चित्प्राणिति मे प्राणनाथः सौमित्रिणा सह।
क्व वा स्थाने त्वया दृष्टः कालं नयति वा कथम् ॥४५॥

आख्याच्च हनुमानस्मि पवनाञ्जनयोः सुतः ।
विद्यया व्योमयानेन लङ्घितो जलधिर्मया ॥४६॥
समस्तवानराधीशं सुग्रीवं विद्विषद्वधात् ।
पतिं कृत्वाधिकिष्किन्धमस्ति रामः सलक्ष्मणः ॥४७॥
रामोपि त्वद्वियोगेन तप्यमानो दिवानिशम् ।
गिरिर्दवानलेनेव तापयन्न परानपि ॥४८॥
गवेव वत्सोरहितस्त्वया स्वामिनि लक्ष्मणः ।
न जातु लभते सौख्यं शून्याः पश्यन् दिशोऽनिशम् ॥४९
त्वगं सशोकौ सक्रोधौ त्वगन्ते पतिदेवरौ ।
सुग्रीवेणाश्वास्यमानावपि न प्राप्नुतः सुखम् ॥५०॥
भामण्डलोविराधश्च महेन्द्राद्याश्च खेचराः ।
पत्तीभूयोपासते तौ शक्रेशानाविवामराः ॥५१॥
तव प्रवृत्तिमानेतुमहं सुग्रीवदर्शितः ।
रामेण प्रेषितो देवि समर्प्याङ्गुलीयकम् ॥५२॥
चूडामणिरभिज्ञानं त्वत्त आनायितो मया ।
तद्दर्शनेन मामत्रायातं प्रत्येष्यति प्रभुः ॥५३॥
हनुमदुपरोधेन रामोदन्तमुदा च सा ।
विंशते रुपवासानामन्ते व्यधित भोजनम् ॥५४॥
प्रोवाचैवमभिज्ञानं चूडामणिमिमं मम ।
गृहीत्वा वत्स गच्छाशु तिष्ठतः स्वादुपद्रवः ॥५५॥

अत्र त्वामागतं ज्ञात्वा क्रूरकर्म्मैष राक्षसः।
हन्तुमन्तकवन्नूनं समुपस्थास्यते बली ॥५६॥
स्मित्वा सप्रश्रयं सोऽपि जगादेति कृताञ्जलिः।
त्वं मातर्म्मयि वात्सल्यादेवं वदसि कातरा ॥५७॥
रामलक्ष्मणयोः पत्तिस्त्रिजगज्जैत्रयोरहम्।
तपस्वी रावणः कोऽयं ससैन्योऽपि ममाग्रतः ॥५८॥
त्वामपि स्कन्धमारोप्य स्वामिनि स्वामिनोऽन्तिके।
नयामि परिभूयैनं ससैन्यमपि रावणम् ॥५९॥
स्मित्वा सीताप्युवाचैव नहि दूरेपयसि स्वकम्।
रामभद्रं प्रभुं भद्र वदन्नेवं ससौष्ठवम् ॥६०॥
त्वयि सम्भाव्यते सर्व्वं पदातौ रामशार्ङ्गिणः।
परन्तु परपुंस्पर्शो न मेऽर्हति मनागपि ॥६१॥
तद्गत्वा शीघ्रमेवैवं सति सर्व्वं कृतं त्वया।
गते त्वयि यदुद्योगमार्य्यपुत्रः करिष्यति ॥६२॥
अम्बेत्थं स्माह हनुमानेष गच्छाम्यहं परम्।
रक्षसां दर्शयिष्यामि किञ्चिद्विक्रमचापलम् ॥६३॥
जितकाशी दशास्योऽयं परवीर्य्यं न मन्यते।
जानातु रामभद्रीयपत्तेरपि पराक्रमम् ॥६४॥
आमेत्युक्त्वार्प्पयत्तस्य सीता चूडामणिं निजम्।
नत्वा सोपि चचालोच्चैः पदन्यासैर्धुवन् धराम् ॥६५॥

तत्रैव देवरमणोद्याने भंक्तुं प्रचक्रमे।
स वनं वनद्विपवत् प्रसर्प्य क्रूरविक्रमः॥६६॥
रक्ताशोकेषु निःशङ्को वकुलद्रुषुनाकुलः।
सहकारेष्वकारुण्यो निःकम्पश्चम्पकेष्वपि॥६७॥
अमन्दरोषो मन्दारेष्वदयः कदलीष्वपि।
अन्यद्रुष्वपि रम्येषु भङ्गलीलाञ्चकार सः॥६८॥
तदुद्याने चतुर्द्वारि द्वारपालाः क्षपाचराः।
अधावन्त निहन्तुं तं तदा मुद्गरपाणयः॥६९॥
हनूमति स्खलन्ति स्म तेषां प्रहरणानि तु।
महाम्भोनिधिकल्लोला इव तीरमहीधरे॥७०॥
पावनिः कुपितस्तेभ्यस्तैरथोद्यानपादपैः।
प्रजहार निरायासः सर्वमस्त्रं बलीयसाम्॥७१॥
भङ्क्त्वा निवाभाङ्क्षीत्तानारक्षक्षपाचरान्।
क्षुद्रानैक्षाकुपङ्क्तिः ससमीरण इवास्खलन्॥७२॥
हनूमता क्रियमाणमुद्यानारक्षसङ्क्षयम्।
गत्वा चचक्षिरे केचित् क्षपाचरपतेस्तदा॥७३॥
ततः सह बलैरक्षः कुमारं राक्षसेश्वरः।
समादिक्षद्धनुमतो घातनाया रिघातनम्॥७४॥
आक्षिपन्तं रणायाक्षं बभाषे पावनञ्जयिः।
भोजनादौ फलमिव रणादौ मे त्वमापतः॥७५॥

मुधा कपे गर्ज्जसीति तर्ज्जयन् रावणात्मजः ।
ववर्ष विशिखैस्तीक्ष्णैरक्षणोः प्रसररोधिभिः ॥७६॥
शीघ्रीलोपीषुवर्षेण सम्प्रकर्षेण रावणिम् ।
विदधे वारिभिर्द्वीपमुद्वेल इव वारिधिः ॥७७॥
शस्त्राशस्त्रि चिरं कृत्वा कौतुकादञ्जनासुतः ।
रणपारम्परिप्रेप्सु रक्षं पशुमिवावधीत् ॥७८॥
ततो भ्रातृवधामर्षादाययौ द्रुतमिन्द्रजित् ।
मारुते तिष्ठ तिष्ठेति स सौष्ठवमुदीरयन् ॥७६॥
द्वयोरपि महाबाह्वोः कल्पान्त इव दारुणः ।
विश्वविक्षोभकरणश्चिरं प्रववृते रणम् ॥८०॥
वर्षन्तौ वारिधारावच्छरौघैः शस्त्रघोरणी ।
व्योमस्थौ तावलक्ष्येतां पुष्करावर्त्तकाविव ॥८१॥
अन्तरीक्षं तयोरस्त्रैरास्फालद्भिर्निरन्तरैः ।
क्षणादजनि दुःप्रेक्षं यादोभिरिव वारिधिः ॥८२॥
मुमोच यावन्त्यस्त्राणि दुर्वारो रावणात्मजः ।
तदानेकगुणैरस्त्रैस्तानि चिक्षेप मारुतिः ॥८३॥
हनूमदस्त्रच्छन्नाङ्गाः सर्वेपीन्द्रजितो भटाः ।
अपश्यन् रक्तहृदनीं पर्वता इव जङ्गमाः ॥८४॥
दृष्ट्वा नष्टं निजं सैन्यं स्वञ्च मोघीकृतायुधम् ।
अमुचन्नागपाशास्त्रं शीघ्रैलाय दशास्यभूः ॥८५॥

नागपाशैर्दृढीयोभि स्तदैवापादमस्तकम् ।
अबन्धि चन्दन इवाभितः पवननन्दनः ॥८६॥
स नागपाशबन्धोपि समसाहि हनूमता ।
कौतुकाद्दिवणं दत्ते शक्तो जयमपि द्विषाम् ॥८७॥
हृष्टे नेन्द्रजिता निन्ये हनूमानुपरावणम् ।
निरीक्ष्यनासां फुल्लाक्षैराक्षसै जयसाक्षिभिः ॥८८॥
मारुतिं रावणः स्माह दुर्मते किं कृतं त्वया ।
आजन्ममामकीनेनाश्रितौ यत्तौ तपस्विनौ ॥८९॥
वने वासौ फलाहारौ मलिनौ मलिनांशुकौ ।
किरातावित्र तौ तुष्टौ तुभ्यङ्कां दास्यतः श्रियम्॥९०॥
तत्रापि मन्दबुद्धे त्वं तद्वाचा किमिहागमः ।
येनेहायातमात्रोपि प्राप्तोसि प्राणसंशयम् ॥९१॥
दक्षौ भूचारिणौ तौ तु यत्ताभ्यां कारितोश्रदः ।
अङ्गारान्यरहस्तेन कर्षयन्तिहि धूर्त्तकाः ॥९२॥
यत्सेवक चरोमे त्वमद्य दूतं परस्य च ।
तदवध्योसि रे शिक्षामात्राय तु विडम्ब्यसे ॥९३॥
हनुमानप्युवाचैवं कदाहं तव सेवकः ।
कदा ममाभू स्त्वं स्वामी वदन्नेवं न लज्जसे ॥९४॥
एकदा युधि सामन्तो बज्रमन्यःखरः सते ।
त्वन्मैत्र्या वरुणबन्धान्मम पित्रा मोचितः पुरा ॥९५॥

साहाय्यार्थं त्वया हूतोऽहमप्यभ्यागमं पुरा ।
रणे वरुणपुत्रेभ्य स्त्वामरक्षञ्च सङ्कटे ॥९६॥
साहाय्यस्य न योग्योसि सांप्रतं पापतत्परः ।
सम्भाषोपि हि पापाय परस्त्रीहारिणस्तव ॥९७॥
त्वदीये तं न पश्यामि योहि त्वां त्रास्यतेऽधुना ।
एकस्मादपि सौमित्रे दूरे रामस्तदग्रजः ॥९८॥
तद्गिरा कुपितोभालाहितभ्रुकुटिभीषणः ।
दशाननो दशन्नोष्ठं दशनैरिदमभ्यधात् ॥९९॥
मदरीनाश्रितोसि त्वं मां चारीकृतवानसि ।
तन्नूनं मर्त्तुकामोसि वैराग्यं तव किं तव ॥४००॥
यथा कुष्टविशीर्णाङ्गं मुमूर्षुमपि कोपि न ।
हत्वाभयान्निहन्त्येवं हन्यात्को दूतमप्यरे ॥१॥
आरोप्य रासभे पञ्चशिखीकृत्यच सम्प्रति ।
अन्तर्लङ्कं प्रतिपथं भ्राम्यसे लोकवेष्ठितः ॥२॥
इत्युक्तो मारुतिः क्रुद्धो त्रोटयत्पाशपन्नगान् ।
बद्धोहि नलिनीनालैः कियत्तिष्ठति कुञ्जरः ॥३॥
तडिद्दण्ड इवोत्पत्य किरीटं राक्षसप्रभोः ।
कणशश्चूर्णयामास पादघातेन मारुतिः ॥४॥
हन्यतां गृह्यतामेष इति जल्पति रावणे ।
आनायामिव सोऽभाङ्क्षीत्ततपुरीं पाददुर्द्दरैः ॥५॥

क्रीडां कृत्वैवमुत्पत्य सुपर्ण इव पावनिः ।
राममेत्यानमत्सीताचूडारत्नं समर्पयत् ॥६॥
सीताचूडामणिं तन्तु साक्षात्सीतामिवागताम् ।
आरोपयामास हृदि स्पर्शन् रामो मुहुर्मुहुः ॥७॥
आलिङ्ग्य दाशरथिना सुतवत्प्रसादात्
पृष्टः शशंस दशवक्त्रविमानानान्ताम् ।
सीताप्रवृत्तिमखिलां हनुमान्यथावत्
आकर्ण्यमानभुजविक्रमसम्पदन्यैः ॥४०८॥

इत्याचार्य्य श्रीहेमचन्द्रविरचिते सीताप्रवृत्त्या-
नयनो नाम षष्ठः सर्गः ॥६॥

अथ रामः स सौमित्रिः सुग्रीवाद्यैर्वृतोभटैः ।
लङ्काविजययात्रायै प्रतस्थे गगनाऽध्वना ॥१॥
भामण्डलो नलो नीलो महेन्द्रः पावनञ्जयिः ।
विराधश्च सुषेणश्च जाम्बवानङ्गदोपि च ॥२॥
महाविद्याधराधीशाः कोटिशोन्येपि तत्क्षणम् ।
चेलुरामं समावृत्य स्वसैन्यैश्छन्नदिग्मुखाः ॥३॥
विद्याधरैराहूतानि यात्रातूर्य्याण्यनेकशः ।
नादैरत्यन्तगम्भीरैर्बिभराञ्चक्रुरम्बरम् ॥४॥

विमानैः स्यन्दनैरश्वैर्गजैरन्यैश्च वाहनैः ।
खेजग्मुः खेचराः स्वामिकार्य्यसिद्धावहंयवः ॥५॥
उपर्य्युदन्वतो गच्छन् ससैन्योराघवः क्षणात् ।
वेलन्धरपुरं प्राप वेलन्धरमहीधरे ॥६॥
समुद्रसेतू राजानौ समुद्राविव दुर्द्धरौ ।
तत्र रामाग्रसैन्येनारेभाते योजनायतौ ॥७॥
नलः समुद्रं सेतुं च नीलोऽबध्नान्महाभुजः ।
तौतुराममनैषीच्च मनीषी स्वामिकर्म्मणि ॥८॥
काकुत्स्थः स्थापयामास तथैव पुनरेव तौ ।
रिपावपि पराभूते महान्तोहि कृपालवः ॥९॥
समुद्रोपि हि रूपाभिरामा रामानुजन्मने ।
रामा मतल्लिकास्तिस्रः प्रददौ निजकन्यकाः ॥१०॥
उषित्वा तां निशां सेतुसमुद्रानुगतः प्रगे ।
क्षणादासादयामास सुवेलाद्रिं रघूद्वहः ॥११॥
सुवेलं नाम राजानं जित्वा तत्रापि दुर्ज्जयम् ।
उवासैकां निशां रामः प्रातर्भूयश्चचाल च ॥१२॥
उपलङ्कमथोऽहंसद्वीपे हंसरथं नृपम् ।
जित्वा तस्थौ कृतावासस्तत्रैव रघुपुङ्गवः ॥१३॥
आसन्नस्थे च काकुत्स्थे मीनस्थित इवार्कजे ।
लङ्का क्षोभमुपेयाय विश्वकप्रलयशङ्किनी ॥१४॥

सन्नह्यन्तिस्म युद्धाय सामन्ता रावणस्य ते।
हस्त प्रहस्त मारीच सारणाद्याः सहस्रशः ॥१५॥
रावणो रणतूर्य्याणि दारुणान्यथ कोटिशः।
किङ्करैस्ताडयामास द्विषत्ताडनपण्डितः ॥१६॥
तदा दशास्यमभ्येत्य नत्वाऽवोचद्विभीषणः।
क्षणं प्रसीद विश्रम्य शुभोदर्कं वचो मम ॥१७॥
अविमृश्य पुरा चक्रे लोकद्वितयघातकम्।
परदारापहरणं लज्जितं तेन ते कुलम् ॥१८॥
निजभार्य्यां समानेतुं काकुत्स्थोऽयमुपस्थितः।
आतिथ्यमिदमेवास्मै तत्कलत्रार्पणं कुरु ॥१९॥
सीतां त्वत्तोऽन्यथाकारमपि रामो ग्रहीष्यति।
निग्रहीष्यति चाशेषं त्वया सह कुलं तव ॥२०॥
दूरे स्तां रामसौमित्री तौ साहसखरान्तकौ।
तत्पत्तिरेको हनुमान् दृष्टो देवेन किं नहि ॥२१॥
इन्द्रश्रियोऽधिका श्रीस्ते तां सीताकारणेन मा।
परिहार्षीर्भवेदेवमुभयभ्रष्टता तव ॥२२॥
अथेन्द्रजिदुवाचैवं त्वया ह्याजन्मभीरुणा।
दूषितं नः कुलं सर्व्वं नासि तातस्य सोदरः ॥२३॥
इन्द्रस्यापि विजेतारं नेतारं सर्वसम्पदाम्।
तातं सम्भावयन्नेवं नूनं मूर्ख मुमूर्षसि ॥२४॥

पुरापि छलितस्तात त्वया ह्यनृतभाषिणा ।
प्रतिज्ञाय दशरथस्य वधं यदकृथा न हि ॥२५॥
दूरायातं दाशरथिं तातादृत्तितुमिच्छसि ।
दर्शयन् भयमुत्पाद्य भूचरेभ्योऽपि निस्त्रपः ॥२६॥
तन्मन्ये रामगृह्योसि मन्त्रेष्वधिकरोषि नः ।
आप्तेन मन्त्रिणा मन्त्रः शुभोदर्कोहि भूभुजाम् ॥२७॥
विभीषणोप्युवाचैवं शत्रुगृह्यो न खल्वहम् ।
पुत्ररूपस्तु शत्रुस्त्व मुत्पन्नः कुलनाशकृत् ॥२८॥
अयमैश्वर्य्यकामाभ्यामन्धस्तावत्पिता तव ।
जन्मान्ध इव रे मुग्ध दुग्धास्य त्वन्तु वेत्सि किम्॥२९॥
राजन्ननेन पुत्रेण चरित्रेण निजेन च ।
पतिष्यस्यचिरादेव ताम्यामि त्वत्कृते मुधा ॥३०॥
रावणोप्यविकं क्रुद्धः खड्गमाकृष्य भीषणम् ।
विभीषणवधायोच्चै रुदस्थाद् दैवदूषितः ॥३१॥
विभीषणोपि भ्रुकुटीभीषणस्तम्भमायतम् ।
उत्पाट्य गजवद्योद्धु मुत्तस्थावभिरावणम् ॥३२॥
कुम्भकर्णेन्द्रजिद्भ्रान्तौ पतित्वा द्रुतमन्तरे ।
युद्धान्निषिध्य नीतौ स्वं स्थानं शालामिव द्विपौ ॥३३॥
अरे निर्य्याहि मत्पुर्य्या आश्रयाशोसि वह्निवत् ।
इत्युक्तो रावणेनागाद्रामाभ्यर्णं विभीषणः ॥३४॥

रक्षोविद्याधराणाञ्चाऽक्षौहिण्यस्त्रिंशदुत्कटाः।
हित्वा लङ्काधिपं सद्योप्यनुजग्मुर्विभीषणम् ॥३५॥
आपतन्तञ्च तं प्रेक्ष्य सुग्रीवाद्याः प्रचुक्षुभुः।
यथा तथाहि विश्वासः शाकिन्यामिव न द्विषि ॥३६॥
आदौ स पुरुषं प्रेष्य रामाय स्वमजिज्ञपत्।
विश्वासपात्रसुग्रीव मुखं रामोप्युदैक्षत ॥३७॥
सुग्रीवोप्यब्रवीदेते यद्यप्याजन्ममायिनः।
प्रकृत्या राक्षसा क्षुद्रा स्तथाप्यायात्वसाविह ॥३८॥
ज्ञास्यामः प्रेषणैरेव भावमस्य शुभाऽशुभम्।
दृष्टभावानुरूपञ्च करिष्याम इह प्रभो ॥३९॥
तदभिज्ञोऽभ्यधादेवं विशालो नाम खेचरः।
महात्मा धार्म्मिकस्त्वेष रक्षःस्वेको विभीषणः ॥४०॥
सीता मोक्षाय जल्पंश्चानल्परोषेण बन्धुना।
निर्वासितः शरण्यं त्वा मागान्नैवैतदन्यथा ॥४१॥
श्रुत्वेति रामो द्वाःस्थेन विभीषणमवीविशत्।
पादयोः क्षिप्तमूर्ध्नानं परिरेभे च संभ्रमात् ॥४२॥
विभीषणोप्युवाचैवं हित्वा दुर्न्नयमग्रजम्।
त्वामागतोस्मि भक्तं मां तत्सुग्रीववदादिश ॥४३॥
लङ्काराज्यं तदा तस्मै प्रत्यपद्यत राघवः।
न मुधा भवति क्वापि प्रणिपातो महात्मसु ॥४४॥

हंसद्वीपे दिनान्यष्टावतिवाह्य रघूद्वहः ।
कल्पान्तवातवल्लङ्कां प्रत्यचालीच्चमूवृतः ॥४५॥
चम्वा रुद्वा पृथुत्वेन पृथ्व्या विंशतियोजनम् ।
रणाय सज्जः काकुत्स्थोऽवतस्थे स्थेमपर्व्वतः ॥४६॥
रामसेनाकलकलो वेलाध्वनिरिवोदधेः ।
लङ्कां बधिरयामास स्फुटदब्रह्माण्डभूरिव ॥४७॥
दशकन्धरसेनान्योऽनन्यसाधारणौजसः ।
सद्यः संवर्णयामासुः प्रहस्ताद्या उदायुधाः ॥४८॥
केचिन्मतङ्गजोद्वाह्यैरपरे वाहवाहनैः ।
शार्दूलवाह्यैरनेरतु खरवाह्यै रथैः परे ॥४९॥
कुवेरवन्नरैः केचिन्मेषैः केचित्तु वह्निवत् ।
यमवन्महिषैः केचित्केचिद्रेवन्तवद्धयैः ॥५०॥
विमानैर्देववत्केचित्सन्नद्धाः समरकर्म्मणे ।
उत्पत्य युगपद्वीराः परिवव्रु र्दशाननम् ॥५१॥
रोषारुणाक्षः सन्नह्य विविधायुधपूरितम् ।
अध्यास्त स्यन्दनं रत्नश्रवःप्रथमनन्दनः ॥५२॥
भानुकर्णः शूलपाणि र्दण्डपाणिरिवापरः ।
उपेत्य दशकण्ठस्य समभूत्पारिपार्श्विकः ॥५३॥
कुमाराविन्द्रजिन्मेघवाहनावपराविव ।
दोर्द्दण्डौ दशकण्ठस्य पार्श्वयोरेत्य तस्थतुः ॥५४॥

स्तनवोऽनेऽपि दोष्मान्तःसामन्ताः कोटिशोऽपि च।
शुकसारणमारीचमयसुन्दादयोऽभ्ययुः ॥५५॥
अचौहिणीनां सहस्रै रसंख्यैः संख्यकर्मठैः।
दिशः प्रच्छादयन् पूर्व्याः प्रचचाल दशाननः ॥५६॥
शार्दूलकेतवः केचित् केचिच्छरभकेतवः।
चमूरुकेतवः केचित् केचित्करटिकेतवः ॥५७॥
मयूरकेतवः केचित्केचित्पन्नगकेतवः।
मार्जारकेतवः केचित्केचित्कुक्कुटकेतवः ॥५८॥
कोदण्डपाणयः केचित्केचिन्निस्त्रिंशपाणयः।
भुशुण्डिपाणयः केचित्केचिन्मुद्गरपाणयः ॥५९॥
त्रिशूलपाणयः केचित्केचित्परिघपाणयः।
कुठारपाणयः केचित्केचिच्च पाशपाणयः ॥६०॥
विपचवीरान् पृच्छन्तो नामग्राहं मुहुर्मुहुः।
दशास्यवीरा श्चतुरं विचेरू रणकर्मणि ॥६१॥
वैताल्यस्येव सैन्यस्य प्रथिम्नाच्छाद्य मेदिनीम्।
पञ्चाशद्योजनान्यस्थाद्रावणो रणकर्मणे ॥६२॥
स्वनायकान् प्रशंसन्तो निन्दन्तः परनायकान्।
परस्परं चाक्षिपन्तः कथयन्तो मिथोऽभिधाः ॥६३॥
अस्त्राण्यस्त्रै र्वादयन्तः कराऽस्फोटपुरस्सरम्।
रामरावणयोः सैन्या मिमिलुः कांस्यतालुवत् ॥६४॥

गच्छ गच्छ तिष्ठ तिष्ठ माभैषीरुत्सृजायुधम्।
कुरुष्वायुधमित्याजौ भटानां तत्र वागभूत् ॥६५॥
शल्यानिःशङ्कवोबाणाश्चक्राणिपरिघागदाः।
समुत्पेतु र्युधाश्वभ्रो वनान्तर्विहगा इव ॥६६॥
खड्गैर्मिथोघातभग्नैर्वैगलत्तैश्च मौलिभिः।
उच्छलद्भिरभून्नाना केतुराह्वर्विवर्खं तदा ॥६७॥
सुभटा मुद्गराघातैर्लोठयन्तो द्विपान्मुहुः।
दण्डकन्दुकिनीं क्रीडां तन्वाना इव रेजिरे ॥६८॥
कुठारघातैराच्छिन्ना भटानामपरैर्भटैः।
प्रच्छ्नशाखाः पतन्तिस्म शाखाः शाखावतामिव ॥५६॥
वीराः शिरांसि वीराणां छित्वा भूमौ प्रचिच्छिपुः।
बुभुक्षितायकीनाशायोचितान्कविलानिव ॥७०॥
रक्षसाम्बानराणाञ्च युद्धेरस्मिन्महौजसाम्।
दायादानान्धनमिव जयः साध्योऽभवच्चिरम् ॥७१॥
चिरं प्रवर्त्तमाने च समरे तत्र वानरैः।
अभञ्जि राक्षबलं काननं हि महाबलैः ॥७२॥
भग्ने रक्षोबले हस्तप्रहस्तौ योद्धुमुद्यतौ।
वानरैः सह लङ्केशजयप्रतिभुवौ सदा ॥७३॥
द्वयोरपि तयोर्युद्धेऽध्वरदीक्षितयो रथ।
सम्मुखीनावुदस्थातां नलनीलौ महाकपी ॥७४॥

हस्तो नलश्चादितोपि सम्मुखीनौ महाभुजौ ।
रथारूढावमिलतां चक्रात्रक्रग्रहाविव ॥७५॥
आस्फालयामासतु स्तावधिज्यीकृत्यधन्वनी ।
ज्यानादेन मिथोयुद्धन्निमन्त्रणपराविव ॥७६॥
तथावहृषतुर्बाणांस्तौ द्वावपि परस्परम् ।
शरश्रूलैर्यथाभूतां रथौ स्वामिन्निभौ तयोः ॥७७॥
क्षणं नले क्षणं हस्ते भूताञ्जयपराजयौ ।
तद्वालान्तरमज्ञायि न तत्र निपुणैरपि ॥७८॥
सभ्यीभूतखवीराणामग्रेहीणो नलोबली ।
अविहस्तो हस्तशिरः क्षुरप्रेणाच्छिदत् क्रुधा ॥७९॥
सद्यः प्रहस्तं नीलोऽपि हस्तं नल इवावधीत् ।
दैव्यभूत्पुष्पवृष्टिश्चोपरिष्टान्नलनीलयोः ॥८०॥
हस्तप्रहस्तनिधानाद्दशाननबले क्रुधा ।
मारीचः सिंहजघनः स्वयम्भूः सारणः शुकः ॥८१॥
चन्द्रार्कोद्दामवीभत्साः कामाक्षोमकरोज्वरः ।
गम्भीरः सिंहरथ्यश्च रथा अन्येप्युपासरन् ॥८२॥ युः
मदनाङ्कुर सन्ताप प्रथिता क्रोशनन्दनाः ।
दुरितानयपुष्पास्त्र विघ्नप्रीतिकरादयः ॥८३॥
कपयोराक्षसै साद्ध मयुध्यन्त पृथक् पृथक् ।
उत्पतन्तःपतन्तश्च कुक्कुटैरिव कुक्कुटाः ॥८४॥

मारीचरक्षःसन्तापं नन्दनोज्वरराक्षसम्।
उद्दामराक्षसो विम्रंशुकं दुरितवानरः ॥८५॥
राक्षसः सिंहजघनः प्रथितं नाम वानरम्।
योधयित्वा दृढं जघ्नुर्यावत्तज्च भास्करः ॥८६॥
द्वयोरपि हि सैन्यानि रामरावणयो स्ततः।
निष्टन्त्यास्तुः शोधयन्तः स्वान् हतानहतानपि॥८७॥
विभातायां विभावर्य्यां प्रत्यकं दानवा इव।
प्रतिरामबलं रक्षो योधा योद्धुं डुढौकिरे ॥८८॥
मध्ये सैन्यं दशास्योऽभून्मध्ये मेरुरिवाचलः।
गजरथ्यरथारूढ़ स्वचाल रणकर्म्मणे ॥८९॥
बिभ्राणो विविधान्यस्त्राण्यन्तकादपि भीषणः।
तत्कालाकणया शत्रून् दृशापि हि दहन्निव ॥९०॥
पश्यन् प्रत्येकमप्यात्मसेनान्यं शतमन्युवत्।
मन्यमानस्तृणायारीन् रावणोऽगाद्रणावनिम् ॥९१॥ यु०
तेपि राघवसेनान्यः सैन्यैः सह महौजसः।
वीक्ष्यमाणा दिव्यमरैः समरायोपतस्थिरे ॥९२॥
सनदीकमिव क्वापि रक्तवारिभिरुद्धतैः।
उत्पर्वमिव क्वापि पतितैः कपिकुञ्जरैः ॥९३॥
क्वचिद्व्योन्मकरमिव मकरास्त्रैरथच्युतैः।
उद्दन्तमिव च क्वापि सामिमग्नै महारथैः ॥९४॥

उत्ताण्डैः कवन्धैश्च कृतस्थानमिव क्वचित् ।
अजायत क्षणेनापि समराजिरभूतलम् ॥९५॥ त्रि०
अथ रावणहुङ्कारप्रेरितैरजनीचरैः ।
सर्व्वैः सर्व्वाभिसारेण कपिसैन्या बभञ्जिरे ॥९६॥
क्रुद्धः स्वसैन्यभङ्गेन सुग्रीवोऽधिज्यकार्मुकः ।
स्वयं चचाल चलयन्नचलां प्रबलैर्बलैः ॥९७॥
राजन्निहैव तिष्ठ त्वं मामैवेक्षस्व विक्रमम् ।
एवं निषिद्ध्य सुग्रीवं हनुमानचलद्युधि ॥९८॥
हनुमान् राक्षसानीकमनेकानीकदुर्मदम् ।
दुर्ग्राहमप्यगाहिष्ट महाब्धिमिव मन्दरः ॥९९॥
अथ पर्य्यन्यवद्गर्जन्नूर्ज्जितं युधि दुर्ज्जयः ।
अढौकत धनुस्तूणमाली माली हनूमते ॥१००॥
हनुमन्मालिनौ वीरौ धनुष्टङ्कारकारिणौ ।
पुच्छास्फोटकरौ सिंहाविवोद्दामौ विरेजतुः ॥१॥
अस्त्रैर्मालिहनूमन्तौ प्रजह्राते परस्परम् ।
चिच्छेदाते मिथोऽस्त्राणि मिथो तर्ज्जयताञ्चतौ ॥२॥
चिरञ्च युध्वा हनुमान्मालिनं वीर्य्यशालिनम् ।
चक्रे निरस्त्रं निस्तोयं ग्रीष्मार्क इव पल्वलम् ॥३॥
गच्छ गच्छ जरद्रक्षः किं हतेन त्वया ननु ।
इति ब्रुवाणं श्रीशैलमेत्य धूम्रोदरोऽवदत् ॥४॥

अरे रे म्रियसे पाप वदन्नेवं हि कद्दद ।
एह्येष युद्धस्व मया न भवस्येहि मास्मगाः ॥५॥
मारुतिस्तद्वचः श्रुत्वा हुङ्कारमिव मृगाधिपः ।
नूकुर्व्वन्नुर्व्वहुङ्कारश्छादयामास तं शरैः ॥६॥
तद्वाणवृष्टिं निर्द्धूय शरैर्वज्रोदरोपि तम् ।
तिरयामास मार्त्तण्डं प्रावृट्काल इवाम्बुदैः ॥७॥
अहो वज्रोदरोवीरो योऽलमस्मै हनूमते ।
अहो वीरः पावनिर्योऽलं वज्रोदररक्षसे ॥८॥
एवं गिरोरणक्रीडा सद्ख्यानान्दिवौकसाम् ।
असहिष्णुर्द्विषज्जिष्णुर्हनूमन्मानपर्व्वतः ॥९॥
वर्षन्युगपदस्त्राणि चित्राण्युत्पातमेघवत् ।
वज्रोदरं तमवधीत् पश्यतामपि रक्षसाम् ॥१०॥त्रि०॥
वज्रोदरवधक्रुद्धो रावणिर्जम्बुमाल्यथ ।
तर्ज्जन् मारुतिमाह्वास्त प्रतिकार इव द्विपम् ॥११॥
उभावपि महामल्लावन्योऽन्यवधकाङ्क्षिणौ ।
युयुधाते चिरं वाणैः पन्नगैर्वार्त्तिकाविव ॥१२॥
इषुभ्यः प्रतियच्छन्तौ द्विगुणः द्विगुणानिषून् ।
परस्परं प्रापतुस्तावधमर्णोत्तमर्णताम् ॥१३॥
क्रुद्धोथ हत्वा हनुमानरथो रथसारथिम् ।
तं द्विषं ताड़यामास मुद्गरेण गरीयसा ॥१४॥

मूर्च्छितो जम्बुमाल्युर्व्यां निपपात पपात च ।
रुषा महोदरो रक्षो वीरो वर्षन् शिलीमुखान् ॥१५॥
अन्येपि राक्षसभटा हनूमन्तं जिघांसवः ।
यान्तं श्वान इव क्रोडं वेष्टयामासुरुन्नकैः ॥१६॥
दोष्णोः केपि मुखे केपि केप्यङ्गे हृदि केपि च ।
कुक्षौ केपि शरैस्तीक्ष्णैर्जघ्निरे ते हनूमता ॥१७॥
अन्तर्वणान्द्व इव मध्येऽम्भोधीववाडवः ।
मध्ये रक्षोबलं वीरश्चकाशामास मारुतिः ॥१८॥
क्षणादभांक्षीद्रक्षांसि तमांसीव दिवाकरः ।
महौजसां शिरोरत्नं पवनञ्जननन्दनः ॥१९॥
रक्षोभङ्गेन संक्रुद्धः कुम्भकर्णोऽथ शूलभृत् ।
ईशान इव भूयिष्ठः स्वयं योद्धुमधावत ॥२०॥
कानप्यद्रिप्रहारेण मुष्टिघातेन कानपि ।
कांश्चित्कूर्परघातेन तलघातेन कांश्चन ॥२१॥
कांश्चिन्मुद्गरघातेन शूलघातेन कांश्चन ।
कानप्यन्योऽन्यघातेन कुम्भकर्णोऽवधीत्कपीन् ॥२२॥
कल्यान्तार्णवकल्यान्तमापतन्तं तरस्विनम् ।
रावणानुजमालोक्य सुग्रीवः समधावत ॥२३॥
भामण्डलोदधिमुखो महेन्द्रः कुमुदोऽङ्गदः ।
अपरेप्यन्वधावन्त प्रदीपन इवोद्यते ॥२४॥

दशाननानुजं पञ्चाननं व्याध्या इवारुधन् ।
वर्षन्तोऽस्त्राणि चित्राणि युगपद्वानरोत्तमाः ॥२५॥
प्रस्वापनास्त्रं तेषूच्चैः कालरात्रिमिवापरम् ।
रात्रिञ्चरवरोमुञ्चदमोघं मुनिवाक्यवत् ॥२६॥
निद्रायमाणं स्वं सैन्यं दिवा कुमुदखण्डवत् ।
दृष्ट्वा सस्मार सुग्रीवो महाविद्यां प्रवोधनीम् ॥२७॥
अरेद्य कुम्भकर्णोऽस्तौल्युच्चैस्तु मलकारिणः ।
उत्तस्थुर्वानरभटाः खगा इव निशात्यये ॥२८॥
उपाद्रवन् कुम्भकर्णमाकर्णाकृष्टकार्मुकाः ।
सुग्रीवाधिष्ठिताः सुप्तबोधिनः कपिकुञ्जराः ॥२९॥
सुग्रीवोदलयामास कुम्भकर्णस्य सारथिम् ।
रथं रथ्यांश्च गदया गदङ्कारो गदानिव ॥३०॥
भूमिष्ठः कुम्भकर्णोऽथ हस्तेनादत्त मुद्गरम् ।
एकशृङ्गोगिरिरिव सुग्रीवायाऽभ्यधावत ॥३१॥
युद्धार्थं धावतस्तस्याङ्गवातेन गरीयसा ।
भूयांसः कपयः पेतुः करिस्पर्शेन वृक्षवत् ॥३२॥
प्लवङ्गमैरस्खलितः स्थलीरिव नदीरयः ।
सुग्रीवरथमाहत्याऽचूर्णयन्मुद्गरेण सः ॥३३॥
खे समुत्पत्य सुग्रीवः शिलामेकां महीयसीम् ।
मुमोच कुम्भकर्णाय वज्रीवज्रमिवाद्रये ॥३४॥

कुम्भकर्णो मुद्गरेण तां शिलां कणशोऽकरोत् ।
चूर्णातिकीं रजोवृष्टिं कपीनां दर्शयन्निव ॥३५॥
तडत्तडितिकुर्वाणं तड़िद्दण्डास्त्रमुत्कटम् ।
रावणावरजायाथ वालिनोऽवरजोऽमुचत् ॥३६॥
तडिद्दण्डाय चण्डाय तस्मै शस्त्राण्यनेकशः ।
कुम्भकर्णः प्रचिक्षेप मोघीभूतानि तानितु ॥३७॥
भानुकर्णः पपातोर्व्यां तडिद्दण्डेन ताडितः ।
जगद्भयङ्कराकारः कल्पान्त इव पर्वतः ॥३८॥
मूर्च्छिते भ्रातरि क्रुद्धः स्वयमेव दशाननः ।
साक्षाद्दिवान्तकोऽचालीद्भ्रकुटीभीषणाननः ॥३९॥
नत्वेन्द्रजितमित्यूचे स्वामिं स्तव पुरो रणे ।
न यमो वरुणोनापि न कुबेरो न वाहरिः ॥४०॥
तिष्ठन्ति किं हृतावेगा एवैते देव तिष्ठ तत् ।
गत्वैष तान् हनिष्यामि वृष्टोमशकमुष्टिवत् ॥४१॥
निषिध्यैवं दशग्रीवं मनोद्ग्रीवः स शक्रजित् ।
आम्नानः प्रविवेशान्तः कपिसैन्यं महाभुजः ॥४२॥
कासारः कासरस्येव सैकैरापततः सतः ।
कपिभिर्मुमुचे तस्य समरोर्वीमहौजसः ॥४३॥
स वक्षतः कपीनूचे रे रे तिष्ठत वानराः ।
अयुध्यमानान्नो हन्मि रावणस्याह्नि नन्दनः ॥४४॥

क्व मारुतिः क्व सुग्रीव स्ताभ्यामप्यतवाक्तम् ।
क्व नु तौ रामसौमित्री अभ्यमित्रीय मानिनौ ॥४५॥
इति ब्रुवाणोदोर्दर्प्यादमर्षारुणितेक्षणः ।
रणायाह्वत सुग्रीव स्तं दशग्रीवनन्दनम् ॥४६॥
भामण्डलोपीन्द्रजितोऽवरज मेघवाहनम् ।
आयोधितुं समारेभे शरभं शरभो यथा ॥४७॥
दिग्गजा इव चत्वारश्चत्वारः सागरा इव ।
आस्फालन्तः शुशुभिरे ते त्रिलोकीभयङ्कराः ॥४८॥
गतागतै स्तदूथाना माकम्पत वसुन्धरा ।
चकम्पिरे सानुमन्तश्चुक्षोभ च महोदधिः ॥४९॥
बुबुधे चान्तरं तेषां शास्त्राकर्षणमोक्षयोः ।
अत्यन्तलघुहस्तानामविहस्तत्व शालिनाम् ॥५०॥
आयसैर्दैवतैरस्त्रैरयुध्यन्त चिराय ते ।
परं न कोपि केनापि तेषां मध्यादजीयत् ॥५१॥
अथो मुमुचतुः क्रुद्धाविन्द्रजिन्मेघवाहनौ ।
सुग्रीवभामण्डलयो र्नागपाशास्त्रमुज्झितम् ॥५२॥
नागपाशैस्तथा बद्धौ भामण्डलकपीश्वरौ ।
अनीश्वरौ निश्वसितुमप्यभूतां यथा हितौ ॥५३॥
इतश्च लब्धसंज्ञेन कुम्भकर्णेन रोषतः ।
गदया ताडितः पृष्ठं मारुतिर्मूर्च्छितोऽपतत् ॥५४॥

दोष्णा तच्चककल्पेन तं करीव करेण सः ।
समुद्दधे वलयितेनान्तःकच्छं न्यधद्वसः ॥५५॥
उचे विभीषणो रामं स्वामिन्नेतौ हि ते बले ।
बलीयसौ सारभूतावानने नयने इव ॥५६॥
बद्धौ वैदेह सुग्रीवौ रावणिभ्यां महोरगैः ।
यावल्लङ्कां न नीयेते तावत्तौ मोचयाम्यहम् ॥५७॥
हनुमान् कुम्भकर्णेन बद्धो दोष्णा महीयसः ।
लङ्कामप्राप्त एवायं मोचनीयो रघूद्वह ॥५८॥
स्वामिन्विना हि सुग्रीवभामण्डलहनूमतः ।
अवीरमिव नः सैन्यमनुजानीहि यामितत् ॥५९॥
एवं तत्र ब्रुवत्येववेगाद्गत्वाङ्गदो भटः ।
आक्षिप्य कुम्भकर्णेन युयुधे युद्धकोविदः ॥६०॥
क्रोधान्ध्यकुम्भकर्णेन प्रोत्क्षिप्तो भुजपाशतः ।
ययौ मारुतिरुत्पत्यविहङ्ग इव पञ्जरात् ॥६१॥
विभीषणो मोचयितुं भामण्डलकपीश्वरौ ।
रावणिभ्यां समं योद्धुमधावत रथस्थितः ॥६२॥
दध्यतुश्चेन्द्रजिन्मेघवाहनावेष नः पितुः ।
अनुजः स्वयमभ्येति कर्तुमस्माभिराहवम् ॥६३॥
अनेन तातकल्पेन योद्धव्यं कथमद्य हा ।
इतोऽपसरणं युक्तं नहीःपूज्यादिबिभ्यताम् ॥६४॥

पाशबद्धाविमौ चारी निश्चितं हि मरिष्यतः।
इहैव हि तदासातान्तातेनात्येति नौ यथा ॥६५॥
विचिन्त्यैवं नेशतुस्तौ धीमन्तौ रावणी रणात्।
पश्यन्विभीषणश्चास्थाद्भामण्डलकपीश्वरौ ॥६६॥
चिन्ताम्लानाननौ तत्र तस्थत् रामलक्ष्मणौ।
हिमानीच्छन्नवपुषौ सूर्य्याचन्द्रमसाविव ॥६७॥
रामभद्रस्ततः पूर्व्वप्रतिपन्नवरं सुरम्।
महालोचनमस्मार्षीत्सुपर्णामरपुङ्गवम् ॥६८॥
ज्ञात्वा चावधिनाभ्येऽत्य ददौ पद्मायसोमरः।
विद्यां सिंहनिनादाख्यां मुशलं स्यन्दनं हलम् ॥६९॥
लक्ष्मणाय ददौ विद्यां गारुडीं स्यन्दनं तथा।
गदाञ्च विद्युद्वदनां समरे रिपुनाशनीम् ॥७०॥
वारुणाऽग्नेय वायव्य प्रमुखान्यपराण्यपि।
दिव्यान्यस्त्राणि छत्रे च स ददावुभयोरपि ॥७१॥
सौमित्रेर्वाहनीभूतं गरुडं प्रेक्ष्य तत्क्षणम्।
सुग्रीवभामण्डलयोः प्रणेशुः पाशपन्नगाः ॥७२॥
जज्ञे जयजयारावो रामसैन्ये समं ततः।
रक्षोबलमिवास्तञ्च ययौ देवोऽब्जिनीपतिः ॥७३॥
प्रातर्भूयोपि सैन्यानि रघूद्वह दशास्ययोः।
सर्व्वाभिसारसाराणि रणाङ्गणमुपासरन् ॥७४॥

तेषां कृतान्तदन्ताभस्फुरदस्त्रभयङ्करः ।
अकालकल्पसंवर्त्तः प्रावर्त्तत महारणः ॥७५॥
क्रुद्धैरप्यभि रक्षोभिर्वानराणां वरूथिनी ।
मध्याह्नतापसन्तप्तैः सरसीव करैरिव ॥७६॥
भग्नप्रायाञ्च भूं प्रेक्ष्य सुग्रीवाद्या महौजसः ।
रक्षोनीकेषु विविशुर्योगिन्योऽन्यवपुष्विव ॥७७॥
विदुद्रुवू राक्षसास्तेप्याक्रान्तास्तैः कपीश्वरैः ।
नागा इव गरुत्मद्भिरद्भिरामघटा इव ॥७८॥
रक्षोभङ्गेन संक्रुद्धो दधावे रावणः स्वयम् ।
महारथप्रचारेण दारयन्निव मेदिनीम् ॥७९॥
तस्य प्रसरतो दाववह्नेरिव तरस्विनः ।
मुहूर्त्तमपि नाग्रेऽस्थात्कपिवीरेषु कश्चन ॥८०॥
तद्युद्धे चलितं रामं निषिध्य प्रश्रयादथ ।
विभीषणः क्षणादेत्य रुरोध दशकन्धरम् ॥८१॥
तं रावणोवदद्दूरे कंथिनोऽसि विभीषण ।
क्रुद्धस्य मम येनाजौ क्षिप्रः कवलवन्मुखे ॥८२॥
व्याधेनेव किरौस्थानं मयि त्वां रे प्रहिण्वता ।
रामेण मन्त्रितं साधु साध्विदं ह्यात्मरक्षणम् ॥८३॥
अद्यापि मम वात्सल्यं त्वयि वत्सास्ति गच्छतत् ।
एतौ ह्यद्य हनिष्यामि ससैन्यौ रामलक्ष्मणौ ॥८४॥

अमीषां वध्यमानानां मा संख्यापूरणः स्वभूः ।
एहि वस्थानमेवत्वं पृष्ठे हस्तोयमद्य ते ॥८५॥
विभीषणोप्युवाचैवं रामोऽन्तक इव स्वयम् ।
अचालीत्त्वां प्रतिक्रुद्धो निषिद्धश्च मया च्छलात् ॥८६॥
त्वां वोधयितुकामोऽहं युद्धव्याजादिहागतः ।
अद्यापि मुच्यतां सीता प्रसीद कुरु मद्वचः ॥८७॥
हन्त मृत्युभयान्नाहं राज्यलोभेन नापिवा ।
गतोऽस्मि रामं निर्व्वादभयात् किन्तु दशानन ॥८८॥
सीतार्प्पणेन निर्व्वादं प्रणाशय यथाह्यहम् ।
पुनरेव श्रयामि त्वां विहाय रघुपुङ्गवम् ॥८९॥
क्रुद्धोऽथ रावणः प्रोचे किमद्यामि विभीषिकाम् ।
रे विभीषण दुर्बुद्धे प्रदर्शयसि कातरः ॥९०॥
भ्रातृहत्याभयादुक्तोप्येवं नान्येन हेतुना ।
इत्युक्त्वा स्फालयामास कार्मुकं दशकन्धरः॥९१॥
भ्रातृहत्याभयादुक्तोप्येवं नान्येन हेतुना ।
इत्युक्त्वास्फालयामास धनुः सोपि विभीषणः ॥९२॥
ततः प्रवृत्ताते तौ भ्रातरौ योद्धुमुद्यतौ ।
चित्राण्यस्त्राणि कर्षन्तौ वर्षन्तौ च निरन्तरम् ॥९३॥
अथेन्द्रजितकुम्भकर्णौ राक्षसा अपरेपि हि ।
स्वामिभक्त्याऽभ्यधावन्तः कृतान्तस्येव किङ्कराः ॥९४॥

रामोऽरौत्सीत्कुम्भकर्णं लक्ष्मणो रावणिं पुनः ।
नीलस्तु सिंहजघनं दुर्मुखस्तु घटोदरम् ॥१९५॥
स्वयंभू र्दुर्मतिं शंभुं नलवीरोऽङ्गदो मयम् ।
स्कन्दः पुनश्चन्द्रनखं विघ्नं चन्द्रोदरात्मजः ॥१९६॥
केतुं भामण्डलनृपः श्रीदत्तो जम्बुमालिनम् ।
कुम्भकर्णसुतं कुम्भं पवनञ्जयनन्दनः ॥१९७॥
किष्किन्धेशश्च माल्याख्यं कुन्दो धूमाख्यराक्षसम् ।
वालिसूनुश्चन्द्ररश्मिश्च भटं सारणराक्षसम् ॥१९८॥
राक्षसानेवमन्योन्यमरौत्सुः कपयोऽपरे ।
अयुध्यन्तच तैः सार्द्धं नक्रैर्नक्रा इवार्णवे ॥१९९॥
एवं युद्धे वर्त्तमाने भीषणेभ्योऽपि भीषणे ।
लक्ष्मणायामुचत्क्रोधादस्त्रं तामसमिन्द्रजित् ॥२००॥
तदस्त्रं तपनास्त्रेण सौमित्रिः शत्रुतापनः ।
सद्यो विद्रावयामासाग्निना मदनपिण्डवत् ॥१॥
सौमित्रिर्नागपाशास्त्रं मुमोचेन्द्रजिते क्रुधा ।
तन्तुनाऽम्भसि हस्तीव स तेन द्रागबध्यत ॥२॥
आक्रम्यमाणसर्व्वाङ्गो नागास्त्रेण दशास्यसूः ।
निपपाताशनिरिव दारयन् सागराम्बराम् ॥३॥
चिक्षेप स्वरथाङ्कतं विराधो लक्ष्मणाज्ञया ।
कारागार इवानैषीन्निजे च शिविरे द्रुतम् ॥४॥

नागपाशैः कुम्भकर्णं त्वबध्नाल्लक्ष्मणाग्रजः ।
भामण्डलस्तं शिविरेऽनैषीद्रामाज्ञया ततः ॥५॥
अन्येऽपि प्रतियोद्धारो बद्धा रामस्य सैनिकैः ।
मेघवाहनमुख्यास्ते निन्यिरे शिविरे निजे ॥६॥
दृष्ट्वा दशमुखस्तन्तु क्रोधशोकसमाकुलः ।
विभीषणाय चिक्षेप शूलं मूलं जयश्रियः ॥७॥
तच्छूलमन्तरालेऽपि कदलीकाण्डलीलया ।
चकार कणशो रामाऽवरजः पत्रिभिः शितैः ॥८॥
रणे इन्द्रप्रदत्तान्ताममोघविजयाह्वयाम् ।
विजयार्थी दशग्रीवो महाशक्तिं समुद्दधे ॥९॥
धगद्धगितिज्वलन्तीं तडत्तडितिनादिनीम् ।
संहाराभ्रितडिल्लेखामिव खे भ्रमयत्सताम् ॥१०॥
अपसस्रुर्दिवि सुरा दृशं सैन्यान्यमीलयन् ।
तां विलोक्य न केऽप्यस्थुः सुस्थितं सुस्थिता अपि ॥११॥
रामः सौमित्रिमित्यूचेऽस्माकमेष विभीषणः ।
आगन्तुर्हन्यते हन्त धिग्न आश्रितघातिनः ॥१२॥
इति रामवचः श्रुत्वा सौमित्रिर्मित्रवत्सलः ।
विभीषणाग्रे गत्वा स्थादाक्षिपन् दशकन्धरम् ॥१३॥
पुरस्थं गरुडस्थं तं प्रेक्ष्योवाच दशाननः ।
न तुभ्यं शक्तिरुत्क्षिप्ता मास्मयाः परमृत्युना ॥१४॥

म्रियस्व यदि वा मार्य्यस्त्वमेवासि यतो मम ।
वराकस्त्वत्पदेहोष ममाग्रे स्याद्विभीषणः ॥१५॥
इत्युक्त्वा भ्रमयित्वा तां शक्तिं रामानुजन्मने ।
मुमोच पतदुत्पाताशनिकल्पां दशाननः ॥१६॥
तामापतन्तीं सौमित्रिः सुग्रीवो हनुमान्नलः ।
भामण्डलो विराधोऽन्येप्यस्त्रैः स्वैः स्वैरताडयन् ॥१७॥
सावज्ञाय तदस्त्रौघं व्यालद्विप इवाङ्कुशम् ।
उर्वानल इवांभोधौ लक्ष्मणोरःस्थलेऽपतत् ॥१८॥
तया भिन्नो महीपृष्ठे निपपात च लक्ष्मणः ।
उत्पपात च तत्सैन्ये विष्वग् हाहा रवो महान् ॥१९॥
क्रुद्धोथ ज्येष्ठकाकुत्स्थो जिघत्सुरिव रावणम् ।
अथ योधितुमारेभे पञ्चाननरथस्थितः ॥२०॥
क्षणाच्चकार विरथं पञ्चाननरथोद्विषम् ।
दशाननोपि वेगेनाध्यारूरो हरयान्तरम् ॥२१॥
भंक्त्वा भंक्त्वा रथानेवं पञ्चवारान् दशाननम् ।
काकुत्स्थो विरथीचक्रे जगदद्वैतपौरुषः ॥२२॥
दशास्योऽचिन्तयच्चैवं भ्रातृस्नेहादयं स्वयम् ।
मरिष्यत्येव तत्किं मे योधितेनाऽमुनाऽधुना ॥२३॥
दशग्रीवो विमृश्यैवं ययौ लङ्कापुरीं द्रुतम् ।
अस्तं जगाम च रवी रामशोकादिवातुरः ॥२४॥

भग्नेऽथ रावणे रामो निवृत्तोऽयाय लक्ष्मणम्।
तं च दृष्ट्वा निपतितं निपात भुवि मूर्च्छितः ॥२५॥
सुग्रीवादिभिरासिक्तो रामश्चन्दनवारिणा।
लब्धसंज्ञो निषद्योपसौमित्रीत्यगदद्रुदन् ॥२६॥
तव किं बाधते वत्स ब्रूहि तूष्णीं स्थितोसि किम्।
संज्ञयापि समाख्याहि प्रीणयाग्रजमात्मनः ॥२७॥
एते त्वन्मुखमीक्षन्ते सुग्रीवद्या स्तवानुगाः।
नानुगृह्णासि किं वाचा दृशा वा प्रियदर्शन ॥२८॥
जीवन् रणाद्रावणोगादिति लज्जावशाद्रवम्।
न भाषसे तद्भाषस्व पूरयिष्ये तवेप्सितम् ॥२९॥
रे रे रावण दुष्टात्मन् तिष्ठ तिष्ठ क्वयास्यसि।
एष प्रस्थापयामि त्वां नचिराय महारथे ॥३०॥
इत्युक्त्वा धनुरास्फाल्योदस्थाद्यावद्रघूद्वहः।
तावत्कपीश्वरेणैव मूचे विनयपूर्व्वकम् ॥३१॥
स्वामिन्निशेयमगमल्लङ्कान्च स निशाचरः।
शक्तिप्रहारविधुरः स्वामीनिश्चेष्ट वर्त्तते ॥३२॥
धैर्य्यमाधेहि यानीहि हतमेव दशाननम्।
प्रतिजागरणोपायं सौमित्रेरुपकल्पय ॥३३॥
भूयो रामो जगादैवं हृता भार्य्या हतोऽनुजः।
तिष्ठत्यऽद्यापि रामोऽयं शतधा न विदीर्य्यते ॥३४॥

सखे सुग्रीव हनुमन् भामरुडल नलाङ्गद ।
विराधाद्याश्च सर्व्वेपि यात स्वौकसांसि ते ॥३५॥
सीताऽप्यहारात्सौमित्रि वधादप्यधिकं शुचे ।
सखे विभीषणाभूस्त्वं यत्कृतार्थीकृतोऽसि न ।।३६॥
प्रातः पश्य परं बन्धो निजबान्धववर्त्मना ।
नीयमानं सबन्धुं त्वां बन्धुरूपेणशत्रुणा ॥३७॥
प्रातःकृतार्थीकृत्य त्वामनुयास्यामि लक्ष्मणम् ।
लक्ष्मणं हि विना किं मे सीताया जीवितेन च ॥३८॥
विभीषणो बभाषेऽथ किमधैर्य्यमिदं प्रभो ।
शक्त्या हतोऽपि ह्यनया पुमान् जीवति यामिनीम्॥३९
मन्त्रतन्त्रादिना घातप्रीतकाराय सर्व्वथा ।
प्रयत्यतां प्रभो यावन्न विभाति विभावरी ॥४०॥
आमेति राघवेणोक्तेग्रीवाद्यास्तु विद्यया ।
सप्तवप्रांश्चतुर्द्वारान् राघवोपरि ते व्यधुः ॥१४॥
प्राच्यां द्वारेषु तत्रास्थुः सुग्रीवः पावनञ्जयिः ।
तारः कुन्दोदधिमुखो गवाक्षो गवयः क्रमात् ॥४२॥
उदीच्यामङ्गदः कूर्मो गौर्महेन्द्रो विहङ्गमः ।
सुषेणश्चन्द्ररश्मिश्च द्वारेष्वस्थुः क्रमादमी ॥४३॥
प्रतीच्यां नील समर धीलदुर्द्धर मन्मथाः ।
जयश्च विजयश्चैव सम्भवश्चावतस्थिरे ॥४४॥

भामण्डलो विराधश्च गजो भुजगजिन्नलः ।
मन्दोविभीषणश्चास्थु र्दक्षिणस्यां क्रमादमी ॥४५॥
मध्ये कृत्वेति काकुत्स्थौ सुग्रीवाद्या महाभुजः ।
प्रजागरपरास्तस्थु रात्मारामा इवोद्यताः ॥४६॥
सीतायाः कश्चिदाचख्यौ यच्छक्त्या लक्ष्मणो हतः ।
प्रातर्विपत्स्यते रामभद्रोऽपि भ्रातृसौहृदात् ॥४७॥
वज्रनिर्घोषवद्घोरं तच्छ्रुत्वा जनकात्मजा ।
पपात मूर्च्छया पृथ्व्यां लतेव पवनाहृता ॥४८॥
विद्याधरीभिरम्भोभिः संसिक्ता लब्धचेतना ।
उत्थाय विललापैवं जानकी करुणस्वरम् ॥४९॥
हा वत्स लक्ष्मण क्वागा स्त्यक्त्वैकाकिनमग्रजम् ।
मुहूर्त्तमपि हि स्थातुं विना त्वामेष न क्षमः ॥५०॥
धिगहं मन्दभाग्यास्मि यतो मम कृतेऽधुना ।
स्वामिदेवरयोर्दैव तुल्ययोरीदृगागतम् ॥५१॥
प्रसीद मत्प्रवेशाय द्विधाभव वसुन्धरे ।
प्राणनिर्य्याणहेतो स्त्वं भव वा हृदय द्विधा ॥५२॥
एवं रुदन्तीं करुणं सीतां कापि कृपावती ।
अवलोक्याऽवलोकिन्या विद्याधर्य्यब्रवीदिति ॥५३॥
भविष्यति शुभाङ्ग स्ते प्रभाते देवि देवरः ।
समञ्च रामभद्रेण त्वामेत्यानन्दयिष्यति ॥५४॥

स्वस्थावस्था तद्गिरास्यात्काकुस्थगृहिणी तदा।
सूर्य्योदयं चिन्तयन्ती चक्रवाकीव जाग्रती ॥५५॥
सौमित्रिर्मारितोद्येति चणं विजहर्ष रावणः।
चणं स्मृत्वा भ्रातृपुत्रमित्रबन्धुं रुरोद च॥५६॥
हा वत्स कुम्भकर्ण त्वं ममात्मेवापरः परः।
द्वितीयाविव मे बाहू इन्द्रजिन्मेघवाहनौ ॥५७॥
हा वत्सा जम्बुमालाद्या मम रूपान्तरोपमाः।
अप्राप्तपूर्व्वं प्राप्तास्थ कथं बन्धं गजा इव ॥५८॥
स्मारं स्मारं स्वबन्धूनामित्थं बन्धादि नूतनम्।
भूयो भूयो दशग्रीवो मुमूर्च्छ च रुरोद च ॥५९॥
इतश्च पद्मसैन्ये प्राक् प्राकारद्वाररचकम्।
भामण्डलमुपेत्यैवं कोऽपि विद्याधरोऽवदत् ॥६०॥
पद्मपादान्दर्शय मे तदाप्तो ननु यद्यसि।
अलं लक्ष्मणजीवातुमाख्यास्यामि हितोस्मि वः ॥६१॥
विधृत्य पाणिना दोष्णि नीतो भामण्डलेन सः।
पद्मस्य पादपद्मान्ते प्रणम्यैवं व्यजिज्ञपत् ॥६२॥
सङ्गीताङ्गपुरनाथस्य शशिमण्डलभूपते.।
तनयः प्रतिचन्द्रोऽहं सुप्रभाकुक्षिसंभवः ॥६३॥
क्रीडार्थं सकलत्रोऽहं चलितोऽन्येद्युरम्बरे।
दृष्टः सहस्रविजयनाम्ना विद्याधरेण च ॥६४॥

तेन मैथुनिकाद्वैराद्योधितोऽहं चिरन्तदा ।
पातित श्चण्डरवया शक्त्या चाहत्य भूतले ॥६५॥
साकेतपुर्य्यां माहेन्द्रोदयोद्याने लुठन्भुवि ।
दृष्टश्च भरतेनाहं त्वद्भ्रात्राऽतिकृपालुना ॥६६॥
सद्यो गन्धाम्बुभि स्तेन सिक्तोऽहं पृथिवीभुजा ।
शक्तश्च निरगाच्छक्ति र्दस्युः परगृहादिव ॥६७॥
सद्यो रूढप्रहारेण मया विस्मितचेतसा ।
पृष्टो गन्धाम्बुमाहात्म्य मित्यशंसत्तवानुजः ॥६८॥
सार्थवाहो विन्ध्यनामाऽभ्यागाद्गजपुरादिह ।
एक स्तन्महिषो मार्गेऽतिभारत्रुटितोऽपतत् ॥६९॥
तन्मूर्ध्नि पादं विन्यस्य सञ्चचार पुरोजनः ।
उपद्रवेण महता विपन्नः सोऽथ सैरिभः ॥७०॥
सोऽकामनिर्ज्जरायोगा च्छ्वेतंकरपुरेश्वरः ।
सुरो वायुकुमारोऽभून्नाम्ना पवनपुत्रकः ॥७१॥
ज्ञात्वा च रधिना पूर्व्वं स्वत्यं प्रकुपितोथ सः ।
पुरे जनपदे चास्मिन् व्याधीन्नानाविधान् व्यधात्॥७२॥
देशे गृहे च न व्याधिरभूत्तन्मातुलस्य तु ।
द्रोणमेघनरेन्द्रस्य मन्मह्रीवर्त्तिनोपि हि ॥७३॥
अव्याधिकारणं पृष्टो मया द्रोणघनोऽवदत् ।
भार्य्याप्रियङ्करा मेऽभूत्पुरातिव्याधिबाधिता ॥७४॥

जाते गर्भे तत्प्रभावाद्व्याधिना मुच्यताथ सा ।
सुषुवेच क्रमात्पुत्रीं विशल्यामभिधानतः ॥७५॥
तद्देश इव मद्देशेप्युद्भूते व्याध्युपद्रवे ।
विशल्याः स्नानतोयेन सिक्तो लोकोऽभवद्विरुक् ॥७६॥
पृष्टो मया सत्यभूतशरणो मुनिरन्यदा ।
वदतिस्म विशल्यायाः प्राग्जन्मतपसः फलम् ॥७७॥
व्रणसंरोहणं शल्यापहारो व्याधिसङ्क्षयः ।
नृणां स्नानाम्भसाप्यस्या भावीभर्त्ता च लक्ष्मणः॥७८॥
तया मुनिगिरा सम्यग् ज्ञानादनुभवादपि ।
विशाल्यस्नानपयसः प्रभावो निश्चितो मया ॥७९॥
इत्युदित्वा द्रोणमेघो विशल्यास्नपनोदकम् ।
ममापि व्याप्र्ययत्तेनाऽभवद् भूमिर्ममाप्यरुक् ॥८०॥
तस्या स्नानांभसाऽनेन मया सिक्त स्त्वमप्यहो ।
निःशक्तिशल्यसंरूढ़व्रणश्च त्वमभूः क्षणात् ८१॥
भरतस्य ममाप्येव मुत्पन्नः प्रत्ययः प्रभोः ।
आप्रत्यूषादानयत विशल्यास्नानवारि तत् ॥८२॥
त्वर्य्यतां त्वर्य्यतां तस्मात् प्रत्यूषे किं करिष्यथ ।
पर्य्यस्ते शकटे हन्त किं कुर्वीत गणाधिपः ॥८३॥
भामण्डलं हनूमन्तमङ्गदञ्च रघूद्वहः ।
आदिशत् प्रतिभरतं विशल्यास्नानवारिणे ॥८४॥

प्रययु स्ते विमानेनाऽयोध्यां पवनरंहसा ।
प्रासादाङ्के च ददृशुः शयानं भरतं नृपम् ॥८५॥
भरतस्य प्रबोधाय ते गीतञ्चक्रुरम्बरे ।
राजकार्य्येपि राजान उत्थाप्यन्ते ह्युपायतः ॥८६॥
विबुध्य भरतेनापि दृष्टः पृष्टः पुरो नमन् ।
उचे भामण्डलः कार्य्यं नाम्नस्याम्नेः प्ररोचना ॥८७॥
सेत्स्यत्येतन्मया तत्रेयुषति भरत स्ततः ।
तद्विमानाधिरूढोगात्पुरं कौतुकमङ्गलम् ॥८७॥
भरतेन द्रोणघनो विशल्यामथ याचितः ।
महोद्वाह्य स्त्रीसहस्र सहितां तामदत्त च ॥७८॥
भामण्डलोप्ययोध्यायां मुक्त्वा भरतमुत्सुकः ।
आययौ सपरीवारो विशल्यासंयुत स्ततः ॥९०॥
ज्वलद्दीपविमानस्थो भीतेः सूर्य्योदयभ्रमात् ।
क्षणं दृष्टो निजैः सोऽधाद्विशल्यामुपलक्ष्मणम् ॥९१॥
तया च पाणिना स्पृष्टाल्लक्ष्मणात्तत्क्षणादपि ।
निर्जगाम महाशक्ति र्यष्टिनेव महोरगो ॥९२॥
समुत्पतन्ती सा शक्तिः समुत्पत्य हनूमता ।
प्रसभं जगृहे श्येनविहगेनेव वर्त्तिका ॥९३॥
साप्यूचे देवतारूपा न मे दोषोस्ति कश्चन ।
प्रदत्ता धरणेनाऽस्मै प्रज्ञप्तिभगिनीह्यहम् ॥९४॥

विशल्या प्राग्भवतपस्तेजः सोढुमनीश्वरी।
एषा यास्यामि मां मुञ्च प्रेष्यभावादनागसम् ॥९५॥
इत्युक्तो मुक्तवान् शक्तिं मारुति स्तां महाभुजः।
मुक्तमात्रा च सा शक्तिर्लज्जितेव तिरोदधे ॥९६॥
विशल्यापि हि सौमित्रिं भूयः पस्पर्श पाणिना।
विलिलेप च गोशीर्ष चन्दनेन शनैः शनैः ॥९७॥
रूढव्रणोऽथ सौमित्रः द्राक् प्रसुप्त इवोत्थितः।
सस्वजे रामभद्रेण वर्षताऽश्रुजलं मुदा ॥९७॥
सर्वं विशल्या वृत्तान्तं राम स्तस्मै शशंस च।
तत्स्नानपयसा चाशु स्वान्तरांश्चाभ्यषेचयत् ॥९९॥
कन्यासहस्रसहितां विशल्यां रामशासनात्।
तदानीमेव सौमित्रि रूपयेमे यथाविधि ॥३००॥
सौमित्रिजीवनोद्दाहोत्साहजन्मा महोत्सवः।
विद्याधरनृपैश्चक्रे जगदाश्चर्य्यकारणम् ॥१॥
सौमित्रि र्जीवित इति चरै र्नक्तंचराधिपः।
विज्ञाय मन्त्रयाञ्चक्रे समं मन्त्रवरैरिति ॥२॥
अभवन्मम भावोयं सौमित्रिः शक्तिताड़ितः।
प्रातर्मरिष्यति ततो रामोपि स्नेहपीडितः ॥३॥
यःस्यन्ति कपयो नंष्ट्वा तेच मद्बन्धु सूनवः।
कुम्भकर्णेन्द्रजिन्मुख्याः स्वयमेष्यन्ति मामिह ॥४॥

अधुना दैववैगुण्याल्लक्ष्मणः सोऽपि जीवितः ।
मया मोचयितव्यास्ते कुम्भकर्णादयः कथम् ॥५॥
स गत्वा द्वाःस्थविज्ञप्तः सुग्रीवादि समाहृतम् ।
पद्मनाभं नमस्कृत्य व्याजहारेति धीरगीः ॥६॥
दशास्यस्त्वां वदत्येवं बन्धुवर्गं विमुञ्च मे ।
जानकीमनुमन्यस्व राज्यार्द्धञ्च गृहाण मे ॥७॥
त्रीणि कन्यासहस्राणि तुभ्यं दास्यामि तेनच ।
सन्तुष्य नोचेत्ते सर्वं नश्येतन्नच जीवितम् ॥८॥
बभाषे पद्मनाभोथ नार्थो मे राज्यसम्पदा ।
न चान्यप्रमदावर्गं भोगेन महतापि हि ॥९॥
प्रेषयिष्यत्यर्च्चयित्वा जानकीं रावणो यदि ।
तदा मोक्ष्यामि तद्बन्धुतनयानन्यथा नहि ॥१०॥
सामन्तः पुनरप्यूचे राम नैतत्तवोचितम् ।
स्त्रीमात्रकस्यास्य कृते त्वं चेमं प्राणसंशये ॥११॥
सौमित्रिरेकवारं चेज्जीवितो रावणाहतः ।
जीविष्यति कथं सोऽथ त्वञ्चामी च प्लवङ्गमाः ॥१२॥
एकोपि रावणो हन्तुमिदं विश्वमपीश्वरः ।
सर्व्वथा तद्वचो मान्यमुदर्कं चाक्ष्य स्वयम् ॥१३॥
लक्ष्मणस्तद्गिरा क्रुद्धोऽभ्यधाद्रे दूत पांशनः ।
स्वशक्तिं परशक्तिं वा वेत्त्यद्यापि न रावणः ॥१४॥

हतबन्धुपरीवारो भार्य्याशेषीकृतोऽपि सन् ।
पौरुषं नाटयत्येष एषा का तस्य धृष्टता ॥१५॥
शेषैकमूलमुन्मूलच्छिन्नाः शाखा वटस्तरुः ।
यथा सोपि तथैवाङ्गः कियत्स्थास्यति रावणः ॥१६॥
तद्गच्छ संवाहय तं युद्धाय दशकन्धरम् ।
कृतान्त इव सज्जो मे तं व्यापादयितुं भुजः ॥१७॥
लक्ष्मणेनैवमाक्षिप्तो विभाषितु मना सतु ।
उत्थाय धृत्वा ग्रीवायां वानरै र्निरवास्यत ॥१८॥
रावणाय स गत्वाऽख्यत् सर्व्वं राघववाचिकम् ।
सचिवान् रावणोप्यूचे किं कार्य्यं ब्रूत सम्प्रति ॥१९॥
अब्रुवन्मन्त्रिणोप्येवं सीतार्प्पणमहोचितम् ।
व्यतिरेकफलं दृष्टं पश्यान्वयफलं प्रभो ॥२०॥
अन्वयव्यतिरेकाभ्यां सर्वं कार्य्यं परीक्ष्यते ।
एकेन व्यतिरेकेण किं स्थितोसि दशानन ॥२१॥
शाम्यन्ते बहवोद्यापि बान्धवः सूनवस्तते ।
सीतार्प्पणाद्विमुक्तै स्तै सममेधस्व सम्पदा ॥२२॥
तेषां सीतार्प्पणगिरा मर्मणीव हतोधिकम् ।
अन्तर्दूनो दशमुखश्चिरं स्वयमचिन्त्यत् ॥२३॥
विद्याया बहुरूपाया हृदि निर्णीय साधनम् ।
शान्तिचैत्यं ययौ शान्तकषायीभूय रावणः ॥२४॥

स्नानं श्रीशान्तिनाथस्य पयःकुम्भैर्दशाननः ।
स्वयमिन्द्र इवा कार्षीद् भक्त्या विकशितानन: ।।२५॥
गोशीर्षचन्दनेनाङ्गरागपुष्पैश्च दैवतैः ।
पूजां विधाय श्रीशान्ते स्तुति मेवं विनिर्ममे ।।२६॥
देवाधिदेवाय जगन्त्रायिने परमात्मने ।
श्रीमते शान्तिनाथाय षोडशायार्हते नमः ॥२७॥
श्रीशान्तिनाथ भगवन् भवाम्भोनिधितारण ।
सर्वार्थसिद्धमन्त्राय त्वन्नाम्नेपि नमो नमः ॥२८॥
ये तवाऽष्टविधां पूजां कुर्व्वन्ति परमेश्वर ।
अष्टावपि सिद्धय स्तेषां करस्था अणिमादयः ॥२९॥
धन्यान्यक्षीणि यानि त्वां पश्यन्ति प्रतिवासरम् ।
तेभ्योपि धन्यं हृदयं तद्दृष्टो येन धार्य्यसे ॥३०॥
देवत्वत्पादसंस्पर्शादपि स्यान्निर्मलो जनः ।
अयोपि हेमीभवति स्पर्शवेधिरसान्न किम् ॥३१॥
त्वत्पादाब्ज प्रणामेन नित्यभूलुठनैः प्रभो ।
शृङ्गारतिलकीभूयान्मम भाले किणावलिः ।।३२॥
पदार्थैः पुष्पगन्धाद्यै रुपहारीकृतै स्तव ।
प्रभो भवतु मद्राज्यसम्पद्वल्लेः सदा फलम् ॥३३॥
भूयो भूयः प्रार्थये त्वामिदमेव जगद्विभोः ।
भगवन् भूयसी भूया त्त्वयि भक्तिर्भवे भवे ।।३४॥

स्तुत्वेति शान्तिं लङ्केशः पुरो रत्नशिलास्थितः ।
तां साधयितुमारेभे विद्यामक्षस्रजं दधत् ॥३५॥
मन्त्रिणोप्येवमूचुस्तं जानकीमोचणं विना ।
नमोक्षं कुम्भकर्णादिवीराणां प्रत्युताशिवम् ॥३६॥
इयत्यपि गते स्वामिन् रक्ष रक्ष निजं कुलम् ।
उपायस्तात्र नान्योस्ति रामानुनयनं विना ॥३७॥
रावणस्तानवज्ञाय दूतं सामन्तमादिशत् ।
सामदानदण्डपूर्वमनुशिष्योपराघवम् ॥३८॥
अथ मन्दोदरीद्वास्थं यमदण्डमदोऽदत् ।
जिनधर्म्मरतोष्टाह्नान्यस्तु सर्व्वोपि पूर्जनः ॥३९॥
न करिष्यति यस्त्वेवं तस्य दण्डो वधात्मकः ।
भविष्यतीति लङ्कायामाघोषय हतानकः ॥४०॥
तदादेशेन स द्वास्थः पुर्य्यामाघोषयत्तथा ।
तच्च चारनरैरेत्य सुग्रीवाय न्यवेदयत ॥४१॥
सुग्रीवोप्यब्रवीदेवं नयावद्बहुरूपिणीम् ।
विद्यां साधयति स्वामिंस्तावत्साध्यो दशाननः ॥४२॥
स्मित्वा पद्मोप्युवाचैवं शान्तिध्यानपरायणम् ।
कथं दशास्यं गृह्णामि नह्यहं स इव च्छली ॥४३॥
इति रामवचः श्रुत्वा छन्नमेवाङ्गदादयः ।
विद्याभ्रंशाय लङ्केशं शान्तिचैत्यस्थितं ययुः ॥४४॥

विदधुर्विविधांस्तत्रोपसर्गांस्ते निरर्गलाः।
मनागपि न तु ध्यानाद्‌चालीद्दशकन्धरः ॥४५॥
अथाङ्गदो जगादैवं रामाद्भीतेन किं त्वया।
इदं पाखण्डमारब्धं मत्प्राप्तशरणेन भोः ॥४६॥
त्वया परोक्षे मद्भर्त्तुर्हृता भार्य्या महासती।
मन्दोदरीन्तु ते पत्नीं पश्यतोपि हराम्यहम् ॥४७॥
इत्युदीर्य्यामन्दरोषोऽकर्षन्मन्दोदरीं कचैः।
सोऽनथामिव रुदन्तीं कुररीं करुणस्वरम् ॥४८॥
रावणो ध्यानसंलीनः प्रेक्षाञ्चक्रेपि तं नहि।
प्रादुरासीच्च सा विद्या द्योतयन्ती नभस्तलम् ॥४९॥
ऊचे च तव सिद्धास्मि ब्रूहि किङ्करवाणि भोः।
करोमि ते वशे विश्वं किमन्यावौ हि राघवौ ॥५०॥
रावणं प्रत्युवाचैवं सर्व्वं निष्पद्यते त्वया।
स्मृता समापतेः काले स्वस्थानं गच्छ सम्प्रति ॥५१॥
तद्विसृष्टा तिरोधत्त सा विद्या तेपि वानराः।
स्कन्धावारं निजं जग्मु रुत्प्लुत्य पवमानवत् ॥५२॥
मन्दोदर्य्यंगदेदान्तं शुश्राव च दशाननः।
चक्रे चसोप्लुहुङ्कारगर्भं ज्झङ्कारमुच्चकैः ॥५३॥
स्नात्वा भुक्त्वा च लङ्केशोऽगाद्देवरमणे वने।
उचे सीताञ्च सुचिरं मया तेऽनुनयः कृतः ॥५४॥

उद्भित्वा नियममङ्गभीरु त्वमधुना पुनः ।
सेविष्येऽहं प्रसह्य त्वां हत्वा त्वत्पतिदेवरौ ॥५५॥
तद्वाचा विषसध्रीच्या मूर्च्छिता जनकात्मजा ।
निपपात दृशाश्वस्य तस्यामाशेव तत्क्षणम् ॥५६॥
कथञ्चिल्लब्धसंज्ञा सा जग्राहैवमभिग्रहम् ।
मृत्युश्चेद्रामसौमित्र्यो स्तदा स्त्वनशनं मम ॥५७॥
तच्छ्रुत्वा रावणो दध्यौ रामे स्नेहो निसर्गजः ।
अस्या स्तदस्यां मे रागः स्थले कमलरोपणम् ॥५८॥
कृतं युक्तं मया तन्नावज्ञातो यद्विभीषणः ।
नामात्या मानिताः स्वञ्च कुलमेतत्कलङ्कितम् ॥५९॥
मुञ्चाम्येतामद्य चेत् न विवेकपदे पतेत् ।
रामाक्रान्तेन मुक्तेय मिति स्यात्मत्युताऽयशः ॥६०॥
बद्ध्वेह रामसौमित्री समानेष्ये तत स्तयोः ।
अर्पयिष्याम्य मूं धर्म्मं यशश्यञ्च हि तद्भवेत् ॥६१॥
इति निश्चित्य लङ्केश स्तामतीत्य विभावरीम् ।
युद्धे चचाल शकुनै वीर्य्यमाणोऽपि दुर्मदः ॥६२॥
भूयः प्रवर्त्तते युद्धं रामरावणसैन्ययोः ।
अत्युद्भटभटभुजा स्फोटत्रासित दिग्गजम् ॥६३॥
विधूयाऽशेषरक्षांसि तूलानीव महाबलः ।
लक्ष्मणः ताडयामास विशिखैर्दशकन्धरम् ॥६४॥

सौमित्रे विक्रमं दृष्ट्वा साशङ्को दशकन्धरः ।
सस्मार बहुरूपां तां विद्यां विश्वभयङ्कराम् ॥६५॥
स्मृतिमात्रोपस्थितायां विद्यायां तत्र रावणः ।
विचक्रे भैरवान्याशु स्वानि रूपाण्यनेकशः ॥६६॥
भूमौ नभसि पृष्ठेऽग्रे पार्श्वयोरपि लक्ष्मणः ।
अपश्यद्रावणानेव विविधायुधवर्षिणः ॥६७॥
तावद्रूप इवैकोपि तार्क्ष्यस्थो लक्ष्मणोऽपि तान् ।
जघान् रावणान् वाणै श्छिन्तितीपनतैः शितैः॥६८॥
नारायणस्य तैर्वाणै र्विधुरो दशकन्धरः ।
सस्मार जाज्वलच्चक्र मर्द्धचक्रित्वलाञ्छने ॥६९॥
रोषारुणाक्ष स्तच्चक्रं भ्रमयित्वा नभःस्तले ।
मुमोच रावणः शस्त्र मन्त्यं रामानुजन्मने ॥७०॥
कृत्वा प्रदक्षिणान्तत्तु सौमित्रे र्दक्षिणे करे ।
अवतस्थे रविरिवोदयपर्वतमूर्द्धनि ॥७१॥
विषण्णो रावणो दध्यौ सत्यं जातं मुनेर्वचः ।
तेषां विभीषणादीनां सत्यस्त्वालोचनिर्णयः ॥७२॥
क्रुद्ध स्तं रावणोऽवोचत् किं मे त्वच्चक्रमे वरे ।
द्विषं सचक्रमप्येनन्द्रागहनिष्यामि मुष्टिना ।
इति दर्पाद्विब्रुवतो रक्षोनाथस्य लक्ष्मणः ।
शिरस्तेनैव चक्रेण कुष्माण्डवदपाटयत् ॥७४॥

तदा च ज्येष्ठकृष्णैकादश्यामह्नि च पश्चिमे ।
यामे हतो दशग्रीव स्तुर्य्यन्नरकं ययौ ॥७५॥
सपदि जयजयेति व्याजहारद्भिर्द्युसद्भि-
र्व्यरचि कुसुमवृष्टिर्लक्ष्मणस्योपरिष्टात् ।
समजनि च कपीनां ताण्डवं चण्डहर्षो
त्थितकिलकिलनादापूर्णरोदोनिकुञ्जम् ॥७६॥
इत्याचार्य्य श्रीहेमचन्द्रविरचिते रावणवधो
नाम सप्तमः सर्गः ॥७॥

अथो विभीषणस्तत्र कान्दिशीकान्निशाचरान् ।
एवमाश्वासयामास ज्ञातिस्नेहवशीकृतः ॥१॥
पद्मनारायणावेतावष्टमौ बलशार्ङ्गिणौ ।
शरण्यौ शरणायाशु श्रयध्वमविशङ्किताः ॥२॥
ते सर्व्वे शिश्रियुः पद्मसौमित्री तौ च चक्रतुः ;
तेषां प्रसादं वीराह्नि प्रजासु समदृष्टयः ॥३॥
हतञ्च भ्रातरं दृष्टा शोकावेशाद्विभीषणः ।
मर्त्तुकामः स्वयमपि च कर्षं छुरिकां निजाम् ॥४॥
तथा स्वकुक्षिमाधानं दधे रामो विभीषणम् ।
हा भ्रातर्भ्रातरित्युच्चैः क्रन्दन्तं करुणास्वरम् ॥५॥

मन्दोदर्य्यादिभिः सार्द्धं रुदन्तमुपरावणम् ।
इति तं बोधयामास पद्मनाभः सलक्ष्मणः ॥६॥
ईदृक्पराक्रमः सोऽयं नहि शोच्यो दशाननः ।
यस्याऽशशङ्किरे दूरे समरेष्वमरा अपि ॥७॥
वीरवृत्त्यानया मृत्युं गतोऽसौ कीर्त्तिभाजनम् ।
तदस्योत्तरकार्य्याणि कुरुध्वं रुदितैरलम् ॥८॥
इत्युदित्वा पद्मनाभो महात्मा प्राप्तबन्धनान् ।
कुम्भकर्णेन्द्रजिन्मेघवाहनादीनमोचयत् ॥९॥
विभीषणः कुम्भकर्णः शक्रजिन्मेघवाहनः ।
मन्दोदर्य्यपि सम्भूय परेऽपि पतदश्रवः ॥१०॥
दशग्रीवाङ्गसंस्कारं सद्योगोशीर्षचन्दनैः ।
कर्पूरागुरुसम्मिश्रैर्विदधुर्ज्ज्वलितानलैः ॥११॥
पद्मः पद्मसरस्येत्य तेच स्नात्वा जलाञ्जलिम् ।
सममस्तुजलैः कोष्णैः प्रददुर्दशमौलये ॥१२॥
गिराऽभिरामया रामः किरन्निव सुधारसम् ।
सलक्ष्मणः कुम्भकर्णप्रभृतीनित्यभाषत ॥१३॥
पूर्ववत्स्वस्वराज्यानि कुरुध्व मधुनापि हि ।
युष्मल्लक्ष्मीर्न नः कृत्यं हे वीराः क्षेममस्तुवः ॥१४॥
इत्युक्ताः पद्मनाभेन युगपच्छोकविस्मयौ ।
बिभ्राणाः कुम्भकर्णाद्या जगदुर्गद्गदाक्षरम् ॥१५॥

नार्थो राज्येन नः कश्चित्साम्राज्येनापि महाभुज ।
ग्रहीष्यामः परिव्रज्यां मोक्षसाम्राज्यसाधनीम् ॥१६॥
अत्रान्तरे च कुसुमायुधोद्याने महामुनिः ।
अप्रमेयबलोनाम चतुर्ज्ञानी समाययौ ॥१७॥
तत्रैव निशि तस्याभूत् केवलज्ञानमुज्ज्वलम् ।
चक्रुश्च केवलज्ञानमहिमानन्दिवौकसः ॥१८॥
प्रातश्च रामसौमित्री कुम्भकर्णादयश्च ते ।
उपेत्य तमवन्दन्त ततो धर्मञ्च शुश्रुवुः ॥१९॥
पप्रच्छतु र्देशनान्ते शक्रजिन्मेघवाहनौ ।
परं वैराग्यमापन्नौ पुरातनभवान्निजान् ॥२०॥
मुनिः सोऽथाब्रवीत्पुर्य्यां कौशांब्यामिह भारते ।
निःस्वौ बन्धू युवां जातौ नाम्ना प्रथमपश्चिमौ ॥२१॥
तावन्यदाभवे दत्ताद्धर्म्मं श्रुत्वा महामुनेः ।
व्रतं जगृहतुः शान्तकषायौ च विजह्रतुः ॥२२॥
अन्येद्युस्तौ तु कौशाम्ब्याङ्गतौ ददृशतुर्नृपम् ।
पत्नेरन्दुमुख्या क्रीडन्तं नन्दिघोषं मधूत्सवे ॥२३॥
तं दृष्ट्वा पश्चिमोऽकार्षीन्निदानं तपसाऽमुना ।
ईदृक् क्रीडापरः पुत्रो भूयासमनयोरहम् ॥२४॥
साधुभिर्वार्य्यमाणोपि निदानान्नन्यवर्त्तत ।
हत्वा च पश्चिमो जज्ञे तयोस्तु रतिवर्द्धनः ॥२५॥

क्रमेणोद्यौवनः प्राप्त राज्यः सरतिवर्द्धनः।
पितेवारेमे विविधं रमणीभिः समावृतः ॥२६॥
कृत्वा प्रथमसाधुस्तु निर्निदानतपोवशात्।
बभूव पञ्चमे कल्पे त्रिदशः परमर्द्धिकः ॥२७॥
सोऽवधेर्भ्रातरं ज्ञात्वा तत्रोत्पन्नं महीपतिम्।
तं बोधयितुमभ्यागान्मुनिरूपधरः सुरः ॥२८॥
रतिवर्द्धनराजेनाऽर्पिते पट्टे निषद्य सः।
शशंस प्राग्भवन्तस्य स्वस्य च भ्रातृसौहृदात् ॥२९॥
सञ्जाति जातिस्मरणो विरक्तो रतिवर्द्धनः।
प्राव्राजीदथ कृत्वा च ब्रह्मलोके सुरोभऽवत् ॥३०॥
च्युत्वा ततो विदेहेषु विबुद्धनगरे युवाम्।
अभूतां भ्रातरौ भूपौ प्रव्रज्याऽच्युतमीयतुः ॥३१॥
च्युताऽच्युताद्दशास्यस्य प्रतिविष्णोस्तुसम्प्रति।
पुत्रौ युवामजायेथामिन्द्रजिन्मेघवाहनौ ॥३२॥
रतिवर्द्धनमाता तु भवं भ्रान्त्वेन्दुमुख्यपि।
मन्दोदरी समभवज्जननी युवयोरियम् ॥३३॥
कुम्भकर्णेन्द्रजिन्मेघवाहनाद्या निशाम्य तत्।
मन्दोदर्य्यादयश्चापि तदैवाददिरे व्रतम् ॥३४॥
मुनिं नत्वा तु तं रामः ससौमित्रिकपीश्वरः।
विभीषणेन प्रह्वेन वेत्रिणेनाग्रगामिना ॥३५॥

दृश्यमानपथो विद्याधरीभिः कृतमङ्गलः ।
ऋद्ध्या महत्येन्द्र इव लङ्कायां प्रविशत्पुरि ॥३६॥
गिरेः पुष्पगिरे मूर्द्ध्न्युद्याने तत्र मैथिलीम् ।
गत्वा ददर्श काकुत्स्थो यथा ख्यातां हनूमता ॥३७॥
तामुत्क्षिप्य निजोत्सङ्गे द्वितीयमिव जीवितम् ।
तदैव जीवितं मन्यो धारयामास राघवः ॥३८॥
इयं महासती सीता जयत्विति मरुत्पथे ।
तदानीं जुहृषुः सिद्धगन्धर्व्वाद्याः प्रमोदिनः ॥३९॥
सीतादेव्या नमश्चक्रे पादौ प्रक्षालयन्निव ।
निरन्तरैरश्रुजलैः सुमित्रानन्दनो मुदा ॥४०॥
चिरञ्जीव चिरं नन्द चिरञ्जय मदाशिषा ।
इति ब्रुवाणा वैदेही जघ्रौ शिरसि लक्ष्मणम् ॥४१॥
भामण्डलो नमश्चक्रे सीतां सीतापि तं मुदा ।
आशिष्यानन्दयामास मुनिवाक्यसमानया ॥४२॥
स्वनामाख्यानपूर्व्वञ्च कपिराजो विभीषणः ।
हनुमानङ्गदोऽन्येपि प्रणेमुर्जनकात्मजाम् ॥४३॥
पार्श्वस्थेन शशाङ्केन चिरात् कुमुदिनीव सा ।
रामेण शुशुभे सीता विकाशं समुपेयुषी ॥४४॥
ससीतोऽध्याभवनाल्लङ्कारं राघवो गजम् ।
जगाम रावणावासं सुग्रीवाद्यैः समावृतः ॥४५॥

तदन्तश्च मणिस्तम्भसहस्राङ्कं जिनेशतुः ।
चैत्यं श्रीशान्तिनाथस्य प्रविवेश विवन्दिषुः ॥४६॥
विभीषणार्पितैस्तत्र कुसुमाद्यैरुपस्करैः ।
शान्तिमानर्च काकुत्स्थः सीतासौमित्रिसंयुतः ॥४७॥
विभीषणाभ्यर्थितोऽथ विभीषणगृहं ययौ ।
रामः ससीतासौमित्रिः सुग्रीवादिभिरन्वितः ॥४८॥
तत्र देवार्चनस्नानभोजनादि च राघवः ।
चक्रे सपरिवारोपि मानयन् रावणानुजम् ॥४९॥
रामं सिंहासनासीनमथासीनो विभीषणः ।
वाससी परिधायोभे बभाषेथ कृताञ्जलिः ॥५०॥
रत्नस्वर्णादिकोशोयमिदं हस्तिहयादि च ।
अयञ्च राक्षसद्वीपो गृह्यतां पत्तिरस्मि ते ॥५१॥
राज्याभिषेकमधुना कुर्म्महे तु त्वदाज्ञया ।
पवित्रय पुरीं लङ्कां प्रसीदानुगृहाण माम् ॥५२॥
रामोप्युवाच दत्तं ते लङ्काराज्यं मया पुरा ।
व्यस्मार्षीस्तदिदानीं किं महात्मन् भक्तिमोहितः ॥५३
एवं निषिध्य तं पद्मो लङ्काराज्ये तदैव हि ।
अभ्यषिञ्चत्स्वयं प्रीतः प्रतिज्ञातार्थपालकः ॥५४॥
सीता सौमित्रि सुग्रीव प्रमुखैरावृतो ययौ ।
रामोऽथ रावणगृहे सुधर्म्मायामिवाद्रिभित् ॥५५॥

तत्र सिंहोदरादीना मुद्वोढुं प्राक् प्रतिश्रवाः ।
कन्या रामाज्ञयानैषु स्तत्र विद्याधरोत्तमाः । ५६॥
अथ स्व स्व प्रतिपन्ना स्ताः स्वाः कुमारीर्यथाविधि ।
राघवावुपयेमाते खेचरीगीतमङ्गलौ ॥५७॥
भोगांस्तत्रोपभुञ्जानौ निर्व्विघ्नं रामलक्ष्मणौ ।
सुग्रीवाद्यैः सेव्यमानौ षडब्दीमतिनिन्यतुः ।।५८॥
अत्रान्तरे विन्ध्यस्थल्या मिन्द्रजिन्मेघवाहनौ ।
तौ सिद्धिमीयतुर्जज्ञे तीर्थं मेघरथञ्च तत् ॥५९॥
नर्म्मदायां कुम्भकर्णो नद्यां सिद्धिमियाय च ।
पृष्टरक्षितमित्यासी त्तत्तीर्थं चाभिधानतः ॥६०॥
इतश्च साकेतपुरे रामलक्ष्मणमातरौ ।
तद्वार्त्तामप्यजानन्त्यौ तस्थतुर्भृशदुःखिते ॥६१॥
तदा च धातकीखण्डादागत स्तत्र नारदः ।
पप्रच्छ भक्तिनम्रे ते विमनस्के कुतो युवाम् ॥६२॥
अथापराजितोवाच पुत्त्रौ मे रामलक्ष्मणौ ।
पित्राज्ञया वनं यातौ स्नुषया सीतया सह ॥६३॥
सीतापहाराल्लङ्कायां जग्मतुस्तौ महाभुजौ ।
रावणेन रणे शक्त्या लक्ष्मणस्ताडितः किल ।।६४॥
शक्तिशल्योद्धरणाय विशल्यानायि तत्र च ।
न विद्मो यद्भूत्किञ्चिद्वत्सो जीवति वा नवा ॥६५॥

अभिधायेति हा वत्स वत्सेति करुणस्वरम्।
रुरोद सा रोदयन्ती सुमित्रामपि निर्भरम् ॥६६॥
ततस्ते नारदोऽवोचद्भवतं सुस्थिते युवाम्।
युष्मत्पुत्त्रावुपेष्यामि तथानेष्यामि ताविह ॥६७॥
तयोरेवं प्रतिश्रुत्य नारदो गगनाध्वना।
जनश्रुत्या ज्ञातवृत्तो लङ्कायां राममभ्यगात् ॥६८॥
सत्कृत्य पृष्टो रामेण किमत्रागा इति स्वयम्।
तन्मातृदुःखवृत्तान्त माचख्यौ नारदोऽखिलम् ॥६९॥
सद्यः स रामरामकः पद्मोऽवादी द्विभीषणम्।
विस्मृत्य दुःखमातॄणां त्वद्भक्त्या स्वामिहाधिकम् ॥७०॥
अस्मद्दुःखाद्विपद्यन्ते न यावन्मातरो हि नः।
तावत्तत्राद्य यास्यामोऽनुमन्यस्व मदाशय ॥७१॥
नत्वा विभीषणोप्यूचे तिष्ठात्राहानि षोड़श।
यावत्स्वैः शिल्पिभीरम्यात्ता मयोध्यां करोम्यहम्॥७२॥
एवमस्त्विति रामोक्तः स विद्याधरशिल्पिभिः।
दिनैः षोडशभिश्चक्रेऽयोध्यां स्वर्गपुरीनिभाम् ॥७३॥
तदा रामेण सत्कृत्य विसृष्टो नारदो ययौ।
आख्याच्च राममातॄणां पुत्त्रागममहोत्सवम् ॥७४॥
अथाह्नि षोडशे सान्तःपुरावारुह्य पुष्पकम्।
शक्रेशानाविवैकस्थौ प्रतस्थाते रघूद्वहौ ॥७५॥

रावणानुज सुग्रीव भामगडल नृपादिभिः ।
अन्वीयमानौ नगरीमयोध्यामीयतुः चणात् ॥७६॥
आयान्तौ पुष्पकारूढौ दूरादपि निरीक्षितौ ।
अभ्यगात्कुञ्जरारूढो भरतः सानुजोपि हि ॥७७॥
आयाति भरते रामाज्ञयोपचिति पुष्पकम् ।
जगाम पालकमिव पाकशासनशासनात् ॥७८॥
आदावप्युत्ततारेभाद् भरतो भ्रातृसंयुतः ।
उत्तेरतुः पुष्पकाच्च सोत्कण्ठौ रामलक्ष्मणौ ॥७९॥
पादयोः पतितं रामो भरतं साश्रुलोचनम् ।
परिरेभे समुत्थाप्य मूर्ध्नि चुम्बन्मुहुर्मुहुः ॥८०॥
शत्रुघ्नमपि पादान्ते लुठन्तं रघुपुङ्गवः ।
उत्थाप्य परिमृज्य स्वांशुकेन परिषस्वजे ॥८१॥
ततो भरतशत्रुघ्नौ नमन्तौ लक्ष्मणोपि हि ।
प्रसारितभुजो बाढमालिलिङ्ग ससंभ्रमः ॥८२॥
आरोहदनुजैः सार्द्धं त्रिभीरामोऽथ पुष्पकम् ।
समादिदेश चायोध्याप्रवेशाय कृतत्वरः ॥८३॥
तूर्य्येषु व्योम्नि भूमौ च वाद्यमानेष्वथोन्मुदौ ।
अयोध्यां रामसौमित्री निजां प्राविशतां पुरीम्॥८४॥
सोत्कण्ठैरुन्मुखैः पौरै र्मयूरैरिव वारिदौ ।
निर्निमेषैः प्रेक्ष्यमाणौ स्तूयमानौ च निर्भरम् ॥८५॥

अर्ध्यैर्वह्हीयमानार्घ्यैः स्थाने स्थाने पुरीजनैः ।
स्वं प्रासादं प्रसन्नाख्यौ जग्मतू रामलक्ष्मणौ ॥८४॥
उत्तीर्य्य पुष्पकात्तत्र रामः सौमित्रिणा सह ।
जगाम मातृसदनं सुहृद् हृदयनन्दनः ॥८७॥
रामोऽपराजितां देवीं मातृवर्गमथापरम् ।
नमस्चक्रे ससौमित्रिस्ताभिश्चाशीर्भिरैध्यत ॥८८॥
अथ सीताविशल्याद्याः प्रणेमुरपराजिताम् ।
श्वश्रूरन्याश्च तत्पादपद्मेषु निहिताल्काः ॥८९॥
अस्मद्वीरप्रकाण्डप्रसविन्योऽस्मदाशिषा !
भूयास्तूर्य्यूयमिति ताः श्वश्र्वाप्याश्चाशितोश्चकैः ॥९०॥
अथापराजिता देवी भूयो भूयोऽपि लक्ष्मणम् ।
स्पृशन्ती पाणिना मूर्ध्नि चुम्बन्ती चैवमब्रवीत् ॥९१॥
दिष्ट्या दृष्टोसि हे वत्स पुनर्जातोसि चाधुना ।
कृत्वा विदेशगमनं विजयीह यदागमः ॥९२॥
तानि तानि च कष्टानि वनवासभवान्यसौ ।
रामः सीता चातिनिन्ये तत्रैव परिचर्य्यया ॥९३॥
लक्ष्मणोप्यवदत्तातेनैवार्य्येणातिलालितः ।
त्वयेव सीतादेव्या च वनेष्वस्थामहं सुखम् ॥९४॥
स्वेच्छादुर्ललितैर्मे चार्य्यस्य वैराणि जज्ञिरे ।
सीतापहारो यन्मूलः किमन्यद्देवि गद्यते ॥९५॥

परन्तु युष्मदाशीभि र्लङ्घित्वा वैरिसागरम् ।
मातः सपरिवारोपि क्षेमेणाय्य इहायथौ ॥९६॥
अथोत्सवमयोध्यायां भरतोऽकारयन्मुदा ।
पुरतो रामपादानां पत्तिमात्रं समाचरन् ॥९७॥
अन्यदा रामभद्रन्तु प्रणम्य भरतोऽभ्यधात् ।
आर्य्य त्वदाज्ञया राज्यमियत्कालं मया धृतम् ॥९८॥
प्राव्रजिष्यं तदैवाहं तातपादैः सह प्रभो ।
अर्गला नाभविष्यच्चेदार्य्याज्ञा राज्यपालने ॥९९॥
मां व्रतायानुमन्यस्व स्वयं राज्यं प्रतीच्छच ।
भवोद्विग्नस्त्वयि प्राप्ते नह्यतः स्यातुमुत्सहे ॥१००॥
रामोप्युदश्रुस्तं स्माह किमेवं वत्स भाषसे ।
कुरु राज्यं त्वमेवेह त्वय्युत्का वयमागताः ॥१॥
त्यजन्नः सहराजेत्रन भूयस्त्वद्विरहव्यथाम् ।
किं दत्से वत्स तत्तिष्ठ कुर्वाज्ञां मम पूर्व्ववत् ॥२॥
इत्याग्रहपरं रामं ज्ञात्वा नत्वा च सोचलत् ।
यावत्सौमित्रिणा तावदुत्थायाधारि पाणिना ॥३॥
भरतञ्च तथा यान्तं व्रताय कृतनिश्चयम् ।
ज्ञात्वा सीता विशल्याद्या स्तत्राजग्मुः ससंभ्रमाः ॥४॥
विस्मारयितु कामास्ता भरतस्य व्रताग्रहम् ।
जलक्रीडाविनोदार्थमभ्यर्थयां चक्रिरे तराम् ॥५॥

उपरोधेन तासाञ्च ययौ सान्तःपुरोपि च ।
क्रीडासरसि चिक्रीड विरक्तोपि मुहूर्त्तकम् ॥६॥
जलान्निर्गत्य भरतस्तीरे स्थाद्राजहंसवत् ।
स्तम्भमुन्मूल्य भुवनालङ्कार स्तत्र आययौ ॥७॥
मदान्धोप्यमदः सोभूत् सद्यो भरतदर्शनात् ।
तद्दर्शनेन भरतोप्यवाप परमां मुदम् ॥८॥
संभ्रमाद्रामसौमित्री तस्योपद्रवकारिणः ।
करिणो बन्धनायाशु समामन्तावुपेयतुः ॥९॥
रामाज्ञया हस्तिपकैः स स्तम्भे हस्त्यनीयत ।
आगतौ च मुनी देश भूषणः कुलभूषणः ॥१०॥
उद्याने समवस्तृतौ वन्दितुं तौ महामुनी ।
प्रययुः सद्म सौमित्रिभरताः सपरिच्छदाः ॥११॥
वन्दित्वा तौ च पप्रच्छ रामो मत्तः करी कथम् ।
अमदोऽजनि भुवनालङ्कारो भरते क्षणात् ॥१२॥
अथाख्यत् केवली देशभूषणो नाभिसूनुना ।
समं सहस्रा श्चत्वारो राजन्याः प्राब्रजन्गुरा ॥१३॥
ते तु स्वामिन्यनाहारे कृतमौने विहारिणि ।
निर्व्विन्ना बभ्रिरे सर्व्वे तापसा वनवासिनः ॥१४॥
प्रह्लादन सुप्रभराट् तनयौ तेषु तापसौ ।
चिरं चन्द्रोदय सूरोदयाख्यौ भ्रमतुर्भवम् ॥१५॥

चन्द्रोदयो गजपुरे राज्ञो हरिमतेरभूत् ।
भार्य्यायां चन्द्रलेखायां सूनुर्नाम्ना कुलङ्करः ॥१६॥
सूरोदयोपि तत्रैव विश्वभूतेर्द्विजन्मनः ।
भार्यायामग्निकुण्डायां नाम्ना श्रुतिरतिः सुतः ॥१७॥
अभूत्कुलङ्करो राजा सगच्छं स्तापसाश्रमम् ।
अवधिज्ञानिनेत्यूचे चाभिनन्दनसाधुना ॥१८॥
तप्यमानेन पञ्चाग्नि तप स्तत्र तपस्विना ।
दग्धुमानीतकाष्ठस्य मध्ये तिष्ठति पन्नगः ॥१९॥
सोऽहि पुराभवे क्षेमङ्कराख्य स्ते पितामहः ।
तद्दारु दारयित्वा तं यत्नादाकृष्य रक्ष भोः ॥२०॥
आकुल स्तद्वचः श्रुत्वा गत्वा तद्दार्वदारयत् ।
ददर्शान्तस्थितञ्चाहिं राजा विस्मयतेस्म च ॥२१॥
आदित्सतेस्म प्रव्रज्यां यावद्राजा कुलङ्करः ।
द्विजः श्रुतिरतिः सोथ तावदेवमवोचत ॥२२॥
धर्म्मो नामापि कोवाऽयं निर्व्बन्धश्चेत्तवान्तिमे ।
दीक्षा वयस्युपादेया किं सम्प्रत्यपि खिद्यसे ॥२३॥
राजापि तद्गिरा भग्नदीक्षोत्साहो मनागपि ।
मया किमत्र कर्त्तव्यमिति ध्यायन्नवास्थितः ॥२४॥
श्रीदामाख्यथ तद्राज्ञी सदा सक्ता पुरोधसा ।
नूनं मां ज्ञातवानेष इत्याशङ्कत दुर्म्मतिः ॥२५॥

आवां यावन्न हन्त्येष तावद्धन्मीति सा विषम्।
पुरोधोऽनुमता दत्वा कुलङ्करममारयत् ॥२६॥
क्रमाच्छ्रुतिरतिं सोपि म्हतो भूयोप्युभावपि।
चिरं भवं भ्रेमतुस्तौ नानायोनिनिपातितौ ॥२७॥
पुरेऽन्यदा राजगृहे कपिलब्रह्मणः सुतौ।
सावित्र्यां युग्मतो भूतां विनोदरमणाभिधौ ॥२८॥
[illegible]णो वेदमध्येतुं ययौ देशान्तरं ततः।
कालेनाधीतवेदः सन्नागाद्राजगृहं निशि ॥२९॥
अकालोऽसाविति धिया तदा स्थाद्बहिरेव सः।
सर्व्वसाधारणो यक्षासीवेदस्मिन्यक्षमन्दिरे ॥३०॥
विनोदभार्य्या शाखाख्या दत्तेन ब्रह्मणा समम्।
तत्रागात्कृतसङ्केता विनोदोपि हि तामनु ॥३१॥
सा दत्तबुद्ध्या रमण मुत्थाप्य रमयत्तथा।
विनोदोप्यसि माकृष्य तं जघानाविशङ्कितः ॥३२॥
शाखया रमणच्छुर्य्या विनोदोपि हतस्तदा।
चिरं तां त्वाभवञ्चाभूद्दिभ्य पुत्त्रो धनाभिधः ॥३३॥
रमणोपि भवं भ्रांत्वा वनस्यैवाभवत्सुतः।
लक्ष्मीकुक्षिसमुद्भूतो भूषणो नामधेयतः ॥३४॥
द्वात्रिंशदिभ्यकन्याः स धनोक्तः परिणीतवान्।
ताभिः क्रीडन्नन्यदास्था न्निशि स्वगृहमूर्भनि ॥३५॥

तत्र यामे निशस्तुर्य्ये श्रीधरस्य महामुनेः ।
उत्पन्ने केवलेऽद्राक्षी द्वैरारब्धमुत्सवम् ॥३६॥
जातधर्म्मपरीणामः सद्योप्युत्तीर्य्य वेश्मनः ।
तं वन्दितु मचालीच मार्गेदष्टस्च सोऽहिना ॥३७॥
शुभेन परिणामेन भ्रान्त्वा शुभगतीश्चिरम् ।
जम्बूद्वीपेऽत्रवैदेहे पुरे रत्नपुरे पुरे पुरे ॥३८॥
महिष्यां हरिणीनाम्न्यामचलाख्यस्य चक्रिणः ।
प्रियदर्शननामाऽभूत्स सूनुर्द्धर्म्मतत्परः ॥३९॥
स प्रविव्रजिषुः पित्त्रनुरोधात्परिणीतवान् ।
त्रीणि कन्यासहस्राणि संविग्नोऽस्थात्तथापि हि ॥४०॥
चतुःषष्ठिसहस्राणि वर्षाणां स तपः परम् ।
चरित्वा गृहवासेपि ब्रह्मलोके सुरोऽभवत् ॥४१॥
भ्रांत्वा धनोपि संसारं स पोतनपुरेऽभवत् ।
शकुनाग्निमुखब्रह्म पत्न्यां म्टदुमतिः सुतः ॥४२॥
स पित्रा दुर्वनीतत्वा द्गृहान्निर्वासितोऽभ्रमत् ।
धर्त्तः सर्वकलाकल्पो भूत्वा भूयोऽप्यगाद्गृहम् ॥४३॥
सदादिदेवदूतेन न त्वज्जीयत केनचित् ।
दिने दिने देवकेभ्यो भूयिष्टमयजद्धनम् ॥४४॥
वसन्तसेनया सार्द्धं भुक्त्वा भोगान् स वेश्यया ।
अन्ते गृहीतश्रामन्यो ब्रह्मलोके सुरोऽभवत् ॥४५॥

श्रुत्वा पूर्वभवमायाद्दोषाद्वैताढ्यपर्वते ।
अयं बभूव भुवनालङ्कारो नाम कुञ्जरः ॥४६॥
प्रियदर्शनजीवोपि ब्रह्मलोकात्परिच्युतः ।
बभूव भवतो भ्राता भरतोयं महामुनः ॥४७॥
भरतालोकनाज्जातो जातिस्मृतिरसौ गजः ।
सद्योगतमदो जज्ञे विवेके हि न रौद्रता ॥४८॥
इति पूर्वभवान् श्रुत्वा विरक्तो भरतोऽधिकम् ।
व्रतं राजसहस्रेणाऽग्रहान्मोक्ष मियाय च ॥४९॥
सहस्रं तेपि राजानः पालयित्वा चिरं व्रतम् ।
नानालब्धायुषो भूत्वानुरूपं पदमासदन् ॥५०॥
कुञ्जरः सोऽपि वैराग्याद्विधाय विविधं तपः ।
प्रपन्नाऽनशनो भूत्वा ब्रह्मलोके सुरोऽभवत् ॥५१॥
व्रतं भरतमातापि कैकयी समुपाददे ।
पालयित्वा निष्कलङ्कं प्रपेदे पदमव्ययम् ॥५२॥
भरते च प्रव्रजिते भूत्वा भूचरखेचराः ।
अर्थयां चक्रिरे राममभिसेवाय भक्तितः ॥५३॥
लक्ष्मणो वासुदेवोयं भवद्भिरभिषिच्यताम् ।
तानेव मादिशद्राम स्ते तथैवाशुचक्रिरे ॥५४॥
बलदेवात्वाभिषेकं रामभद्रस्य च व्यधुः ।
राज्यं द्वावप्यपाताञ्चा ष्टमौ तौ बलशार्ङ्गिणौ ॥५५॥

पद्मो विभीषणायादाद्रक्षोद्वीपं क्रमागतम्।
सुग्रीवाय कपिद्वीपं श्रीपुरञ्च हनूमते ॥५६॥
विराधायतु पातालल‌ङ्कामङ्गपुरं पुनः।
नीलाय प्रतिसूर्य्याय पुरं हनुपुरं पुनः ॥५७॥
देवोपगीतनगरं तद्रत्नजटिने पुनः।
भामण्डलाय वैताढ्ये नगरं रथनूपुरम् ॥५८॥
अन्येभ्योपि प्रदायैवं रामः शत्रुघ्नमभ्यधात्।
यस्तुभ्यं रोचते वत्स तं देशमुररी कुरु ॥५९॥
मथुरां मे प्रयच्छेति शत्रुघ्नेनार्थितः पुनः।
रामो जगाद दुःसाध्या सा वत्स मथुरा पुरी ॥६०॥
तत राज्ञो मधोः शूलञ्चमरेण पुरार्पितम्।
दूरात्परबलं सर्वं निहत्याभ्येति तत्करे ॥६१॥
शत्रुघ्नोप्येवमवद देव रक्षःकुलान्तकः।
तवास्मि नन्वहं भ्राता त्राता कस्तस्य मद्युधि ॥६२॥
प्रयच्छ मथुरां मह्यं स्वयमेव मधोरहम्।
प्रतीकारं करिष्यामि व्याधेरिव भिषग्वरः ॥६३॥
शत्रुघ्नमत्याग्रहिणं ज्ञात्वा रामोऽन्वशादिति।
अपशूलः प्रमत्तश्च योध्दनीयो मधुस्त्वया ॥६४॥
अनुशिष्येत्यदाद्राम स्तूणावक्षय्यसायकौ ॥
कृतान्तवदनं नाम सेनान्यञ्च सहादिशत् ॥६५॥

शिलीमुखानग्निमुखानर्णवावर्त्तधन्वच ।
लक्ष्मणोपि ददौ तस्मायाशंसन् विजयं परम् ॥ ६६॥
ततः प्रतस्थे शत्रुघ्नः प्रयाणैश्च निरन्तरैः ।
ययावुपमधूजन्ममवाल्मीक्य नदीतटे ॥ ६७॥
तत्रादौ प्रेषिताश्चारा स्तस्याख्यन्नेत्ययन्मधुः ।
गतः कुवेरोद्यानेस्ति मथुरापूर्व्वदिक् स्थिते ॥ ६८॥
पल्ल्या जयन्तया सार्द्धं स तत्र क्रीडापरोऽधुना ।
अस्त्रागारे च तच्छूलं कालोऽयं तस्य योधने ॥ ६९॥
ततश्छलज्ञः शत्रुघ्नः प्राविशन्मथुरां निशि ।
प्रविशन्तं मधुस्तत्र रुरोध च बलैः स्वयम् ॥ ७०॥
जघान समरे चादौ लवणं मधुनन्दनम् ।
रामायणरणारम्भे खरं नारायणो यथा ॥ ७१॥
मधुः सुतवधक्रुद्धो धावित्वा स्फालयन् धनुः ।
युयुधे च दाशरथिना रथिना रथिनाम्बरः ॥ ७२॥
अन्योन्यमस्त्रैरस्त्राणि च्छिन्दानौ तावुभावपि ।
शस्त्राशस्त्रि प्रचक्राते चिरं देवासुराविव ॥ ७३॥
धनुः समुद्रावर्त्तञ्चाग्निमुखांश्च शिलीमुखान् ।
सौमित्रिदत्तानस्मार्षीत्तूर्य्यं दशरथात्मजः ॥ ७४॥
तत्स्मृतोपनतं धन्वाऽधिज्यीकृत्याग्निपत्रिभिः ।
तैर्जघान मधुं वीरः शार्दूलमिव लुब्धकः ॥ ७५॥

तद्वाणघातविधुरो मधुरेवमचिन्तयन्।
शूलं पाणौ न मेऽभ्यागान्न हतो लक्ष्मणानुजः ॥७६॥
गतं मम मुधा जन्म जिनेन्द्रो न यदर्चितः।
कारितानि न चैत्यानि दत्तं पात्रेषु नो मया ॥७७॥
इति ध्यायन्नात्तदीक्षो नमस्कारपरायणः।
मृत्वा सनत्कुमारेऽभून्मधुर्देवो महर्द्धिकः ॥७८॥
मधुदेहस्योपरिष्टान्महिमानं सुराव्यधुः।
पुष्पवृष्टिं जुघुषुश्च मधुर्देवो जयत्विति ॥७९॥
तच्छूलं देवतारूपमुपेत्य चमरान्तिके।
शत्रुघ्नान्मधुनिधनं च्छलोत्पन्नं शशंस च ॥८०॥
ततो मित्रवधामर्षी चमरः प्राचलत्स्वयम्।
पृष्टः क्व यासीति तार्क्ष्यस्वामिना वेणुदारिणा ॥८१॥
हन्तुं स्वमित्रहन्तारं शत्रुघ्नं मथुरास्थितम्।
यास्यामीति तदाख्याते वेणुदार्य्यवदत्पुनः ॥८२॥
धरणेन्द्राद्रावणेन या लब्धा सापि निर्ज्जिता।
शक्तिः सौमित्रिणा पुण्यप्रकृष्टेनार्द्धचक्रिणा ॥८३॥
रावणोऽपि हतस्तेन तत्पत्तिस्तु कियान्मधुः।
शत्रुघ्नो लक्ष्मणादेशादवधीत्प्रधने मधुम् ॥८४॥
उवाच चमरेन्द्रो यच्छक्तिः सौमित्रिणाजिता।
कन्यकाया विशल्यायाः प्रभावेण तदा खलु ॥८५॥

तस्यास्त्वाब्रह्मचारिण्याः स प्रभावो गतोऽधुना।
किं वातेनेन यास्यामि तं हन्तुं मित्रघातकम्॥८६॥
इत्युक्त्वा चमरो रोषाच्छत्रुघ्नविषयं ययौ।
सौराज्यसुस्थितं तत्र सर्व्वं लोकं ददर्श च॥८७॥
प्राक् प्रजोपद्रवेणोपद्रवाम्येतं मधुद्विषम्।
इति बुद्ध्या व्यधाद्रोगान् विविधांस्तत्प्रजासु सः॥८८॥
कुलदेवतया तच्च ज्ञापितो व्याधिकारणम्।
शत्रुघ्नोऽगादयोध्यायां रामलक्ष्मणसन्निधौ॥८९॥
तौ देशभूषण कुलभूषणावागतौ तदा।
रामलक्ष्मणशत्रुघ्ना उपेत्यच ववन्दिरे॥९०॥
आग्रही हेतुना केन शत्रुघ्नो मथुरां प्रति।
इति रामेण पृष्टः सन् बभाषे देशभूषणः॥९१॥
शत्रुघ्नजीव उत्पद्य मथुरायामनेकशः।
विप्रोऽभूच्छ्रीधरो नाम रूपवान् साधुसेवकः॥९२॥
सोऽन्यदाध्वनि यत् राजमहिष्या ललिताख्यया।
दृष्टो रागादथानायि स्वान्तिके रन्तुकामया॥९३॥
आगाच्चातर्कितो राजा क्षुभिता ललितापि च।
चौरोऽसाविति पुच्चक्रे राज्ञाधारि सतु द्विजः॥९४॥
राजादेशाद्वधार्थं स वधस्थानमनीयत।
प्रतिज्ञातव्रतोऽमोचि कल्याणमुनिना ततः॥९५॥

विमुक्तः प्राव्रजत्सोपि तपस्तप्त्वा दिवं ययौ ।
च्युत्वा च मथुरापुर्य्यां चन्द्रभद्रनृपात्मजः ॥९६॥
सकाञ्चनप्रभा राज्ञी कुक्षिभूरचलाभिधः ।
अत्यन्तवल्लभश्चासीच्च चन्द्रप्रभस्य भूपतेः ॥९७॥
भानुप्रभाद्यैः सापत्नैः सोऽचलोऽष्टभिरग्रजैः ।
व्यापादयितुमारेभे राजाऽयं मास्म भूदिति ॥९८॥
तन्मन्त्रे मन्त्रिणाख्याते नष्टागादचलोन्यतः ।
भ्रमंश्चाविध्यत वने कण्टकेन गरीयसा ॥९९॥
सक्रन्दन्पथि दृष्टश्च पुंसा श्रावस्तिवासिना ।
पितृनिर्वासितेनाङ्कनाम्नैवोभारधारिणा ॥२००॥
काष्ठभारं विमुच्याङ्कोऽपनिन्ये तस्य कण्टकम् ।
हृष्टः स कण्टकं दत्त्वोवाचाङ्कं साधु मे कृतम् ॥१॥
अचलं मथुरापुर्य्यां त्वं शृणोषि यदा नृपम् ।
तदा तत्र समागच्छेः परमो ह्युपकार्य्यसि ॥२॥
कौशाम्ब्यामचलोथागात्तत्र सिंहगुरोः पुरः ।
इन्द्रदत्तनृपं धन्वाभ्यस्यन्तं समुदैक्ष्यत ॥३॥
सिंहेन्द्रदत्तयोः सोपि धानुष्कत्वमदर्शयत् ।
तस्मै दत्तामिन्द्रदत्तोऽदत्तपुत्त्रीं भुवा सह ॥४॥
सोऽसाधयज्जातबलो देशानङ्गादिकांस्ततः ।
मथुरां चान्यदागच्छद् युयुधे चाग्रजैः सह ॥५॥

भानुप्रभादीन् स भ्रातॄन् बद्धा द्वावपि चाग्रहीत्।
तन्मुक्त्यै मन्त्रिणोऽप्रैषी च्चन्द्रप्रभोऽचलान्तिके ॥६॥
आख्यत्तेषां स्ववृत्तान्तमचलस्तेऽपि मन्त्रिणः।
विज्ञाय गत्वा चाचख्यु श्चन्द्रभद्राय सत्वरम् ॥७॥
अचलश्चन्द्रभद्रोऽपि हृष्टः पुर्य्यामवीविशत्।
क्रमेण निजराज्ये तं लघीयांसमपि व्यधात् ॥८॥
पित्रा निर्वास्यमानांस्तान् भ्रातॄन् भानुप्रभादिकान्।
कथञ्चिदचलो रक्षश्चक्रे चाद्दष्टसेवकान् ॥९॥
अन्यदा नटरङ्गस्थेनाङ्को दृष्टोऽचलेन सः।
हन्यमानः प्रतीहारै रानायि च निजान्तिके ॥१०॥
तस्मै तज्जन्मभूमिं तां श्रावस्तीमचलो ददौ।
तौ द्वौ सम्भूय चक्राते राज्यमद्वैतसौहृदौ ॥११॥
तावन्यदा प्राव्रजतां समुद्राचार्य्यसन्निधौ।
मृत्वा कालेन चाभूतां ब्रह्मलोके सुरोत्तमौ ॥१२॥
च्युत्वा ततोऽचलो जीवः शत्रुघ्नोऽभूत्तवानुजः।
प्राग्जन्ममोहनीयेन ततोऽसौ मथुराग्रही ॥१३॥
च्युत्वा ततोऽङ्कजीवोऽपि सेनापति रयं तव।
कृतान्तवदनो नाम समजायत राघव: ॥१४॥
इतश्च श्रीनन्दनस्य प्रभापुर पुरेशितुः।
भार्य्यायां धरणीनाम्न्यां सप्ताभूवन् क्रमात्सुताः ॥१५॥

सुरनन्दः श्रीनन्दः श्रीतिलकः सर्व्वसुन्दरः।
जयन्तश्चा मरश्चापि जयमित्रश्च सप्तमः ॥१६॥
मासजातं सुतं राज्ये न्यस्य श्रीनन्दनोन्यदा।
गुरोः प्रीतिकरस्यान्ते प्राव्राजीत्तैः सुतैः सह ॥१७॥
श्रीनन्दननो ययौ मोक्षं सुरनन्दादयस्तु ते।
सप्राप्यासंस्तपः शक्त्या जङ्घाचारणलब्धयः ॥१८॥
विहरन्तः पुरीं जग्मु र्मथुरां ते महर्षयः।
प्रावृट् चाभूत्तदा तस्थु रधिशैलगुहागृहम्॥१९॥
चक्रुः षष्ठाष्टमादीनि ते तपांसि सदापि हि।
उत्पत्य दूरदेशेषु पारणं चक्रिरे पुनः ॥२०॥
भूयोपि मथुराशैल गुहायां तस्थुरेत्य च।
तत्प्रभावश्चमरभू र्व्याधि स्तत्र क्षयं ययुः ॥२१॥
पारणार्थान्यदोपेत्याऽयोध्यायां ते ययुः पुरि।
अर्हद्दत्तश्रेष्ठिनश्च भिक्षार्थं प्राविशन् गृहे ॥२२॥
सावज्ञन्तान् सवन्दित्वा दध्यौ श्रेष्ठीति केह्यमी।
नेहत्याः साधुवेषा स्तद्वर्षास्वपि विहारिणः ॥२३॥
पृच्छामि किममून् यद्वा पाषण्डैर्भाषितैरलम्
तस्यैवं ध्यायत स्तेतु तद्वध्वा प्रतिलम्भिताः ॥२४॥
आचार्य्यस्य द्युते र्जग्मु र्वसन्तौ ते महर्षयः।
अभ्युत्थाय द्युतिनापि वन्दितास्ते सगौरवम् ॥२५॥

अकालचारिण इति तत्साधुभिरवन्दिताः ।
दत्ता सनास्ते द्युतिना तत्र पारणकं व्यधुः ॥२६॥
आयाता मथुरापुर्य्यां यास्यामस्तत्र सम्प्रति ।
इत्याख्याय समुत्पत्य स्वं स्थानं ते पुनर्ययुः ॥२७॥
तेषां जङ्घाचारणानां गुणस्तोत्रं द्युतिर्विधात् ।
तत्साधवः कृताऽवज्ञाः पश्चात्तापं प्रचक्रिरे ॥२८॥
तच्छ्रुत्वा श्रावकः सोऽर्हद्दत्तोप्यनुशयं व्यधात् ।
कार्त्तिकश्वेतसप्तम्यां ययौ च मथुरां पुरीम् ॥२९॥
अर्चित्वा तत्र चैत्यानि सप्तर्षीं स्तानवन्दत ।
क्षमयामास चावज्ञा दोषं शंसन् स्वयं कृतम ॥३०॥
सप्तर्षीणां प्रभावेण शान्तरोगं स्वमण्डलम् ।
विज्ञायेयाय कार्त्तिक्यां शत्रुघ्नोपि हि तां पुरीम् ॥३१॥
तान्नत्वोवाच शत्रुघ्नो भिक्षा मे गृह्यतां गृहे ।
प्रत्यूचे स्तेपि साधूनां राजपिण्डो न कल्पते ॥३२॥
भूयोऽप्युवाच शत्रुघ्नो यूयं मय्युपकारिणः ।
मद्देशे दैविको रोगः शान्तोयुष्मत्प्रभावतः ॥३३॥
तल्लोकानुग्रहायेह किञ्चिदद्यापि तिष्ठत ।
सर्वा प्रवृत्ति र्भवतां ह्यन्योपकृतिहेतवे ॥३४॥
तेप्यूचिरे गता प्रावृट् कालोयं तीर्थयात्रया ।
अधुना विहरिष्यामो नैकत्र मुनयः स्थिराः ॥३५॥

गृहे गृहे त्वं गृहिणां कारये बिम्बमार्हताम् ।
पुर्य्यामस्यां ततो जातु व्याधिर्भावी न कस्यचित् ॥३६॥
इत्युक्त्वा ते समुत्पत्य ययुः सप्तर्षयोऽन्यतः ।
शत्रुघ्नोऽपि तथा चक्रे लोकस्याभून्निरामयः ॥३७॥
तेषां सप्तर्षीणाञ्च प्रतिमा रत्ननिर्म्मिताः ।
स चक्रे मथुरापुर्य्यां ककुप्सु च चतसृषु ॥३८॥
इतश्च वैताढ्यगिरौ दक्षिणश्रेणिभूषणे ।
पुरे रत्नपुरे रत्नरथो राजा तदाभवत् ॥३९॥
तस्य चन्द्रमुखीकुक्षिजन्मा नाम्ना मनोरमा ।
उद्यौवना कन्यकाभूद्रूपेणापि मनोरमा ॥४०॥
दातव्या कस्य कन्येयमितिमन्त्रपरे नृपे ।
उपेत्य नारदोऽवोच लक्ष्मणस्येयमर्हति ॥४१॥
पुत्त्री रत्नरथस्याथ कुपिता गोत्रवैरतः ।
भृत्यान् भ्रूसंज्ञयादिक्षन् विटोयं कुट्यतामिति ॥४२॥
उत्तिष्ठतोजिघांसूं स्तान् धीमान् विज्ञाय नारदः ।
समुत्पत्य पतत्रीव प्रययौ पुरलक्ष्मणम् ॥४३॥
लिखित्वा तां पटे कन्यां दर्शयामास नारदः ।
लक्ष्मणाय स्ववृत्तान्तं ताञ्च चख्यौ विशेषतः ॥४४॥
तद्रूपदर्शनाज्जातानुरागो लक्ष्मणः क्षणात् ।
समं रामेण तत्रागाद्वृतो विद्याधरैर्वृतः ॥४५॥

जितः सौमित्रिणा चाशु तत्र रत्नरथो ददौ।
रामाय कन्यां श्रीदामां लक्ष्मणाय मनोरमाम् ॥४६॥
वैताढ्यदक्षिणश्रेणिं जित्वा सर्वाञ्च राघवौ।
भूयोऽयोध्यामीयतुः क्ष्मां पालयन्तौ च तस्थतुः ॥४७॥
षोडशान्तःपुरवधूसहस्रं लक्ष्मणस्य तु।
महिष्योऽष्टावभवंस्तत्र विशल्या रूपवत्यपि ॥४८॥
वनमाला च कल्याणमालिका रत्नमालिका।
जितपद्मा भयवती चाष्टमा तु मनोरमा ॥४९॥ युग्मम्॥
सूनवो द्विशते सार्द्धे तेष्वष्टमहिषीभवाः।
श्रीधरो भूद्विशल्याभूः पृथिवीतिलकः पुनः ॥५०॥
रूपवत्यङ्गजो वनमालाजोऽर्ज्जुनसंज्ञकः।
श्रीकेशी जितपद्मायाः कल्याणायास्तु मङ्गलः ॥५१॥
सुपार्श्वकीर्त्तिस्तु मनोरमाया विमलः पुनः।
रतिमालाभूरभयवतीभूः सत्यकीर्त्तिकः ॥५२॥
रामस्यासन्महादेव्यश्चतस्रस्तत्र मैथिली।
प्रभावती रतिनिभा श्रीदामा तु चतुर्थिका ॥५३॥
सीतैकदा ऋतुस्नाता निशान्ते स्वप्नमैक्षत।
च्युतौ विमानाच्छरभौ प्रविशन्तौ निजानने ॥५४॥
व्याख्याद्राम स्तया ख्याते वीरौ ते भाविनौ सुतौ।
च्युतौ विमानाद्यत्त्वं यत्तत्र तन्न मुदे मम॥५५॥

धर्मस्य ते च माहात्म्यात् सर्वं भावि शुभं प्रभो ।
इत्यूचे जानकी देवी तदा गर्भं दधार च ॥५६॥
सीता प्राणप्रियाग्रेऽपि प्राप्तगर्भा विशेषतः ।
बभूव रामचन्द्रस्य लोचनानन्दचन्द्रिका ॥५७॥
ईर्ष्यालवः सपत्न्योऽस्यां मायाविन्योऽब्रुवन्नदः ।
कीदृक् रूपो रावणोऽभूत्तं लिखित्वा प्रदर्शय ॥५८॥
सीताप्यूचे मया दृष्टः सर्वाङ्गो नहि रावणः ।
दृष्टौ तच्चरणावेव कथं नाम लिखामि तम् ॥५९॥
तत्पादाववप्यालिख त्वं कौतुकं न स्तदीक्षणे ।
इत्युक्ता प्रकृति ऋज्वी दशास्यांघ्री लिलेख सा॥६०॥
स्थाने तत्रागमद्रामो बभाषे ताभिरप्यदः ।
रावणस्य स्मरत्यद्याप्यसौ सीता तव प्रिया ॥६१॥
सीता स्वहस्तलिखितं रावणस्य क्रमद्वयम् ।
पश्यैतन्नाथ जानीहि सीता तस्यैव नाथते ॥६२॥
दृष्ट्वापि तत्तथा रामो गम्भीरत्वान्महामनाः ।
तथैव वर्त्तते सीता देव्या मनुपलक्षितः ॥६३॥
सीता दोषपदन्तच्च देव्यो दासीजनैर्निजैः ।
जने प्रकाशयन्प्रायः प्रवादालोकनिर्मिताः ॥६४॥
वसन्ते थाब्रवीद्रामः सीते त्वां गर्भखेदिताम् ।
विनोदयितु कामेव मधुलक्ष्मी रिहाययौ ॥६५॥

पुष्यन्ति वकुलप्राया वृक्षा स्त्रीदत्तदोहदैः ।
रन्तुं व्रजामो महेन्द्रोदयोद्यानं ततोऽधुना ॥६६॥
सीताप्यूचे दोहदो मे देवतार्च्चन लक्ष्मणः ।
तं पूरयोद्यामभवै र्नानापुष्पैः सुगन्धिभिः ॥६७॥
रामः सद्योपि देवानां पूजाञ्चर्य्यां मकारयत् ।
ययौ महेन्द्रोदये च ससीतः सपरिच्छदः ॥६८॥
विचित्रनगरक्रीडं तत्राऽपश्यन्मधूत्सवम् ।
अर्हत्पूजोत्सवमयं सुखासीनो रघूद्वहः ॥६९॥
अत्रान्तरे च सीताया दक्षिणञ्चक्षुरस्फुरत् ।
आचचक्षे च सद्योपि साशङ्का राघवाय सा ॥७०॥
नेदं साध्विति रामेणाख्याते सीता ब्रवीदिति ।
किं रक्षोद्वीपवासान्मे सन्तुष्टोऽद्यापि नो विधिः ॥७१॥
त्वद्वियोगभवाद् दुःखाद् दुखमद्यापि मेऽधिकम् ।
किमसौ दास्यति विधि र्निमित्तं नैतदन्यथा ॥७२॥
रामोपि तामुवाचैवं देवि माखेदमुद्वह ।
अवश्यमेव भोक्तव्ये कर्माधीने सुखाऽसुखे ॥७३॥
तद्गच्छ मन्दिरे स्वस्मिन् देवानामर्च्चनं कुरु ।
प्रयच्छ दानं पात्रेभ्यो धर्मः शरणमापदि ॥७४॥
सीतापि गत्वा सदनं संयमेन महीयसा ।
अर्हतोऽपूपुजद्दानं प्रददे चावदानवत् ॥७५॥

रघुनाथमथाजग्मू राजधानीमहत्तराः ।
यथा भूतपरीक्षकीर्त्तनैकाधिकारणः ॥७६॥
विजयः सूरदेवश्च मधुमानऽथ पिङ्गलः ।
शूलंधरः काश्यपश्च कालक्षेमश्च नामतः ॥७७॥
नत्वा रामाग्रतस्तस्थुः कम्पमाना इपत्रवत् ।
नतु विज्ञापयामासू राजतेजोहि दुःसहम् ॥७८॥
तानूचे रामभद्रोऽपि भो भो पुरमहत्तराः ।
अभयम्बो ब्रुवाणानामेकान्तहितवादिनाम् ॥७९॥
तेष्वाद्यः सर्वसम्बित्तरा विजयाख्यो महत्तरः ।
इति विज्ञापयामास सावष्टम्भः प्रभोर्गिरा ॥८०॥
स्वामिन्नवश्यविज्ञाप्यं यदि विज्ञाप्यते न हि ।
वञ्चितः स्यात्तदा स्वामी विज्ञप्तञ्चातिदुःश्रवम् ॥८१॥
देव देव्यां प्रवादोऽस्ति घटते दुर्घटोपि हि ।
युक्त्याहि यद्ययमेति श्रद्धेयं तन्मनीषिणा ॥८२॥
तथाहि जानकीं हृत्वा रावणेन रिरंसुना ।
एकैव निन्ये तद्गेहमन्यवात्सीच्च चिरं प्रभो ॥८३॥
सीता रक्ता विरक्ता वा संविन्या वा प्रसह्य वा ।
स्त्रीलोलेन दशास्येन नूनं स्याद्भोगदूषिता ॥८४॥
लोकोपि प्रवदत्येवं प्रवदामो वयं तथा ।
युक्तियुक्तं प्रवादन्तन् मा सहस्व रघूद्वह ॥८५॥

आजन्मोपार्जितां कीर्त्तिं निजं कुलमिवामलम् ।
प्रवादसहनेन त्वं मादेव मलिनीकृथाः ॥८६॥
कलङ्कस्यातिथीभूतां सीतां निश्चित्य राघवः ।
सद्यो भूद्दुःखतूष्णीकः प्रायःप्रेमातिदुस्त्यजम् ॥८७॥
धैर्य्यमालम्ब्य काकुत्स्थ स्तानुवाच महत्तरान् ।
साधु व्यक्तापि युष्माभिर्न्न भक्ताः क्वाप्युपेक्षकाः ॥८८॥
न स्त्रीमात्रकृते जातु सहिष्येहमिहाऽयशः ।
इति पश्चः प्रतिज्ञाय विससर्ज महत्तरान् ॥८९॥
निशायामथ काकुत्स्थः प्रच्छन्नः सदनाद्बहिः ।
निरगादितिचाश्रौषी ज्जनवाचं पदे पदे ॥९०॥
रावणेनापनीतेयं तद्गृहे च चिरं स्थिता ।
सीता नीता च रामेण सतीतिच स मन्यते ॥९१॥
सीतारक्तेन तेनेयं नोपभुक्ता कथं भवेत् ।
नादोपि व्यमृशद्रामो न रक्तो दोषमीक्षते ॥९२॥
इत्यादि सीतानिर्वादं शृण्वन् रामो गृहे ययौ ।
भूयोपि तच्छ्रवणार्थं मादिदेश चरान् वरान् ॥९३॥
एवञ्च दध्यौ काकुत्स्थो मया यस्याः कृते कृतः ।
रक्षःकुलक्षयो रौद्रस्तस्या किमिदमागतम् ॥९४॥
जाने महासती सीता स्त्रीलोलः सच रावणः ।
कुलञ्च मे निष्कलङ्कं हा रामः किङ्करोत्वसौ ॥९५॥

द्राक् चरास्ते बहिः श्रुत्वा सीतानिर्वादमब्रुवन्।
रामस्य सानुजकपि रक्षो राजस्य सुस्फुटम् ॥९६॥
क्रुद्धोऽथ लक्ष्मणोऽवोचद् दोषान् सङ्कल्प्यहेतुभिः।
ये निन्दन्ति सतीं सीतां तेषामेषोऽन्तकोऽस्म्यहम्॥
रामोऽप्यूचे मम पुरा व्यक्तापोदं महत्तरैः।
स्वयञ्च शुश्रुवे तस्य सम्वादोऽयं चरैः कृतः ॥९८॥
श्रुत्वा चामी समायाताः प्रत्यक्षञ्च स्वभाषिताः।
सीतात्यागे मापवादी त्सीतास्वीकारवज्जनः ॥९९॥
ऊचे च लक्ष्मणो लोकगिरा सीतां समात्यज।
यथा तथापवदिता यद्बहुमुखो जनः ॥३००॥
लोकः सौराज्यसुस्थोपि राजदोषपरीभवेत्।
शिक्षणीयो नचेत्तत्रोपेक्षणीयः स भूभुजाम् ॥१॥
रामोऽप्यूचे सत्यमेतदीदृग् लोकः सदापि हि।
सर्व्वलोकविरुद्धन्तु त्याज्यमेव यशस्विनः ॥२॥
इत्युक्त्वोवाच सेनान्यं कृतान्तवदनं बलः।
अरण्ये त्यज्यतां क्वापि सीतेयं गर्भवत्यपि ॥३॥
पतित्वा रामपादेषु बभाषे लक्ष्मणो रुदन्।
सीतादेव्या महासत्या स्त्यागोऽयमुचितो नहि ॥४॥
नातःपरं त्वया वाच्यमिति रामेण भाषिते।
निरगोच्छन्नवक्त्रोगात्सौमित्रिः स्वगृहं रुदन् ॥५॥

कृतान्तवदनं रामोऽन्वशात्सीतां वने नय ।
सम्मेत यात्राव्याजेन तस्याः खल्वेष दोहदः ॥६॥
सेनानीरपि संमेतयात्रायै रामशासनम् ।
आख्याय सीतामारोप्य स्यन्दने प्राचलद्द्रुतम् ॥७॥
दुर्न्निमित्तेष्वशकुनेष्वपि सीता रथस्थिता ।
जगाम दूरमध्वान मार्ज्जवादवशङ्किता ॥८॥
गङ्गासागरमुत्तीर्य्याऽरण्ये सिंहनिनादके ।
गत्वा कृतान्तवदनस्तस्थौ किञ्चिद्विचिन्तयन् ॥९॥
साश्रुम्लानमुखन्तञ्च प्रेक्ष्य सीताऽब्रवीदिति ।
कथमित्थं स्थितोसि त्वं सशोक इव दुर्मनाः ॥१०॥
कृतान्तः कथमप्यूचे दुर्व्वचं वक्ष्यहं कथम् ।
दुष्करं कृतवांश्चैतत् प्रेष्यभावेन दूषितः ॥११॥
राक्षसावाससंवासापवादाल्लोकजन्मनः ।
भीतेन देवी रामेण त्याजिताऽसि वनेऽनघे ॥१२॥
अपवादे चराख्याते रामं त्वत्त्यजनोद्यतम् ।
न्यषेधी लक्ष्मणो लोकं प्रतिक्रोधाकर्णक्षणः ॥१३॥
सिद्धाज्ञया निषिद्धश्च रामेण स रुदन् ययौ ।
अहञ्च प्रेषितोऽमुष्मिन् कार्य्ये पापोऽस्मि देविहा ॥१४
अमुष्मिन् श्वापदाकीर्णे स्त्यो रेकनिकेतने ।
जीविष्यसि मया त्यक्ता स्वप्रभावेण केवलम् ॥१५॥

तच्छ्रुत्वा स्यन्दनात्सीता मूर्च्छिता न्यपतद्भुवि ।
मृतेति बुद्ध्या सेनानी पापंमन्यो रुरोद सः ॥१६॥
सीतापि वनवातेन कथञ्चित्प्राप चेतनाम् ।
भूयो भूयोऽप्यमूर्च्छच्च चेतनामाससाद च ॥१७॥
महत्यामथ वेलायां सुस्थीभूयेत्युवाच सा ।
इतोऽयोध्या कियद्दूरे रामस्तिष्ठति कुत्र वा ॥१८॥
सेनानीरभ्यधाद्दूरेऽयोध्या किं पृच्छयानया ।
उग्राज्ञस्य च रामस्य पर्य्याप्तं देवि वार्त्तया ॥१९॥
इति श्रुत्वापि सा रामभक्ता भूयोऽप्यभाषत ।
भद्र मद्वाचिकमिदं शंसे रामस्य सर्वथा ॥२०॥
यदि निर्वादभीतस्त्वं परीक्षां नाऽकृथाः कथम् ।
शङ्कास्थाने हि सर्वोऽपि दिव्यादि लभते जनः ॥२१॥
अनुभोक्ष्ये स्वकर्माणि मन्दभाग्या वनेऽप्यहम् ।
नानुरूपं त्वकार्षीस्त्वं विवेकस्य कुलस्य च ॥२२॥
यथा खलगिराऽत्याक्षीः स्वामिन्नेकपदेऽपि माम् ।
तथा मिथ्यादृशां वाचामधर्मं जिनभाषितम् ॥२३॥
इत्युक्त्वा मूर्च्छिताभूमौ पतितोत्थाय चाभ्यधात् ।
मया विना कथं रामो जीविष्यति हतास्मि हा ॥२४॥
रामाय स्वस्त्यथाशंसे राशिषं लक्ष्मणस्य च ।
शिवास्ते सन्तु पन्थानो वत्स गच्छापरावम् ॥२५॥

एवम्विधेपि दयिते विपरीतहत्तौ
येवं विभात्तदियमेव सतीषु धुर्य्या ।
सञ्चिन्तयन्निति भृशं प्रणिपत्यमुक्त्वा
सीतां कृतान्तवदनो ववले कथञ्चित् ॥२६॥

इत्याचार्य्य श्रीहेमचन्द्रविरचिते सीतापरित्यागो नामाष्टमः सर्गः ॥८॥

अथ सीता भयोद्भ्रान्ता बभ्रामेतस्ततो वने ।
आत्मानमेव निन्दन्ती पूर्व्वदुष्कर्मदूषितम् ॥१॥
भूयो भूयश्च रुदती स्खलन्ती च पदे पदे ।
गच्छन्ती पुरतो पश्यन्महत्सैन्यं समापतत् ॥२॥
मृत्युजीवितयोस्तुल्याशया प्रेक्ष्यापि तद्बलम् ।
सीता तस्थावभीतैव नमस्कारपरायणा ॥३॥
तां दृष्ट्वा विभराञ्चक्रुः सैनिकाः प्रत्युतापिते ।
कानाम दिव्यरूपेयं भूस्थितेत्यभिभाषिणः ॥४॥
सीताया रुदितं श्रुत्वा स्वरञ्चित्तं चमूनृपः ।
इयं महासती कापि गुर्व्विणीवेत्यवोचत ॥५॥
कृपालुः स महीपाल उपसीतं जगाम च ।
सीताप्याशङ्किता तस्य स्वं नेपथ्यमढौकयत् ॥६॥

राजाप्येवमभाषिष्ट माभैषीस्त्वं मनागपि।
तवैव भूषणान्येतान्यङ्के तिष्ठन्तु हे प्रसूः सुते ॥७॥
का त्वं कस्त्वामिहात्याक्षी निर्दयेभ्योपि निर्दयः।
आख्याहि मास्म शङ्किष्ठा त्वत्कष्टेनास्मि कष्टितः॥८॥
तन्मन्त्री सुमतिर्नाम सीतामेत्याब्रवीदिति।
गजवाहनराजस्य बन्धुदेव्याश्च नन्दनः॥९॥
नृपतिर्वज्रजङ्घोयं पुण्डरीकपुरेश्वरः।
महार्हतो महासत्वः परनारीसहोदरः॥१०॥
गजान् गृहीतुमभ्येत्य कृतार्थीभूय च व्रजन्।
त्वद्दुःखाद्दुःखितोऽत्रागाद्दुःखमाख्याहि तन्निजम्॥
विश्वस्य सीताप्याचख्यौ स्ववृत्तान्तमशेषतः।
रुदती रोदन्तौ तौ कृपालू राजमन्त्रिणौ॥१२॥
निर्व्याजो व्याजहारैवं राजा धर्मस्वसासि मे।
एकं धर्मं प्रपन्नाहि सर्वेस्युर्बान्धवा मिथः॥१३॥
मम भामण्डलस्येव भ्रातुरेहि तदोकसि।
स्त्रीणां प्रतिगृहादन्यत् स्थानं भ्रातृनिकेतनम्॥१४॥
रामोपि लोकवादेन त्वामत्याक्षीन्न तु स्वयम्।
पश्चात्तापेन सोऽपराद्य मन्येत्वमिव कष्टभाक्॥१५॥
गवेषयिष्यत्यचिरात्त्वां सोपि विरहातुरः।
चक्रवाकी इवैकाकी ताम्यन्दशरथात्मजः॥१६॥

इत्युक्त्वा निर्भिकारेण तेनाभ्येत्याभिधायिनी ।
सीता करोद्धृतिं शिविकां सद्यस्तदुपनायिताम् ॥१७॥
पुण्डरीकपुरं त्वागान्मिथिलामपरामिव ।
अहर्निशं धर्मशीला चास्थात्तदर्शिते गृहे ॥१८॥
इतश्च रामसेनानी गत्वा रामाय सोऽवदत् ।
वने सिंहनिनादाख्ये त्यक्तवानस्मि जानकीम् ॥१९॥
मुहुर्मुहुः सा मूर्च्छित्वा चेतित्वा च मुहुर्मुहुः ।
कथञ्चिद्धैर्य्यमालम्ब्य वाचिकञ्चैव मादिशत् ॥२०॥
नीतिशास्त्रे स्मृतौ देशे कस्मिन्नाचार ईदृशः ।
एकपक्षोक्तदोषेण पक्षस्यान्यस्य शिक्षणम् ॥२१॥
सदा विमृश्य कर्त्तुस्ते ह्यविमृश्य विधायिता ।
मन्ये मद्भाग्यदोषेण निर्दोषस्त्वं सदाप्यसि ॥२२॥
खलोक्त्याहं यथा त्यक्ता निर्दोषापि त्वया प्रभोः ।
तथा मिथ्यादृशां वाचा मात्याक्षीर्द्धर्ममार्हतम् ॥२३॥
इत्युक्त्वा मूर्च्छिता सीता पतितोत्थाय चाब्रवीत् ।
मया विना कथं रामो जीविष्यति हतास्मि हा ॥२४॥
इत्याकर्ण्य वचो रामः पपात भुवि मूर्च्छया ।
संभ्रमाल्लक्ष्मणेनेत्य सिषेचे चन्दनाम्भसा ॥२५॥
उत्थाय विललापैवं क्व सा सीता महासती ।
सदा खलानां लोकानां वचसाहि मयोज्झिता ॥२६॥

अथोचे लक्ष्मणः स्वामिं स्तस्मिन्नद्यापि सा वने ।
महासती स्वप्रभावत्राता नूनं भविष्यति ॥२७॥
गत्वा गवेषयित्वा च स्वयमानीयतां प्रभोः ।
सीता देवी त्वद्विरहान्नहि यावद्विपद्यते ॥२८॥
श्रुत्वैवं सहतेनैव सेनान्या खेचरैश्च तैः ।
रामोऽगाद्व्योमयानेन तत्रारण्येऽतिदारुणे ॥२९॥
प्रतिस्थलं प्रतिजलं प्रतिशैलं प्रतिद्रुमम् ।
रामो गवेषयामास ददर्श नतु जानकीम् ॥३०॥
मन्ये व्याघ्रेण सिंहेन श्वापदेनाऽपरेण वा ।
सीता जग्धातिसुचिरं दध्यौ रामोऽतिदुःखितः ॥३१॥
सीता प्राप्तौ विमुक्ताशो निवृत्तत्र स्वपुरीं ययौ ।
पौरैः सीतागुणग्राहं निन्द्यमानो मुहुर्मुहुः ॥३२॥
प्रेतकार्य्यञ्च सीतायाः पद्मोऽकार्षीद्दुदश्रुदृक् ।
पश्यन् सीतामयमिव सर्वं शून्यमिवाद्यवा ॥३३॥
सैका हृदि दृशोरग्रे तस्थौ रामस्य वाचि च ।
क्वापि तिष्ठति सीतेति तथापि न विवेद सः ॥३४॥
इतश्च तत्र वैदेही सुषुवे युग्मिनौ सुतौ ।
नामतोऽनङ्गलवणं मदनाङ्कुशमप्यथ ॥३५॥
वज्रजङ्घस्तयोश्चक्रे जन्मनाम महोत्सवौ ।
स्वपुत्रलाभादधिकं मोदमानो महामनाः ॥३६॥

धात्रीजनैर्लाल्यमानौ लीलादुर्ललिताबुभौ ।
क्रमेण वृद्धिमाते तावश्विनाविव भूचरौ ॥३७॥
कलाग्रहणयोग्यौ तावजायेतां महाभुजौ ।
कलभाविव शिक्षार्हौ नरेन्द्रनयनोत्सवौ ॥३८॥
तदा च नाम्ना सिद्धार्थोऽणुव्रती सिद्धपुत्रकः ।
विद्याबलर्द्धिः सम्पन्नः कलागमविचक्षणः ॥३९॥
त्रिसन्ध्यमपि मेर्वद्रौ चैत्ययात्रासु चंक्रमैः ।
आकाशगामी भिक्षार्थं वैदेहीगृहमाययौ ॥४०॥
वैदेह्या भक्तपानाद्यैः श्रद्धया स च भोजितः ।
तथा सुखविहारञ्च तया पृष्ट स्तदावदत् ॥४१॥
तेनापि पृष्टा वैदेही सुतजन्मावधि स्वकम् ।
मूलादृत्तान्तमाचख्यौ तस्य भ्रातुरिवाग्रहः ॥४२॥
उचेऽष्टाङ्गनिमित्तज्ञः सिद्धार्थः करुणानिधिः ।
किं ताम्यसि मुधा यस्याः स्तनयौ लवणाङ्कुशौ ॥४३॥
प्रशस्तलक्षणैः साक्षादिव तौ रामलक्ष्मणौ ।
मनोरथंच तव सुतौ न चिरात्पूरयिष्यतः ॥४४॥
तेनेत्याश्वासिता सीता तमभ्यर्थ्य कृताग्रहा ।
स्वगृहे धारयामास पुत्राध्यपनहेतवे ॥४५॥
स भव्याविति तत्पुत्रौ सर्वा अग्राहयत्कलाः ।
तथा यथा ताबभूतां दुर्जयौ द्युसदामपि ॥४६॥

तावधीताखिलकलौ प्रपेदाते च यौवनम् ।
नूतनाविव कन्दर्पं वसन्तौ सहचारिणौ ॥४७॥
वज्रजङ्घः शशिचूलां पुत्रीं लक्ष्मीवतीभवाम् ।
कन्या द्वात्रिंशतञ्चान्या लवणेनोदवाहयत् ॥४८॥
सोऽङ्कुशायायाचिष्ट पृथ्वीपुरपतेः पृथोः ।
कन्यकाममृतवतीं जातां कनकमालिकाम् ॥४९॥
वंशो न ज्ञायते यस्य तस्मै स्वदुहिता कथम् ।
दीयतामित्यभाषिष्ट पृथुः पृथुपराक्रमः ॥५०॥
वज्रजङ्घस्तदाकर्ण्य तं क्रोधादभ्यषेणयत् ।
पृथुगृह्यं व्याघ्ररथं युद्धे बध्वाऽग्रहीन्नृपम् ॥५१॥
स्वमित्रं पोतनपतिं साहाय्यायाह्वयत्पृथुः ।
विधुरेषु हि मित्राणि स्मरणीयानि मन्त्रवत् ॥५२॥
वज्रजङ्घोऽपि पुत्रान् स्वान्नरैरानाययद्युधे ।
तैर्वार्य्यमाणावपि तौ चेयतुर्लवणाङ्कुशौ ॥५३॥
अन्येद्युर्ववृते युद्धं चम्वोर्मिलितयोर्द्वयोः ।
परैरितिबलैर्वज्रजङ्घसैन्यं त्वभज्यत ॥५४॥
संक्रुद्धौ मातुलचमूभङ्गेन लवणाङ्कुशौ ।
निरङ्कुशाविव गजौ प्रणिघ्नन्तावधावताम् ॥५५॥
तयो राजस्विनोरंहो मनागपि न सेहिरे ।
द्विपन्तः प्रावृडुत्पूरस्रोतसोरंघ्रिपा इव ॥५६॥

अभज्यत ससैन्योपि पृथ्वीवन्नरेश्वरः ।
ऊचतु स्तावदेवन्तौ स्मेराखौ रामनन्दनौ ॥५७॥
अपरिज्ञात वंशाभ्या मप्यावाभ्यां महाहवे ।
विज्ञात वंशा यूयं च पलायध्वे कथं त्वहो ॥५८॥
इति तद्वचनं श्रुत्वा नृपतिः पृथुरब्रवीत् ।
व्यज्ञायि वंशो युष्माकं विक्रमेणामुना मया ॥५९॥
अंकुशायार्थिता कन्या वज्रजङ्घेन भूभुजा ।
नूनं मम हितेनैव वरो हीदृक् क्वलभ्यते ॥६०॥
इति सानुनयं प्रोच्य सोऽंकुशाय तदैवहि ।
कन्यां कनकमालाख्यां प्रददौ पूर्व्वयाचिताम् ॥६१॥
सन्धानं वज्रजङ्घेन समक्षं सर्व्वभूभुजाम् ।
चक्रे पृथुनृपः पुत्र्याः स्पृहयन्नंकुशं वरम् ॥६२॥
तत्रास्थाच्छिबिरं न्यस्य वज्रजङ्घनरेश्वरः ।
अगाच्च नारदमुनिः सच्चक्रे तेन चोच्चकैः ॥६३॥
वज्रजङ्घो निषण्णेषु राजसूवाच नारदम् ।
अंकुशाय पृथुर्दास्यत्यसौ कन्यां निजां मुने ॥६४॥
लवणांकुशयोर्वंशम स्मात्सम्बन्धिनोस्य तत् ।
आख्याहि ज्ञातयामातृवंशो येनैष तुष्यति ॥६५॥
अथोचे नारदः स्मित्वा वंशङ्को वेत्ति नानयोः ।
यस्योत्पत्त्यादिकमदः स भगवानृषभध्वजः ॥६६॥

चक्रिणोर्ह्यनयोर्वंशे भरताद्याः कथाः श्रुताः ।
को न वेत्त्यनयो स्तातौ प्रत्यक्षौ रामलक्ष्मणौ ॥६७॥
गर्भस्थयो र्ह्यनयो र्योध्यालोकजन्मनः ।
अपवादाञ्च च कितेन त्यक्ता रामेण जानकी ॥६८॥
अथांकुशो हसित्वोचे ब्रह्मन्नखलु साधु तत् ।
चक्रे रामेण वैदेहीं त्यजता दारुणे वने ॥६९॥
भूयांसि ह्यपवादस्य कारणानि निराकृतौ ।
भवन्ति तत्र किन्त्वेवं विद्वानपि चकार सः ॥७०॥
पप्रच्छ लवणोऽथैवं दूरे कियति सा पुरी ।
यस्यां वसति मे तातः सानुजः सपरिच्छदः ॥७१॥
मुनिस्त्वोचे तव पिता यस्यां विश्वैकनिर्मलः ।
साऽयोध्या पूरितः षष्ठियुग्योजनशतं खलु ॥७२॥
वज्रजङ्घमथोवाच लवणः प्रश्रयं श्रयन् ।
इच्छावस्तत्र गत्वा वां प्रेक्षितुं रामलक्ष्मणौ ॥७३॥
प्रतिपद्य स गत्वा च अंकुशं पर्य्यणाय यत् ।
महोत्सवेन पृथुराट् पुत्र्या कनकमालया ॥७४॥
वज्रजङ्घपृथुभ्यां तावन्वितौ लवणाङ्कुशौ ।
साधयन्तौ बहून्देशान् लोकाक्षर पुरमीयतुः ॥७५॥
युद्धभूमौ च तद्भूपं धैर्य्यशौण्डीर्य्य शालिनम् ।
कुबेरकान्तनामानं मानिनं तत्र जिग्यतुः ॥७६॥

लम्पाकेष्वेककर्णाख्यं विजिग्याते नृपञ्च तौ।
ततश्च विजयस्थल्यां भूपं श्वाटशताभिधम् ॥७७॥
गङ्गामुत्तीर्य्य कैलाशस्योत्तरां दिशमीयतुः।
तत्र नन्दनचारूणां देशानाञ्चक्रतुर्जयम् ॥७८॥
ऋषकुन्तलकाम्बुनन्दिनन्दनसिंहलान्।
शलभाननलान्शूलान्भीमान्भूतरवादिकान् ॥७९॥
तौ जयन्तौ नृपान् सिन्धोः परकूलमुपेयतुः।
तत्र चार्य्याननार्य्यांश्च साधयामासतुर्नृपान् ॥८०॥
बङ्गदेशेश्वरानेवं साधयित्वा सहैव तैः।
निवृत्योपेयतुस्तौ तत्पुण्डरीकपुरं पुरम् ॥८१॥
अहो धन्यो वज्रजङ्घो यदीयौ यामिनन्दनौ।
ईदृशाविति जल्पद्भिर्वीक्ष्यमाणौ पुरीजनैः ॥८२॥
जग्मतुः स्वगृहं वीरौ भूपवीरैः समावृतौ।
प्रणेमतुश्च जनन्याश्चरणौ विश्वपावनौ ॥८३॥
चुचुम्ब मूर्ध्नि तौ सीता स्नपयन्ती मुदश्रुभिः।
रामलक्ष्मणयोस्तुल्यौ भूयास्तमिति चाऽवदत् ॥८४॥
उचतुर्वज्रजङ्घन्तौ मातुल प्राक्त्वयाऽवयोः।
मेने यानमयोध्यायामिदानीमनुतिष्ठ तत् ॥८५॥
आज्ञाप्यन्ताञ्च लम्पाकरुपाकालाम्बुकुन्तलाः।
शतभाचूऽनलाद्याश्चापरेऽपि महीभुजः ॥८६॥

प्रयाणभंभा वाद्यन्तां च्छादन्तांच दिशो बलैः।
त्यक्ता येनावयोर्माता वीच्य स्तस्याऽद्य विक्रमः॥८७॥
सीतापि सद्यो रुदती जगादेदं सगद्गदम्।
वत्सौ केयमनर्थेच्छा युवयोः कर्मणाऽधुमुना॥८८॥
वीरौ पितृपितृव्यौ वां दुर्ज्जयौ द्युसदामपि।
यकाभ्यां निहतो रचः पतिस्त्रैलोक्यकण्टकः॥८९॥
उत्कण्ठा पितरं द्रष्टुं युवयो र्यदि बालकौ।
त्रिनीती भूय तद्यातं पूज्येहि विनयोऽर्हति॥९०॥
ततस्तावेवमूचाते विनयः क्रियते कथम्।
तस्मिन् द्विषत्पदप्राप्ते त्वत्त्याजिनि पितर्यपि॥९१॥
पुत्त्रौ तवावामायाताविति तस्य पुरः कथम्।
गत्वा स्वयं वदिष्याव स्तस्यापि ह्रीकरं वचः॥९२॥
आनन्दजनकं तस्य जनकस्यापि दोष्मतः।
युद्धाह्वानं युद्धरते तु कुलद्वययशस्करम्॥९३॥
अभिधायेति सीतायां रुदन्त्यामपि चेलतुः।
महोत्साहौ महासैन्यौ तौ रामनगरीं प्रति॥९४॥
कुठारकुद्दालभृतां सहस्राणि नृणां दश।
तयोःपथ्यच्छिदन् इत्यादिकं च्माञ्च समां व्यधुः॥९५॥
क्रमेण गत्वा सेनाभी रुन्धानौ सर्व्वतो दिशः।
तावूषतुरुपायोध्यां योधुकामौ महाभुजौ॥९६॥

विरुद्धं तद्बलं भूरि श्रुत्वायातं पुरोबहिः ।
उभौ विसिष्मियाते च सिष्मियाते च राघवौ ॥९७॥
अथेत्यमूचे सौमित्रिः परे केऽमी पतङ्गवत् ।
मर्त्तुकामाः समापेतु रार्य्यविक्रमपावकम् ॥९८॥
इत्युक्त्वा सह रामेण सुग्रीवादिभिरावृतः ।
युद्धे चचाल सौमित्रि रमितध्वान्तभास्करः ॥९९॥
इतश्च नारदाच्छ्रुत्वा तद्भामण्डलभूपतिः ।
पुण्डरीकपुरे सीता मुपेयाय ससंभ्रमः ॥१००॥
तस्याख्यद्रुदती सीता रामो मां भ्रातरत्यज्यत् ।
मत्त्रागमसहिष्णू च त्वद्यामेयौ युधे गतौ ॥१॥
भामण्डलोप्युवाचैवं त्वत्त्रागं रभसा वधात् ।
चक्रे रामो द्वितीयन्तु माकार्षीत्तुत्रयोर्वधम्॥२॥
आत्मजौ तावजानानां नयावद्धन्ति राघवः ।
उत्तिष्ठ तावद्गच्छाव स्तत्रावामविलम्बितम् ॥३॥
इत्युक्त्वा जानकीमात्मविमानमधिरोप्य च ।
लवणांकुशयोः स्कन्धावारे भामण्डलो ययौ ॥४॥
तौ नमश्चक्रतुः सीतां कुमारौ लवणांकुशौ ।
मातुलोयमिति सीता ख्यातं भामण्डलं तथा ॥५॥
स तौ शिरसि चुम्बित्वा स्वोत्सङ्गमधिरोप्य च ।
हर्षरोमाञ्चितवपुरित्यूचे गद्गदाक्षरम् ॥६॥

वीरपत्नी पुराप्यासीद् दिष्ट्या सम्प्रति वीरसूः ।
अभूद्युवाभ्यां मे यामि र्यामिनी जानिनिर्म्मला ॥७॥
वीरपुत्रौ च वीरौ च युवां यद्यपि मानदौ ।
रणं पितृपितृव्याभ्यामाक्षयाथां तथापि हि ॥८॥
न रणे रावणोप्यासीद्ययोर्मल्ल स्तयोः कथम् ।
युद्धं युवाभ्या मारेभे दोः कण्डूरभसावशात् ॥९॥
तावूचतु र्मातुलाऽलं स्नेहभीरुतया तया ।
त्वत्स्वसा पप्रस्सुदम्बेय मूचेदः कातरं वचः ॥१०॥
आवामपि हि विद्वो यन्नमल्लः कोपिति तयोः ।
युद्धं त्यक्त्वा तयोरेवोत्पादयाव्रः कथं ह्रियम् ॥११॥
तयोर्भुवाणयोरेव सैन्यानां रामसैनिकैः ।
समं प्रववृते युद्धं सम्वर्त्तावर्त्तदर्शकम् ॥१२॥
सुग्रीवाद्यैः खेचरैर्मा नयोः सैन्यं महीचरम् ।
हन्यतामिति साशङ्को ययौ भामण्डलो युधि ॥१३॥
उत्तस्थाते कुमारावप्याहवाय महाबलौ ।
उच्छ्वास्यमानवर्माणौ रोमाञ्चेनातिशायिना ॥१४॥
निःशङ्कं युध्यमानास्ते सुग्रीवाद्या नभश्चराः ।
युधि भामण्डलं दृष्ट्वा पप्रच्छुः काविमाविति ॥१५॥
भामण्डलाश्च ते ज्ञात्वा रामपुत्राविमाविति ।
गत्वा सीतां नमस्कृत्य निषदंश्च पुरो भुवि ॥१६॥

इतश्च तौ चणेनापि दोष्मन्तौ लवणांकुशौ ।
रामसैन्यं दुधुवतुः चयोद्भ्रान्ताब्धिदुर्द्धरौ ॥१७॥
यत्र यत्र भ्रेमतुस्तौ वने सिंहाविवोद्धतौ ।
रथी सादी निषादी वा न तत्रास्थादधृतायुधः ॥१८॥
इतं विद्रुतमेवञ्च रामसैन्यं विधाय तौ ।
केनाप्यस्खलितौ रामं सौमित्रिं चेयतु र्युधि ॥१९॥
तौ प्रेक्ष्य रामसौमित्री एवमन्योन्य मूचतुः ।
कावप्येतावभिरामौ कुमारौ विद्विषौ च नः ॥२०॥
निसर्गात् स्निह्यति मनो बलाद्दह्यति किन्त्विदम् ।
उद्यच्छावः किमास्नेष्टु मेतौ योधयितुं नवा ॥२१॥
इति व्याहारिणं रामं रथस्थं लवणो रथी ।
लक्ष्मणञ्चाङ्कुशोऽवोचत् सौष्टवप्रश्रयान्वितम् ॥२२॥
जैत्रं जगदजय्यस्य रावणस्यापि दोष्मतः ।
दिष्ट्याऽद्राच्वं वीरयुद्धश्रद्धालु स्त्वामहञ्चिरात् ॥२३॥
नापूर्य्यत रणश्रद्धा रावणेनापि ते ध्रुवम् ।
एष तां पूरयिष्यामि त्वञ्च मे पूरयिष्यसि ॥२४॥
इत्युक्तौ रामसौमित्री द्वौ तौ च लवणांकुशौ ।
आस्फालयामासतुः स्वं स्वं धनुर्ध्यानभीषणम् ॥२५॥
कृतान्तसारथी रामस्यन्दनं वज्रजङ्घराट् ।
अनङ्गलवणरथ मभ्यढौकयतां मिथः ॥२६॥

रथं विराधः सौमित्रेरङ्कुशस्य पुनः पृथुः ।
अन्योन्यमभ्यमित्रीणं चक्राते वरसारथी ॥२७॥
चतुरं भ्रमयामासु स्तेऽग्रसारथयो रथान् ।
प्रजह्रुर्विविधन्तेच चत्वारो द्वन्द्वयोधिनः ॥२८॥
विज्ञातज्ञातिसम्बन्धौ सापेक्षौ लवणांकुशौ ।
युयुधाते निरपेक्षौ त्वऽज्ञानाद्रामलक्ष्मणौ ॥२९॥
विविधैरायुधैर्युद्ध्वा युद्धात्सेव्ऽ रघूद्वहः ।
ऊचे कृतान्तवदनं रथं प्रत्यरिं वाहय ॥३०॥
कृतान्तोपि बभाषेऽदः खेदं प्राप्ताव्यमी हयाः ।
सर्वाङ्गं विशिखैर्विद्धाः प्रतियोधेन तेऽमुना ॥३१॥
तुरङ्गा न त्वरन्तेमी कशाभि स्ताडिता अपि ।
रथश्च जर्ज्जरस्ते भूदसौ वैर्य्यस्त्वताडितः ॥३२॥
एतौ च मम दोर्दण्डौ छिद् काण्डाघातजर्जरौ ।
नहि रश्मिप्रतोदं वा क्षमौ चालयितुं प्रभो ॥३३॥
पद्मनाभोप्यभाषिष्ट ममापि शिथिलायते ।
धनुश्चित्रे स्थितमिव वज्रावर्त्तं न कार्य्यकृत् ॥३४॥
अभून् मुशलरत्नञ्च वैरिनिर्दलनाक्षमम् ।
कणकण्डनमलाहं मिवतदपि सम्प्रति ॥३५॥
अनेकशोऽङ्कुशीभूतं यद्दुष्टनृपदन्तिनाम् ।
हलरत्नं तदप्येतदभूद्भूपाटनोचितम् ॥३६॥

सदा यक्षैररक्षितानां विपक्षक्षयकारिणाम् ।
तेषामेव ममास्त्राणामवस्थाकेयमागता ॥३७॥
यथापराजितासूनो रभून्मोघास्त्रता तदा ।
तथैव लक्ष्मणस्यापि मदनांकुशयोधिनः ॥३८॥
अत्रान्तरे च सौमित्रि रङ्कुशेनोरसीषुणा ।
ताडितः कुलिशेनेव मूर्च्छितो न्यपतद्रथे ॥३९॥
सौमित्रिमूर्च्छाविधुरो विराधः स्यन्दनं रणात् ।
अचालयत्प्रत्ययोध्यां संज्ञां लेभेऽथ लक्ष्मणः ॥४०॥
साक्षेपं लक्ष्मणश्चोचे किं विराधाकृथानयम् ।
रामभ्रातुर्दशरथस्य सूनोरनुचितं ह्यदः ॥४१॥
तच्छीघ्रं नय तत्रैव रथं यत्र स मे द्विषन् ।
एष च्छिनद्मि तच्छीर्षं चक्रेणामोघरंहसा ॥४२॥
एवमुक्तो विराधोऽथा नैषीत्प्रत्यंकुशं रथम् ।
तिष्ठतिष्ठेति जल्पंस्च चक्रं जग्राह लक्ष्मणः ॥४३॥
भ्रमदर्कभ्रमकरं भ्रमयित्वा च तद्दिवि ।
क्रुद्धो मुमोच सौमित्रि रंकुशायास्खलद्रयम् ॥४४॥
आपतत्ताडयामासानेकशोऽस्त्रै स्तदङ्कुशः ।
सर्वात्मना लवणोपि न तु तत्प्रत्यहन्यत ॥४५॥
वेगेनापत्य तच्चक्रमंकुशाय प्रदक्षिणाम् ।
कृत्वा लक्ष्मणहस्तेऽगा त्पुनर्नीड इवाण्डजः ॥४६॥

तद्रूयो लक्ष्मणोऽमुञ्चत्कृत्वा तद्वत्प्रदक्षिणाम् ।
पुनस्तत्याशिमेवागा च्छालां मग्न इव द्विपः ॥४७॥
चिन्तयामासतुश्चैवं विषण्णौ रामलक्ष्मणौ ।
किं श्रीरिशार्ङ्गिणावेतौ नत्वा वामिह भारते॥४८॥
अत्रान्तरे नारदर्षिः सिद्धार्थेन सहैव हि ।
तत्रोपेत्यावोचदेवं खिन्नं रामं सलक्ष्मणम् ॥४६॥
हर्षस्थाने विषादोऽयं युवयोः किं रघूद्वहौ ।
पुत्रात्पराजयो वंशोद्य तनयेन न कस्य हि ॥५०॥
सीता कुक्षिभवौ पुत्रौ तवेमौ लवणांकुशौ ।
त्वान्द्रष्टुमागतावत्र युद्धव्याजेन न त्वरी ॥५१॥
अभिज्ञानमिदन्तेऽत्र यच्चक्रं प्रबभूव न ।
मुधाऽभूद्भारतं चक्रं पुराबाहुबलावपि ॥५२॥
त्यागात्प्रभृति सीताया वृत्तान्तं नारदोऽखिलम् ।
पुत्रयुद्धान्तमाचख्यौ विश्वविस्मयदायकम् ॥५३॥
रामोपि विस्मयव्रीडा खेदहर्षसमाकुलः ।
मुमूर्च्छ संज्ञां लेभे च संसिक्तश्चन्दनाम्भसा ॥५४॥
लक्ष्मणेन सहोदस्थुः पुत्रवात्सल्यपूरितः ।
जगाम रामो लवणां कुशयोर्द्रुतमन्तिके ॥५५॥
अवतीर्य्य रथात्सद्यो विनीतौ लवणांकुशौ ।
पादेषु पद्मसौमित्र्यो स्त्यक्तास्त्रौ पेततुः क्रमात् ॥५६॥

तावलिङ्ग्य निजोत्सङ्ग मारोप्य च रघूद्वहः ।
मूर्ध्नि चुम्बन् करोदोच्चैः शोकस्नेहसमाकुलः ॥५७॥
रामोत्सङ्गान्निजोत्सङ्गं तावारोप्याथ लक्ष्मणः ।
चुम्बन् शिरसि बाहुभ्यां परिरेभेश्रुपूर्णदृक् ॥५८॥
विलुठन्तौ पितुरिव विनीतौ पादपद्मयोः ।
दूरात्प्रसारितभुजः शत्रुघ्नोप्यालिलिङ्ग तौ ॥५९॥
अपरेपिहि भूपालाः सेनयोरुभयोरपि ।
प्रमोदन्तेस्म सम्भूय विवाहमिलिता इव ॥६०॥
पुत्रयो र्विक्रमं दृष्ट्वा पित्रा च सह सङ्गमम् ।
हृष्टा सीता विमानेन पुण्डरीकपुरीं ययौ ॥६१॥
सदृक्पुत्रलाभेन मुदितौ रामलक्ष्मणौ ।
जहृषुः स्वामिहर्षेण भूचराः खेचराश्च ते ॥६२॥
भामण्डलनृपाख्यातो वज्रजङ्घनृपोपि हि ।
ननाम रामसौमित्री विनीत श्चिरपत्तिवत् ॥६३॥
रामस्तमाललापैवं भामण्डल समोसि मे ।
पुत्रौ यो वर्द्धयंस्त्वं मेऽनैषीः काष्ठामिमां चयः ॥६४॥
इत्युक्त्वा पुष्पकारूढः पद्मनाभः सलक्ष्मणः ।
अर्द्धासनोपरिष्टाभ्यां पुत्राभ्यां प्राविशत्पुरीम् ॥६५॥
उद्ग्रीवपार्ष्णिभिः पौरै राजमार्गे च विस्मितैः ।
प्रेक्ष्यमाणः स्तूयमानस्सुतो रामोऽगमद्गृहे ॥६६॥

ततोत्ततार पुत्राभ्यां सह रामः सलक्ष्मणः ।
महान्तमत्यन्तमुदा कारयामास चोत्सवम् ॥६७॥
अथ रामं सुमित्राभू कपीश्वरविभीषणैः ।
हनूमानङ्गदाद्याश्च संभूयैवं व्यजिज्ञपन् ॥६८॥
परदेशे स्थिता देवी त्वया विरहिताऽधुना ।
विनाऽमूभ्यां कुमाराभ्या मतिकष्टेन तिष्ठति ॥६९॥
यद्यादिशसि ततस्वामि न्नानयामो द्य तामिह ।
विपत्स्यतेऽन्यथा सातु पतिपुत्रोभ्भिता सती ॥७०॥
किञ्चिद्रामोविचिन्त्यप्रोचे जानक्यानीयते कथम् ।
लोकापवादोऽलीकोपि बलवानन्तराय कृत् ॥७१॥
जानेहं यत्सती सीता सापि स्वं वेत्ति निर्मलम् ।
दिव्यं दातुमथादातुं तद्द्वयोरपि नास्ति भीः ॥७२॥
प्रत्यक्षं सर्व्वलोकानां दिव्यं भो स्तत्करोतु सा ।
शुद्धया च तया सार्द्धं गृहवासोऽस्ति मे पुनः ॥७३॥
एवमस्त्वित्युदित्वा ते पुर्य्या बहिरकारयन् ।
विशालान्मण्डपानुच्चै स्तदन्तर्मञ्चधोरणी ॥७४॥
तेषु चोपाविशन् भूपाः पौराऽमात्यादयोपि च ।
ते विभीषणसुग्रीवप्रमुखाः खेचरा अपि ॥७५॥
ततो रामाज्ञयोत्थाय पुण्डरीकपुरे स्वयम् ।
गत्वा नत्वा च वैदेही मित्युवाच कपीश्वरः ॥७६॥

त्वत्कृते प्रेषि रामेण विमानं देवि पुष्पकम् ।
इदानीमिदमध्यास्व रामोपान्तमुपेहि च ॥७७॥
साप्यूचेऽद्यापि मेऽरण्य त्यागदुःखं न शाम्यति ।
ततः कथं यामि रामं भूयो दुःखान्तरप्रदम् ॥७८॥
नत्वा भूयोऽपि सोऽवोचन् माकुप स्तव शुद्धये ।
समं पौरैः नृपैः सर्व्वैः मञ्चारूढोऽस्ति राघवः ॥७९॥
तेनेत्युक्ते पूर्व्वमपि जानकी शुद्धिकाङ्क्षिणी ।
आरुरोह विमानं तदयोध्यायां जगाम च ॥८०॥
माहेन्द्रोदयमुद्यानं समुपेत्योत्ततार सा ।
दत्तार्घा लक्ष्मणेनैत्य नमश्चक्रे नृपैरपि ॥८१॥
अग्रे निषिद्य सौमित्रि नृपैः सममदोऽवदत् ।
निजां पुरीं निजं वेश्म प्रवेशाद्द् वि पावय ॥८२॥
सीताप्यूचे प्राप्तशुद्धिः प्रवेक्ष्यामि पुरीमिमाम् ;
गृहञ्च नान्यथा वत्साऽपवादो जातु शाम्यति ॥८३॥
इति सीता प्रतिज्ञान्ते शंसन् रामाय भूभुजः ।
रामोप्यपेत्य वैदेही मित्यूचे न्यायनिष्ठुरम् ॥८४॥
भोगा नचेह्शाप्येन तस्युष्या अपि तद्गृहे ।
समक्षं सर्व्वलोकानां तद्दिव्यं कुरु शुद्धये ॥८५॥
स्मिता सीताप्युवाचैवं विज्ञस्त्वत्तोऽपरो नहि ।
अज्ञात्वा योहि मे दुःखं त्यागं कुर्य्या महावने ॥८६॥

दृश्यमादौ विधायाद्य कुरुषे मत्परीक्षणम् ।
विचक्षणोसि काकुत्स्थ सज्ज्ञा तत्रापि नन्वहम् ॥८७॥
उचे विलक्षो रामोपि जाने दोषस्तवास्ति न ।
जनोत्पादितदोषस्योत्तारणायेदमुच्यते ॥८८॥
जगाद जानकी दिव्यमञ्चकं स्वीकृतं मया ।
विशामि वह्नौ ज्वलिते भक्षयाम्यथ तन्दुलान् ॥८९॥
तुलां समधिरोहामि तप्तं कोशं पिवाम्यथ ।
गृह्णामि जिह्वया फालं किन्तुभ्यं रोचते वद ॥९०॥
अत्रान्तरेऽन्तरिक्षस्थः सिद्धार्थो नारदोप्यहः ।
लोकः सर्व्वश्च तुमुलं निषिध्येदमभाषत ॥९१॥
भो भो राघव सीतेयं निश्चयेन सती सती ।
महासतीति माकार्षीर्विकल्पमिह जातुचित् ॥९२॥
रामोप्युवाच हे लोका मर्य्यादा कापि नास्ति वः ।
सङ्कल्प्यदोषं युष्माभिरेवेयं दूषिता पुरा ॥९३॥
ब्रूथान्यत्पुरतो यूयमन्यद्दूरे स्थिता पुनः ।
तदा कथं सदोषासीच्छीलवत्यधुना कथम् ॥९४॥
भूयोपि गृह्णतां दोषमर्गला नास्ति कापि वः ।
प्रत्ययाय ततः सीता विशतु ज्वालितेऽनले ॥९५॥
इत्युक्त्वाऽखानयद्रामो गर्त्तं हस्तशतत्रयम् ।
पुरुषद्वयदम्नञ्चा पूरयच्चन्दनेन्धनैः ॥९६॥

अत्रान्तरे च वैताढ्यस्योत्तरश्रेणि वर्त्तिनः।
हरिविक्रमराजस्य कुमारो जयभूषणः ॥९७॥
ऊढाऽष्टशतनारीकः पत्नीं किरणमण्डलाम्।
सुप्तां हेमसुखाख्येन समं मातुल सूनुना ॥९८॥
दृष्ट्वा निर्वासयामास तदैव प्राव्रजत् स्वयम्।
सापि मृत्वा समजनि विद्युद्दंष्ट्रेति राक्षसी ॥९९॥
अयोध्या बहिरभ्येत्य स तदा जयभूषणः।
तस्थौ प्रतिमया विद्युद्दंष्ट्रा च तमुपाद्रवत् ॥१००॥
केवलं तस्य चोत्पेदे तदुत्सव विवित्सया।
तदानीमेव समाजग्मुः सुनासीरादयः सुराः ॥१॥
सीतायाः प्रेक्ष्य तद्देवाः शक्रमेवं व्यजिज्ञपन्।
लोकाऽलीकापवादेन सीता वह्नौ प्रवेक्ष्यति ॥२॥
पत्यनीकपतिं सीतासान्निध्यायादिशद्धरिः।
तस्यर्षेः केवलज्ञानोत्सवं तु विदधे स्वयम् ॥३॥
रामाज्ञयाथ भृतका स्तं गर्त्तं चन्दनाञ्चितम्।
परितो ज्वालयामासु र्दुःप्रेक्ष्यञ्चक्षुषामपि ॥४॥
ज्वालाकरालन्तं प्रेक्ष्य रामोदध्याविदं हृदि।
अहो अत्यन्त विषमं ममेदं किमुपस्थितम् ॥५॥
इयं महासती नूनं निःशङ्काऽग्नौ प्रवेक्ष्यति।
दैवस्येव हि दिव्यस्य प्रायेण विषमा गतिः ॥६॥

मया सहास्या निर्वासे हरणे रावणेन च ।
वने त्यागो मया भूयो भूयोप्येतच्च मत्कृतम् ॥७॥
एवं सोचिन्तयद्यावत्तावत्सीतोपपावकम् ।
स्थित्वा स्मृत्वा सर्वज्ञं चक्रे सत्यापनामिति ॥८॥
हे लोकपाला लोकाश्च सर्वे शृणुत यद्यहम् ।
अन्यमभ्यलषं रामा त्तदाग्निर्मान्दहत्वयम् ॥९॥
अन्यथा तु सुखस्पर्शी वारीवास्त्वित्युदीर्य्य सा ।
झंपां स्मृतनमस्कारा ददौ तस्मिन् हुताशने ॥१०॥
यावत्सा प्रविशत्तावद्विद्यातो वह्निराश्वपि ।
गर्त्तः स्वच्छोदकापूर्णः स तु वापीत्वमाययौ ॥११॥
सीता त्वधिजलं पद्मोपरिसिंहासनस्थिता ।
पद्मे वास्थात् सतीभावा त्तुष्टदेवप्रभावतः ॥१२॥
कुर्वाणं क्वापि झङ्कारं क्वचिद्गुलुगुलारवम् ।
क्वापि भम्भायितध्वानं क्वचित्पटपटाध्वनिम् ॥१३॥
क्वचिद् दिलिदिलिस्वानं क्वचित् खलखलास्वनम् ।
समुद्राम्भ इवाम्भ स्तत्तत्र सावर्त्तमैच्यत ॥१४॥यु०॥
तदुच्छलज्जलं वाप्या उद्वेलस्येव वारिधेः ।
आस्लावयितु मारेभे मञ्चानपि गरीयसः ॥१५॥
विद्याधरा भयोद्भ्रान्ताः समुत्पत्येयुरम्बरे ।
भूचराश्चुक्रुशुश्चैवं पाहि सीते महासती ॥१६॥

सीताप्युत्क्षोलमभ्यस्तत् स्वपाणिभ्यामवालयत् ।
पुनर्वापी प्रमाणं तद् भूत्तस्याः प्रसादतः ॥१७॥
उत्पलैः कुमुदैः पद्मैः पुण्डरीकैर्निरन्तरा ।
सौरभोद्भ्रान्तभृङ्गाली सङ्गीता हंसशालिनी ॥१८॥
आस्फालद्वीचिनिचय मणिसोपानबन्धुरा ।
बद्धोभयतटा रत्नोत्पलैर्वापी बभूव सा ॥१९॥ यु०॥
ननृतु नीरदाद्याः खे सीता शीलप्रशंसिनः ।
सीतोपरिष्टात् तुष्टाश्च पुष्पवृष्टिं व्यधुः सुराः ॥२०॥
अहो शीलमहो शीलं रामपत्न्या यशस्करम् ।
इति लोकप्रघोषोऽभूद्रोदःकुक्षिम्भरिः क्षणात् ॥२१॥
मातुः प्रभावन्तं दृष्ट्वा मुदितौ लवणांकुशौ ।
हंसाविव तरन्तौ तत्समीपं समुपाययुः ॥२२॥
तौ मूर्ध्न्याघ्राय वैदेह्या पार्श्वयो रुपवेशतौ ।
कलभाविव रेजाते नदीतीरद्वयस्थितौ ॥२३॥
गत्वा सौमित्रिशत्रुघ्न भामण्डलविभीषणाः ।
सुग्रीवाद्याश्च वैदेहीं नमश्चक्रुः सभक्तयः ॥२४॥
सीतामुपाययौ रामोप्यभिरामतरद्युतिः ।
पश्चात्तापत्रपा पूर्णा इत्यूचे रचिताञ्जलिः ॥२५॥
स्वभावादप्यसद्दोषग्राहिणां पुरवासिनाम् ।
छन्दानुवृत्तत्या त्यक्तासि मया देवि सहस्व तत् ॥२६॥

त्यक्तोग्रश्वापदेऽरण्ये जीवस्त्वं स्वप्रभावतः ।
एकं दिव्यं तदप्यासी न्नाग्नासिष मद्धं पुनः ॥२७॥
ज्ञात्वा सर्व्वं ममेदानी मिदमध्यास्व पुष्पकम् ।
चलस्व वेश्मनि प्रागेव द्रमस्व सहिता मया ॥२८॥
सीताप्यूचे नते दोषो न च लोकस्य कश्चन ।
नचान्यस्यापि कस्यापि किन्तु मत्पूर्व्वकर्म्मणाम् ॥२९॥
निर्विन्ना कर्मणामीदृक् दुःखावर्त्तप्रदायिनाम् ।
ग्रहीष्यामि परिव्रज्यां तेषामुच्छेदकारिणीम् ॥३०॥
इत्युक्का मैथिली केशानुच्चखान स्वमुष्टिना ।
रामस्य चार्प्पयामास शक्रस्येव जिनेश्वरः ॥३१॥
सद्यो मुमूर्च्छ काकुत्स्थो नोत्तस्थौ यावदेषु च ।
तावत्सीता ययौ साधु जयभूषणसन्निधौ ॥३२॥
केवली स जयभूषणो मुनि
मैंथिलीं विधिवदप्यदीक्षयत् ।
सुप्राभाख्यगणिनीपरिच्छदे
तां चकार च तपः परायणाम् ॥३३॥

इत्याचार्य्य श्रीहेमचन्द्रविरचिते सीताशुद्धि
व्रतग्रहणो नाम नवमः सर्गः ॥९॥

अथ सिक्तश्चन्दनेन लब्धसंज्ञो रघूद्वहः ।
व्याजहार क्व ननु सा सीतादेवी मनस्विनी ॥१॥
भो भूचराः खेचराश्च नचेद् यूयं मुमूर्षवः !
तन्मे लुञ्चितकेशामप्याशु दर्शयत प्रियाम् ॥२॥
वत्स वत्सेहि सौमित्रे तूर्णं तूणधनुर्द्धर ।
यदमी सन्त्युदासीनाः सुस्थिता दुःस्थिते मयि ॥३॥
इत्युक्त्वा धन्वगृह्णन्तं तं नत्वा लक्ष्मणोऽब्रवीत् ।
आर्य्यार्य्य किमिदं लोकः खल्वेष तव किङ्करः ॥४॥
सीतां यथा दोषभीतो ऽत्याक्षीस्त्वं न्यायनैष्ठिकः ।
भवभीता स्वार्थनिष्ठा तथा सा सर्वमत्यजत् ॥४॥
प्रत्यक्षमिह वः सीता स्वयमुत्पाद्य कुन्तलान् ।
आददे विधिवद्दीक्षां जयभूषणसन्निधौ ॥६॥
इदानीमेव तस्यर्षेः रुदपद्यत केवलम् ।
लज्जा न महिमावश्यं ह्यत्यद्भुतास्ति तत्रापि हि ॥७॥
तत्रास्ते स्वामिनी सीता स्वामिन्नात्तमहाव्रता ।
दर्शयन्ती मुक्तिमार्गं सतीमार्गमिवाऽनघा ॥८॥
रामः प्रकृतिमालम्ब्योवाच साधु मम प्रिया ।
उपाददे परिव्रज्यां तस्य केवलिनोऽन्तिके ॥९॥
इत्युक्त्वा सपरीवारो जगाम जयभूषणम् ।
नत्वा च देशनां तस्माच्छुश्राव रघुपुङ्गवः ॥१०॥

देशनान्ते च पप्रच्छ नात्मानं वेन्नग्रहं प्रभोः ।
भव्योऽहं किमुताभव्य स्तदाचक्ष्व प्रसीद मे ॥११॥
अथाख्यात्केवली सोऽपि भव्योसि त्वं न केवलम् ।
सिद्धिं यास्यस्यनेनैव जन्मनोत्पन्नकेवलः ॥१२॥
रामः पप्रच्छ भूयोपि मोक्ष्यं प्रव्रज्यया भवेत् ।
सर्व्वत्यागेन सा किन्तु लक्ष्मणो दुस्त्यजो मम ॥१३॥
मुनिराख्याद्वश्यन्ते भोक्तव्या वलसम्पदः ।
तदन्ते त्यक्तसङ्गः सन् प्रव्रज्य शिवमाप्स्यसि ॥१४॥
नत्वा विभीषणोऽपृच्छत्केन प्राग्जन्मकर्म्मणा ।
जहार रावणः सीतां लक्ष्मणस्तमहन् युधि ॥१५॥
सुग्रीवो भामण्डलश्च तथेमौ लवणांकुशौ ।
अहञ्च कर्मणा केनाऽत्यन्तरक्तो रघूद्वहे ॥१६॥
भगवानाचचक्षेऽथ भरतार्द्धे च दक्षिणे ।
पुरे क्षेमपुरे नाम्ना नयदत्तोऽभवद्वणिक् ॥१७॥
धनदत्त वसुदत्तौ सुनन्दा कुक्षिजौ सुतौ ।
तस्या भूतां तयोर्मित्रं याज्ञवल्क्योऽभवद्द्विजः ॥१८॥
नाम्ना सागरदत्तश्च पुरे तस्मिन्न भूद्वणिक् ।
तस्य सूनु गुणधरः कन्या गुणवती पुनः ॥१९॥
दत्ता सागरदत्तेन नयदत्तात्मजन्मने ।
धनदत्ताय गुणवत्यनुरूपगुणाय सा ॥२०॥

श्रीकान्तनाम्ने चाख्याय तत्रत्यायार्थ लोभतः ।
ददौ गुणवती कन्यं माता रत्नप्रभा पुनः ॥२१॥
याज्ञवल्क्यस्तु तज्ज्ञात्वा नयदत्तात्मजन्मनोः ।
स्वमित्रयोः समाचख्यावसद्धो मित्रवञ्चने ॥२२॥
वसुदत्त स्ततो गत्वा श्रीकान्तमवधीन्निशि ।
श्रीकांन्तेनापि खड्गेन वसुदत्तो निपातितः ॥२३॥
विन्ध्याटव्या मभूतान्तावुभावपि कुरङ्गकौ ।
गुणवत्यप्यनूढैव मृत्वा तत्राभवन्मृगी ॥२४॥
तस्याःकृते च तत्रापि युद्ध्वा पञ्चत्व मीयतुः ।
मिथो वैरेण तावेवं भूयांसं भ्रेमतु र्भवम् ॥२५॥
तदानीं धनदत्तोपि स्वभ्रातृवधपीडितः ।
निर्द्धर्मोऽटन्निशि साधून् ददर्श क्षुधितोऽन्यदा ॥२६॥
ययाचे भोजनन्तेभ्य स्तेष्वेको मुनिरब्रवीत् ।
दिवापि नहि साधूनां भक्तपानादि संग्रहः ॥२७॥
तत्रापि नोचितं रात्रैा भोक्तुं पातुञ्च भद्रक ।
कोवेत्ति जीवसंसक्ति मन्नादौ तमसीदृशे ॥२८॥
इत्यादि बोधिता स्तेन सुधयेवोक्षितो हृदि ।
श्रावकीभूय मृत्वा च सौधर्म्मे त्रिदशोऽभवत् ॥२९॥
च्युत्वा महापुरपुरे धारिणी मेरुनन्दनः ।
नाम्ना पद्मरुचिः श्रेष्ठी परमश्रावकोऽभवत् ॥३०॥

सोऽन्यदा गोकुलं गच्छन्नश्वारूढो यदृच्छया ।
जरद्वृषभमद्राक्षी न्मुमूर्षुं पतितं पथि ॥३१॥
कृपालुः सोऽवरुह्याश्वा न्निकटीभूय तस्य तु ।
कर्णमूले ददौ पञ्चपरमेष्ठिनमस्क्रियाम् ॥३२॥
मृत्वा च तत्प्रभावेण तत्रैव स सुतोऽभवत् ।
छत्रच्छायनरेन्द्रश्रीदत्तयोर्वृषभध्वजः ॥३३॥
स्वैरं भ्रमन्सोऽन्यदा तां जरद्वृषभभुवं ययौ ।
लेभे च जातिस्मरणं प्राग्जन्मस्थानदर्शनात् ॥३४॥
तत्र चाकारयच्चैत्यं तत्र चैत्यस्य चैकतः ।
भित्तावालेखयामास मुमूर्षुं तं जरद्वृषम् ॥३५॥
तत्कर्णान्ते नमस्कार दायिनं पुरुषञ्च तम् ।
तदभ्यर्णे तदीयञ्च सपर्य्याणं तुरङ्गमम् ॥३६॥
आरक्षां स्तत्र चादिक्षद्यश्चित्रं परमार्थतः ।
इदं विदन्नुदीक्षेत स ज्ञाप्य स्त्वरितं मम ॥३७॥
इत्युक्त्वा स ययौ वेश्म चैत्ये तत्रान्यदा पुनः ।
वन्दनाया ययौ पद्मरुचिः स श्रेष्ठिपुङ्गवः ॥३८॥
वन्दित्वा तत्र सोऽर्हन्तं भित्तिचित्रमुदैक्षत ।
सर्वं मे सम्वदत्येतदित्यूचे च सविस्मयः ॥३९॥
विज्ञप्तोऽथ तदा रक्षै स्तत्रागाद्वृषभध्वजः ।
किं वेत्सि चित्तवृत्तान्त मित्यप्रच्छच्च तं नरम् ॥४०॥

गतेऽस्मै म्रियमाणाय नमस्कारा न्दां पुरा ।
दृष्टाभिज्ञेन केनापि लिखितोऽस्मीत्युवाच सः ॥४१॥
तं नत्वोवाच वृषभध्वजो योयं जरद्गवः ।
राजपुत्रोऽभवं सोहं नमस्कार प्रभावतः ॥४२॥
कामयास्यमहं योनिं स्तीर्य्यग्योनि स्तदाप्यहम् ।
कृपालु स्त्वं नचेन्मह्यं नमस्कारानदास्यथाः ॥४३॥
सर्व्वथा त्वं गुरुः स्वामी दैवतञ्चासि मे खलु ।
भुंक्ष्व राज्यमिदं प्राज्यं त्वया दत्तं ममापि यत् ॥४४॥
इत्युक्त्वा पद्मरुचिना सहैव वृषभध्वजः ।
विजह्वाराकृत द्वैधं पालयन् श्रावकव्रतम् ॥४५॥
श्रावकत्वं चिरं सम्यक् पालयित्वा विपद्य च ।
ईशानकल्पे जज्ञाते तौ देवौ परमार्द्धिकौ ॥४६॥
च्युत्वा ततः पद्मरुचि र्मेरोरपरतो गिरौ ।
वैताढ्ये नगरे नन्द्यावर्त्ते नन्दीश्वरात्मजः ॥४७॥
कनकाभा कुक्षिजन्मा नयनानन्द इत्यभूत् ।
राज्यं भुक्त्वा च प्रव्रज्य माहेन्द्रे त्रिदशोऽभवत् ॥४८॥ युग्म॥
च्युत्वा च प्राग्विदेहेषु क्षेमायां पुरिभूपतेः ।
विपुलावाहनस्या भूत्पद्मावत्यां स नन्दनः ॥४९॥
श्रीचन्द्रो नाम भुक्त्वा च राज्यं प्रव्रज्य चान्तिके ।
समाधिगुप्तस्य मुने र्ब्रह्मलोकेन्द्रतां ययौ ॥५०॥

च्युत्वा ततोऽयं पद्मोऽभूद्बलभद्रो महाबलः।
सुग्रीव एष वृषभध्वजजीवस्त्वभूत्क्रमात् ॥५१॥
भ्रान्त्वा श्रीकान्तजीवोपि मृणालकन्दपत्तने।
राज्ञः स्वयम्भुनृपतेर्वज्रकम्बोः प्रसूर्हेमवतीभवः ॥५२॥
भ्रान्त्वा च वसुदत्तोऽभूच्छम्भुराजपुरोधसः।
विजयस्य रत्नचूडाभवः श्रीभूतिरात्मजः ॥५३॥
गुणवत्यपि सा भ्रान्त्वा श्रीभूतेस्तस्य नन्दना।
स्वरसतीकुक्षिभवा नाम्ना वेगवतीत्यभूत् ॥५४॥
सोद्यौवनान्यदा साधुं प्रतिमास्थं सुदर्शनम्।
वन्द्यमानं जनैर्दृष्ट्वा सोपहासमदोवदत् ॥५५॥
अहो साधुरयं दृष्टः पुराक्रीडन्महेलया।
साऽनेन प्रेषितान्यत्र तं वन्दध्वं कथं जनाः ॥५६॥
श्रुत्वा विपरिणम्याशु लोकः सर्वोऽपि तं मुनिम्।
विप्लावयितु मारेभे कलङ्कोद्घोषपूर्वकम् ॥५७॥
न मे यावत्कलङ्कोय मुत्तरिष्यति सर्वथा।
न तावत्पारयिष्यामीत्यभिजग्राह सोऽप्यृषिः ॥५८।
ततश्च देवतारोषाच्छुनं वेगवतीमुखम्।
साधुव्यतिकरं ज्ञात्वा साप्यऽभ्याभर्त्सिता भृशम् ॥५९॥
रोगार्त्पितुश्च सा भीता सुदर्शनमुनेः पुरः।
प्रत्यक्षं सर्वलोकानामित्यूचैःस्वरमब्रवीत् ॥६०॥

निर्द्दोषः सर्वथाऽसित्वं दोषोऽलीकोऽयमेव ते ।
मयैवारोपितः स्वामिं स्तितिक्षस्व क्षमानिधे ॥६१॥
श्रुत्वेति तद्वचो लोका भूयोप्यानर्च तं मुनिम् ।
उत्पन्याऽभूद्वेगवती तदादि श्राविकाच सा ॥६२॥
ताञ्च रूपवतीं दृष्ट्वा ययाचे शंभुभूपतिः ।
दाश्ये मिथ्यादृशे नेति श्रीभूतिः प्रत्युवाच तम् ॥६३॥
शम्भुर्निहत्य श्रीभूतिं बुभुजे तां बलादपि ।
भवान्तरे ते वधाय भूयासमिति साशपत् ॥६४॥
शम्भुनापि विमुक्ता सा हरिकान्तार्यिकान्तिके ।
प्रवव्राजाथ पूर्णायुः ब्रह्मलोकमुपाययौ ॥६५॥
ततश्च्युत्वा शम्भुजीव रक्षो नाथस्य मृत्यवे ।
निदानवशतो जज्ञे सीतेयं जनकात्मजा ॥६६॥
सुदर्शनमुने स्तस्याऽलीकदोषाधिरोपणात् ।
अस्याः कलङ्कोऽलीकोयं लोकेनेहाधिरोपितः ॥६७॥
भवं भ्रांत्वा शंभुजीवोप्युदपादि द्विजन्मनः ।
कुशध्वजस्य सावित्र्यां प्रभासो नाम नन्दनः ॥६८॥
स प्रवव्राज विजयसेनर्षेरन्तिकेऽन्यदा ।
परमञ्च तपस्तेपे सहमानः परीषहान् ॥६९॥
संमेतयात्राचलितं विद्याधरनरेश्वरम् ।
कनकप्रभमद्राक्षीदिन्द्रवत्परमर्द्धिकम् ॥७०॥

तपसाऽनेन भूयासमीदृग्वृद्धिरिति व्यधात् ।
स निदानं विपद्यायोत्पेदे कल्पे तृतीयके ॥७१॥
ततश्च्युत्वा रावणोऽभूत्खेचरेन्द्रस्तवाग्रजः ।
कनकप्रभऋद्धेयी निदानमकरोत्तदा ॥७२॥
धनदत्तवसुदत्तमित्रं यस्तु द्विजोऽभवत् ।
याज्ञवल्क्यो भवं भ्रान्त्वा त्वमभूः सविभीषणः ॥७३॥
राज्ञा हतस्तु श्रीभूतिर्द्योञ्जगाम ततश्च्युतः ।
सुप्रतिष्ठपुरे विद्याधरोऽजनि पुनर्वसुः ॥७४॥
स पुण्डरीकविजयेऽपजहार स्मरातुरः ।
कन्यां त्रिभुवनानन्दचक्रिणोऽनङ्गसुन्दरीम् ॥७५॥
चक्रिणा प्रेषितैर्विद्याधरैर्युध्याकुलस्य तु ।
विमानात्तस्य चापतन्तीन्निकुञ्जेऽनङ्गसुन्दरीम् ॥७६॥
कृत्वा निदानं तत्प्राप्त्यै प्रव्रज्य च पुनर्वसुः ।
स्वर्गं ययौ ततश्च्युत्वा लक्ष्मणोऽयमजायत ॥७७॥
वनस्थिता साप्यनङ्गसुन्दर्युग्रन्तपोकरोत् ।
विहितानशना चान्ते जग्रसेऽजगरेण सा ॥७८॥
मृता समाधिना सा भूद्देवी कल्पे द्वितीयके ।
ततश्च्युत्वा विशल्याभूल्लक्ष्मणस्य महिष्यसौ ॥७९॥
यो भूद्गुणवती भ्राता नाम्ना गुणधरः सतु ।
भवं भ्रान्त्वाऽभवद्राजा पुत्रः कुण्डलमण्डितः ॥८०॥

श्रावकत्वं पालयित्वा चिराय च विपद्य सः।
सीता सोदर एषो भून्नामण्डलनरेश्वरः ॥८१॥
इतोऽभूताञ्च काकंद्यां वामदेवद्विजन्मनः।
श्यामलाकुक्षिजौ पुत्रौ वसुनन्द सुनन्दनौ ॥८२॥
एकदा च तयोर्गेहे तिष्ठतोरा ययौ मुनिः।
मासोपवासी ताभ्याञ्च भक्तितः प्रतिलम्भितः ॥८३॥
मृत्वा तद्दानधर्म्मेणोत्तरेषु तु कुरुष्वथ।
अभूतां युग्मिनौ मृत्वा सौधर्म्मे तौ सुरौ ततः ॥८४॥
च्युत्वा भूताञ्च काकंद्यां रतिवर्द्धनभूपतेः।
सुदर्शनाभुवौ पुत्रौ प्रियङ्करशुभङ्करौ ॥८५॥
राज्यं चिरं पालयित्वा प्रव्रज्य च विपद्य च।
सुरौ ग्रैवेयकेऽभूतां च्युत्वा च लवणांकुशौ ॥८६॥
सुदर्शना तयोः पूर्वभवमाता भवं चिरम्।
भ्रांत्वा भूदेष सिद्धार्थोध्यापको रामपुत्रयोः ॥८७॥
एवं मुनि वचः श्रुत्वा सम्वेगं बहवो ययुः।
तदैव रामसेनानी कृतान्तः प्राव्रजत्पुनः ॥८८॥
अथोत्थाय नमश्चक्रे काकुत्स्थो जयभूषणम्।
उपसीतञ्च गत्वैवं चिन्तयामास चेतसि ॥८९॥
असौ शिरीषमृद्वङ्गी राजपुत्री मम प्रिया।
सीता सीताऽतपःक्लेशं कथं नाम सहिष्यते ॥९०॥

इमं संयमभारञ्च सर्वभारातिसायिनम् ।
उद्वच्यति कथं नाम हृदयेनापि दुर्वहम् ॥९१॥
यद्वा सती व्रतं यस्या न भंक्तुं रावणोप्यलम् ।
सा निर्व्यूढ़प्रतिज्ञैवं भाविनो संयमेपि हि ॥९२॥
एवं विमृश्य वैदेहीं ववन्दे लक्ष्मणाग्रजः ।
लक्ष्मणोऽन्येच राजानः श्रद्धानिर्द्धौतचेतसः ॥९३॥
इतश्च सपरीवारो रामोऽयोध्यां ययौ पुनः ।
सीता कृतान्तवदनौ तेपाते च परन्तपः ॥९४॥
तपस्तप्त्वा ब्रह्मलोके कृतान्तवदनो ययौ ।
सीतापि षष्टिवर्षाणि विदधे विविधन्तपः ॥९५॥
त्रयस्त्रिंशदहोरात्रीं कृत्वान्तेऽनशनं मृता ।
द्वाविंशत्यर्णवायुः सा च्युतेन्द्रः समजायत ॥९६॥
इतश्च शैले वैताढ्ये भूत्काञ्चनपुरे पुरे ।
नामतः कनकरथो विद्याधरपति स्तदा ॥९७॥
मन्दाकिनी चन्द्रमुख्योः कन्ययोः स स्वयम्बरे ।
स पुत्रान् भूपतीन् रामलक्ष्मणादीनथाह्वयत् ॥९८॥
तत्रासीनेषु भूपेषु मन्दाकिन्या निजेच्छया ।
अनङ्गलवणो वव्रे चन्द्रमुख्यां कुशः पुनः ॥९९॥
लक्ष्मणस्य सुता स्तत्र क्रोधादुत्तस्थिरे युधि ।
सार्द्धशते द्वे अपि ते युगपच्छ्रीधरा इव ॥१००॥

श्रुत्वा सन्नह्यत स्तांश्च प्रोचाते लवणांकुशौ।
कोनाम योत्स्यतेऽस्मूभिरवध्या भ्रातरः खलु ॥१॥
यथा न तातयोर्भेदः कोपि जेष्ठकनिष्ठयोः।
तत्पुत्त्राणां तथास्माक ममीषामपि माशुचः ॥२॥
एवं तयोर्वचो ज्ञात्वा चरेभ्यो लक्ष्मणात्मजाः।
वीक्षापन्नानिनिन्दुः स्वं दुःकर्मारम्भसम्मुखम् ॥३॥
सद्यः सम्वेगमापन्ना पितरावनुमान्य ते।
महाबलमुनेः पादप्रान्ते जगृहुर्व्रतम् ॥४॥
जातोद्वाहौ तदानीं तावनङ्गलवणांकुशौ।
सहैव शौरिशार्ङ्गिभ्यामयोध्यामीयतुः पुरम् ॥५॥
इतश्च स्वपुरे हर्म्यमूर्ध्नि भामण्डलः स्थितः।
कदाचिदेवं मनसा चिन्तयामास शुद्धधीः ॥६॥
श्रेणिद्वयं वशीकृत्यास्खलन् सर्वत्र लीलया।
विहृत्यान्ते चात्तदीक्षो भवेयं पूर्णवाञ्छितः ॥७॥
एवं चिन्तयतस्तस्य मूर्ध्नि विद्युत्पपात खात्।
स मृत्वा देवकुरुषु जज्ञे युगलधर्म्मिषु ॥८॥
इतश्च हनुमांश्चैत्रे चैत्यवन्दनहेतवे।
मेरुं गतो निवृत्तोऽस्तमयं तं सूर्य्यमैक्षत ॥९॥
एवञ्च दृष्ट्वावुदयो यथा ह्यस्तं तथा खलु।
निदर्शनमयं सूर्य्यो धिक् धिक् सर्व्वमशाश्वतम् ॥१०॥

एवं विचिन्त्य स्वपुरे गत्वा राज्यं सुते न्यधात् ।
धर्मरत्नाचार्य्यपार्श्वे प्रव्रज्यामाददे स्वयम् ॥११॥
तमनुप्राव्रजन् राज्ञोसार्द्धं सप्तशतानि च ।
आर्य्य लक्ष्मीवतीपार्श्वे त्वस्य स्तत्पत्न्यश्च दीक्षिताः ॥१२॥
ध्यानानलेन निर्दह्य क्रमात्कर्माणि मूलतः ।
श्रीशैलः प्राप्य शैलेशीं जगाम पदमव्ययम् ॥१३॥
हनूमन्तं प्रव्रजितं ज्ञात्वा दध्यौ रघूद्वहः ।
हित्वा भोगसुखं कष्टां दीक्षां किमयमाददे ॥१४॥
तां रामचिन्तामवधेर्ज्ञात्वा सौ धर्म्मवासवः ।
ऊचे मध्ये नभमहोकर्म्मणां विषमा गतिः ॥१५॥
रामश्चरमदेहोऽपि यद्धर्म्मं हसति स्वयम् ।
सौख्यं विषयसम्भूतं प्रत्युतैवं प्रशंसति ॥१६॥
अथवा ज्ञातमनयो रामलक्ष्मणयोर्मिथः ।
स्नेहो गाढतरः कोपि भवानिर्वेदकारणम् ॥१७॥
द्वौ देवौ कौतुकात्तत्र तयोः स्नेहं परीक्षितुम् ।
उपेयतु रयोध्यायां लक्ष्मणस्य निकेतने ॥१८॥
दर्शयामासतुः सद्यो मायया लक्ष्मणस्य तौ ।
सर्वमन्तःपुरस्त्रैण माक्रन्दन्करुणास्वरम् ॥१९॥
हा पद्म पद्मनयन बन्धु पद्मदिवाकर ।
अकाण्डमृत्युः कोयं ते विश्वस्यापि भयङ्करः ॥२०॥

एवञ्च रुदती कैकेयी म्लाना मुक्तकुन्तला ।
अन्तःपुरवधूः प्रेक्ष्य विषण्णो लक्ष्मणोऽवदत् ॥२१॥
ममासौ किं मृतोभ्राता जीवितस्यापि जीवितम् ।
पिशुनेन कृतान्तेन किं कृतं छलघातिना ॥२२॥
एवञ्च भाषमाणस्य वचसा सह जीवितम् ।
सौमित्रे निर्ययौ कर्मविपाको दुरतिक्रमः ॥२३॥
स्वर्णस्तम्भमवष्टभ्य स्थितः सिंहासनेपि हि ।
सोऽथ प्रसारिताक्षोऽस्थाल्लेप्यमूर्त्तिरिवाक्रियः ॥२४॥
परासुं लक्ष्मणं दृष्ट्वा विषण्णौ तौ सुरावपि ।
मिथोऽजजल्पतुरहो किमावाभ्यामिदं कृतम् ॥२५॥
विद्याधरः पुमानेष किमावाभ्यां हहा हतः ।
इति स्वं बहुनिन्दन्तौ स्वकल्पं जग्मतुः पुनः ॥२६॥
परासुं लक्ष्मणं प्रेक्ष्य तत्र चान्तःपुरस्त्रियः ।
चक्रन्दुः सपरीवारा विलुलत्कुन्तलालिका ॥२७॥
तच्चाक्रन्दितमाकर्ण्य तत्र रामः समाययौ ।
उवाच च किमारब्धमविज्ञायाप्यमङ्गलम् ॥२८॥
जीवन्नेवैष तिष्ठामि जीवत्येष च मेऽनुजः ।
कोऽप्यमुम्बाधते व्याधिः भेषजं तत्प्रतिक्रिया ॥२९॥
इत्युक्त्वा जूहवद्रामो वैद्यान् ज्योतिषिकानपि ।
प्रयोगं मन्त्रतन्त्राणां कारयामास चाऽसकृत् ॥३०॥

वैफल्ये मन्त्रतन्त्राणां मूर्च्छां प्राप रघूद्वहः।
कथञ्चिल्लब्धसंज्ञः सन् विललापोच्चकैःस्वरम् ॥३१॥
ते विभीषणसुग्रीवशत्रुघ्नाद्या उदश्रवम्।
विमुक्तकण्ठं रुरुदुर्हताः स्म इति भाषिणः ॥३२॥
कौशल्याद्या मातरश्च स्नुषाभिः सह साश्रवः।
भूयो भूयोपि मूर्च्छन्त्यश्चक्रन्दुः करुणस्वरम् ॥३३॥
प्रतिमार्गं प्रतिगृहं प्रत्यट्टं क्रन्दनात्तदा।
शोकाद्वैतमभूत्सर्वं रसान्तरमलिम्लुचम् ॥३४॥
नत्वाथ राममूचाते कुमारौ लवणांकुशौ।
भवादृशापि भीतौ स्वः कनीयस्तातमृत्युना ॥३५॥
अकस्मादापतत्येष मृत्युः सर्वस्य तन्नरैः।
तत्परैः परलोकाय स्थातव्यं भूलतोपि हि ॥३६॥
अनुमन्यस्व दीक्षायै न नो युक्तमतःपरम्!
कनीयस्तातमुक्तानां गृहे स्थातुं मनागपि ॥३७॥
इत्युक्त्वा राममानम्याऽमृतघोषमुनेः पुरः।
उभौ जगृहतुर्दीक्षां क्रमाच्च शिवमीयतुः ॥३८॥
रामो भ्रातृविपत्त्या च वियोगेन च पुत्रयोः।
मुमूर्च्छ भूयो भूयोपि मोहादेवं जगाद च ॥३९॥
मयापमानिना काचित् काचिच्चक्रोद्य बान्धव।
कस्मादकस्मादालम्बि भवता मौनमीदृशम् ॥४०॥

त्वयि ह्येवं स्थिते भ्रातः पुत्त्राभ्यामपि चोज्झितः ।
प्रविशन्ति च्छिद्रशते नृणां भूतशतानि हि ॥४१॥
उन्मत्तभाषिणञ्चैवं राममेत्य कथञ्चन ।
विभीषणाद्याः संभूय जगदुर्गद्गदस्वरम् ॥४२॥
धीरेष्वपि हि धीरस्त्वं वीरो वीरेष्वपि प्रभो ।
लज्जाकरमिदं तस्मादधैर्य्यं मुञ्च सम्प्रति ॥४३॥
लोकप्रसिद्धमधुना सौमित्रे रौर्द्वदैहिकम् ।
अङ्गसंस्कारपूर्व्वं हि कर्त्तव्यं समयोचितम् ॥४४॥
इत्युक्त्या कुपितो राम स्तानूचे विधुराधरः ।
जीवत्येष हि मे भ्राता किमिदम्बो वचः खलाः ॥४५॥
सर्व्वेषां वः सबन्धूनां ज्वलने दाहपूर्व्वकम् ।
मृतकार्य्यं विधातव्यं दीर्घायुस्तन्ममानुजः ॥४६॥
भ्रातस्त्वं तद्ब्रूहि शीघ्रं वत्स लक्ष्मण नन्वयम् ।
दुर्ज्जनानां प्रवेशोस्ति किं खेदयसि माञ्चिरम् ॥४७॥
यद्वा खलसमक्षं न वत्स कोपस्तवोचितः ।
इत्युक्त्वांसे तमारोप्य ययावन्यत्र राघवः ॥४८॥
नीत्वा स्नानगृहे रामः कदाप्यस्नपयत्स्वयम् ।
ततश्च तं स्वहस्तेन विलिलेप विलेपनैः ॥४९॥
आनाय्य दिव्यभोज्यानि पूरयित्वा च भाजनम् ।
कदाचित्तस्य पुरतो मुमोच स्वयमेवच ॥५०॥

कदाप्यारोपयदङ्के निजे चुम्बन् शिरो मुहुः ।
कदाप्यखापयत्तल्पे वाससा च्छादिते स्वयम् ॥५१॥
कदापि स्वयमाभाष्य स्वयंस्म प्रतिभाषते ।
स्वयं सम्बाहकी भूय ममर्द च कदाचन ॥५२॥
इत्यादि चेष्टा विकलाः स्नेहोन्मत्तस्य कुर्व्वतः ।
ययौ रामस्य षण्मासो विस्मृताशेषकर्मणः ॥५३॥
श्रुत्वा च तं तथोन्मत्तमिन्द्रजित् सुन्दसूनवः ।
खेचरा विद्विषोन्येपि रामस्येयुर्जिघांसवः ॥५४॥
अयोध्यां रुरुधुः सैन्यैरुन्मत्तरघुपुङ्गवाम् ।
सुप्तसिंहां गिरिगुहामिव व्याधास्छलौजसः ॥५५॥
रामोपि लक्ष्मणं स्वाङ्के निधायास्फालयद्धनुः ।
वज्रावर्त्तमकालेऽपि सम्वर्त्तस्य प्रवर्त्तकम् ॥५६॥
तदा चासनकम्पेन माहेन्द्रान्नाकिभिः समम् ।
जटायुराययौ रामं दृढ़ात्प्रागजन्मसौहृदात् ॥५७॥
अद्यापि नाकिनो राम गृह्या इति विभीषणः ।
इन्द्रजित्पुत्रमुख्यास्ते दुद्रुवुः खेचरा द्रुतम् ॥५८॥
अत्र देवसखा रामो हन्ता नोऽग्रे विभीषणः ।
पुरस्था लज्जितास्त्विति सम्वेगं परमन्दधुः ॥५९॥
ते मुनेरतिवेगस्य पार्श्वे सम्वेगधारिणः ।
उपेत्य दीक्षां जगृहुः गृहवसपराङ्मुखाः ॥६०॥

ततो जटायुरमरो बोधार्थं राघवस्य सः ।
पुरस्थाय तरुं शुष्कं सिषेच मुहुरम्भसा ॥६१॥
क्षिप्त्वा करीषं दृषदि रोपयामास पद्मिनीम् ।
बीजान्युवापाकालेऽपि मृतोक्षणा लाङ्गले नच ॥६२॥
यन्त्रे च वालुकान् क्षिप्त्वा तैलार्थं पर्य्यपीलयन् ।
इत्याद्यसाधकं रामस्यान्यदप्युदभावयत् ॥६३॥
रामस्तमूचे किं शुष्कं तरुं सिञ्चसि भो मुधा ।
फलं दूरेऽस्तु किं नाम मुसलं क्वापि पुष्प्यति ॥६४॥
शिलायां पद्मिनीषण्डमारोपयसि मुग्ध किम् ।
किम्वापयसि बीजानि निर्जलेऽपि मृतैर्वृषैः ॥६५॥
न वालुकाभ्यस्तैलं स्यात् किं पीलयसि मूर्ख भो ।
अनुपायविदस्तेऽसौ प्रयासः सर्व्वथा वृथा ॥६६॥
श्रुत्वा जटायुरप्यूचे यद्येवमपि वेत्सि भोः ।
अज्ञानचिह्नं मृतकं स्कन्धे वहसि तर्हि किम् ॥६७॥
सौमित्रिवपुरालिङ्ग्य राम स्तं प्रत्यभाषत ।
अमङ्गलं भाषसे किं त्यज दृष्टिपथं मम ॥६८॥
एवं जटायुषं रामे भाषमाणेऽवधेर्विदन् ।
कृतान्तवदनो देव स्तद्बोधार्थं समाययौ ॥६९॥
स्कन्धे स्त्रीमृतकं न्यस्योपरामं विचचार सः ।
रामोऽप्यूचे किमुन्मत्तोऽस्येवं स्त्रीमृतकं वहन् ॥७०॥

प्रत्युवाच कृतान्तोपि भाषसे किममङ्गलम् ।
ममैषा प्रेयसी त्वं तु किं शिवं वहसि स्वयम् ॥७१॥
मृतां जानासि मे भार्य्यामुह्यमानां मया यदि ।
निजस्कन्धस्थितं किं न मृतकं वेत्सि बुद्धिमान् ॥७२॥
तेनैवं दर्शिते स्तै स्तै र्हेतुभि र्जातचेतनः ।
रामो दध्यौ किन्नु सत्यं न जीवति ममानुजः ॥७३॥
तत स्तौ लब्धबोधाय रामाय स्वमशंसताम् ।
देवौ जटायुः कृतान्तौ निजस्थानञ्च जग्मतुः ॥७४॥
मृतकार्य्यं ततो राम श्चकार स्वानुजन्मनः ।
दीक्षां प्रपित्सुः शत्रुघ्नं राज्यादानाय चादिशत् ॥७५॥
अहमप्यनुयास्यामि भवत्पादानिति ब्रुवन् ।
प्रत्यादिदेश शत्रुघ्नो राज्यं भवपराङ्मुखः ॥७६॥
ततो लवणपुत्रायानङ्गदेवाय राघवः ।
ददौ राज्यं स्वयं तुर्य्यं पुरुषार्थाय सत्वरः ॥७७॥
मुनिसुव्रतवंशस्य सुव्रतस्य महामुनेः ।
अर्हद्दासश्रावकेणोपदिष्टस्यान्तिकं ययौ ॥७८॥
तत्र शत्रुघ्न सुग्रीव विभीषण विराधितैः ।
अन्यैश्च राजभिः सार्द्धं रामो व्रतमुपाददे ॥७९॥
रामभद्रेतु निःक्रान्ते निःक्रान्तान्यथ षोडश ।
महीभुजां सहस्राणि भववैराग्ययोगतः ॥८०॥

सप्तत्रिंशत्सहस्राणि प्राव्रजन् वरयोषितः ।
श्रीमत्याः श्रमणायाश्च ता बभूवुः परिच्छदे ॥८१॥
षष्ठाब्दीं गुरुपादान्ते विविधाभिग्रहोद्यतः ।
तेपे तपांसि रामर्षिः पूर्वाङ्गश्रुतिभावितः ॥८२॥
अथ रामः प्रपन्नैकविहारो गुर्व्वनुज्ञया ।
एकाकी प्रययौ निर्भीरटव्यां गिरिकन्दरे ॥८३॥
तस्यामेव विभावर्य्यां तत्र ध्यानजुषः स्वतः ।
उदभूदवधिज्ञानं रामभद्रमहामुनेः ॥८४॥
पश्यंश्चतुर्दश रज्जुप्रमं विश्वं करस्थवत् ।
देवाभ्यां हतमज्ञासीद्गतञ्च नरकेऽनुजम् ॥८५॥
इदञ्च चिन्तयामास रामभट्टारकस्तदा ।
धनदत्ताभिधोऽभूवमहं पूर्वत्र जन्मनि ॥८६॥
वसुदत्तोऽभिधानेन लक्ष्मणोऽभून्ममानुजः ।
तत्राप्यकृतकृत्योऽसावेवमेव विपद्यत ॥८७॥
भवेऽस्मिन्मे वसुदत्तजीवोऽभूल्लक्ष्मणोऽनुजः ।
तत्रापरमुष्य कौमारे मुधागाच्छरदां शतम् ॥८८॥
शतत्रयं मण्डलित्वे चत्वारिंशच्च दिग्जये ।
वर्षैकादशसहस्राः साद्धे राज्येऽब्दषष्ठि च ॥७९॥
द्वादशाब्दसहस्राणि सर्वमायुरिति क्रमात् ।
ययावविरतस्यैव केवलं नरकावहम् ॥९०॥

न दोषो देवयोः कोपि मायावधकयो स्तयोः ।
विपाकः कर्म्मणामीदृग्भवत्येव शरीरिणः ॥८१॥
एवं विचिन्तयन् रामः कर्म्मच्छेदेऽधिकोद्यतः ।
तपः समाधिनिष्टोऽभून्निर्म्ममः सन्विशेषतः ॥८२॥
अथ षष्ठोपवासान्ते प्राविशत्पारणाय सः ।
युगमात्रदत्तदृष्टि र्नगरे स्यन्दनस्थले ॥८३॥
निशाकर मिवाऽवन्यामायान्तं नयनोत्सवम् ।
सम्मुखीना समापेतुः पौराः प्रचुरसम्मदाः ॥८४॥
पौर्य्यः स्व स्व गृहद्वारे भिक्षादानाय तस्य च ।
विचित्रभोजनपूर्णानि भाजनानि पुरोदधुः ॥८५॥
पौराणां हर्षत स्तत्र तुमुलोऽभूत्तथा तथा ।
स्तम्भान् बभञ्जुः करिणो ययुस्तोत्कर्णतां हयाः ॥८६॥
रामोपुत्रज्झितधर्माभिरतत्वात्पौरढौकितम् ।
आहारं नाग्रहीत्तेभ्योऽभ्यागात्तु नृपवेश्मनि ॥८७॥
तत्र चोज्झितधर्म्मेणाहारेण प्रत्यलंभयत् ।
प्रतिनन्दिनृपो रामं विधिवद्बुभुजे च सः ॥८७॥
अमरै र्विदधे तत्र वसुधाराजिपञ्चकम् ।
भगवान् रामभद्रोऽपि तदरण्यं ययौ पुनः ॥८८॥
माभूद्भूयः पुराक्षोभं संघट्टो मेव मास भूः ।
इति बुद्ध्या शुद्धबुद्धिः सोभिग्रहमिमं व्यधात् ॥१००॥

अरण्येऽत्रैव चेद्भिक्षा काले भिक्षोपलभ्यते।
तदानीं पारणं कार्य्यमस्माभिर्नान्यथा पुनः ॥१॥
इत्यभिग्रहभृद्रामो निरपेक्षो वपुष्यपि।
परं समाधिमापन्नोऽवतस्थे प्रतिमाधरः ॥२॥
तत्रान्येद्युर्विपर्य्यस्त शिक्षेणाश्वेन वेगिना।
आकृष्यमाण आयासी त्प्रति नन्दीनरेश्वरः ॥३॥
पङ्के नन्दनपुण्याख्य सरस्यश्वो ममज्ज सः।
समापपातानुपदं सैन्यञ्च प्रतिनन्दिनः ॥४॥
पङ्कात्तमश्वमुत्तार्य्य शिविरं न्यस्य तत्र च।
स्नात्वा च स नृपश्चक्रे भोजनं सपरिच्छदः ॥५॥
तदा च पारितध्यतनो रामर्षिः पारणेच्छया।
तत्रा जगाम भगवानभ्युत्तस्थौ च तं नृपः ॥६॥
अवशिष्टै र्भक्तपानैः स रामं प्रत्यलम्भयत्।
कृतपारणके तस्मिन् रत्नवृष्टिरभूद्दिवः ॥७॥
रामर्षि र्देशनाच्चक्रे प्रतिनन्द्याद्योऽथ ते।
बभूवुः श्रावकाः सम्यग् द्वादशव्रतधारिणः ॥८॥
ततः प्रभृति तत्रैव राम स्तस्थौ चिरं वने।
देवीभि र्वनवासाभिः पूज्यमानो महातपाः ॥९॥
मासेनैकेन मासाभ्यां मासैस्त्रिचतुरैरपि।
रामर्षिः पारयामास भवपारयियासया ॥१०॥

पर्य्यङ्कस्थः कदाप्यस्थात्प्रलम्बितभुजोऽन्यदा ।
कदाप्युत्कटिकासीन ऊर्द्ध्वबाहुः कदाचन ॥११॥
अङ्गुष्ठस्थोन्यदा तस्थौ पार्ष्णिस्थश्च कदापि हि ।
इति नानासनो ध्यानी स तेपे दुस्तपं तपः ॥१२॥
तदा चावधिना ज्ञात्वा सीतेन्द्रः पर्य्यचिन्तयत् ।
अयं भवी भवति चेद्रामो युज्येऽमुना पुनः ॥१३॥
विहरन्नन्यदा रामो ययौ कोटिशिलां शिलाम् ।
विद्याधरसमच्चं या लक्ष्मणेन पुरोद्दधे ॥१४॥
तामध्यासीत् शिलां रामः क्षपकः श्रेणिमाश्रितः ।
शुक्लध्यानान्तरं भेजे निशायां प्रतिमाधरः ॥१५॥
अनुकूलैरुपसर्गैश्च क्षपकश्रेणिवर्त्तिनः ।
उपद्रवं करोम्यस्य यथा स्यान्मत्सुहृत्सुरः ॥१६॥
इति सञ्चिन्त्य सीतेन्द्र उपरामं समाययौ ।
विचक्रे च महोद्यानं वसन्तर्त्तुविभूषितम् ॥१७॥
चुकूज कोकिलकुलं ववौच मलयानिलः ।
रणन्तो भ्रमरा भ्रेमुः कुसुमामोदमोदिनः ॥१८॥
चूतचम्पककङ्कोलिलपाटला वकुलादयः ।
दधुः सद्योपि पुष्पाणि नव्यास्त्राणि मनोभुवः ॥१९॥
सीतारूपञ्च सीतेन्द्रो विकृत्य स्त्रीजना अपि ।
ऊचे प्रिय प्रिया तेस्मि सीतेह समुपस्थिता ॥२०॥

रक्तं त्यक्त्वा तदानीं त्वामहं पण्डितमानिनी।
प्राव्रजं नाथ पश्चाच्च पश्चात्तापो ममात्यभूत् ॥२१॥
विद्याधरकुमारीभिराभिरद्याहमर्थिता।
प्रसीद नाथ स्वंनाथं रामनाथो कुरुष्व नः ॥२२॥
त्वञ्च मुञ्च परिव्रज्यां रामस्य महिषी भव।
त्वदादेशात्तस्य पत्न्यो भविष्यामोऽधुना वयम् ॥२३॥
अमू विद्याधरवधू स्तदुद्वह रघूद्वह।
प्राग्वत्सह त्वया रंस्ये तां सहस्वावमाननाम् ॥२४॥
इति ब्रुवाणे सीतेन्द्रे वैक्रियः खेचरस्त्रियः।
सङ्गीतं विविधं चक्रुः स्मरोज्जीवन भेषजम् ॥२५॥
सीतेन्द्रवचनैस्तैश्च तेन सङ्गीतकेन च।
बसन्ते न च नक्षुभ्यद्रामभद्रमहामुनिः ॥२६॥
माघस्य शुक्लद्वादश्यां तदा यामेऽन्तिमे निशि।
उदपद्यत रामर्षेः केवलज्ञानमुज्ज्वलम् ॥२७॥
रामस्य केवलज्ञानमहिमानं सभक्तिकः।
सीतेन्द्रो नाकिनोऽन्ये च विदधुर्विधिपूर्वकम् ॥२८॥
दिव्यस्वर्णाम्बुजासीनो दिव्यचामरराजितः।
दिव्यातपुत्रवान् रामो विदधे धर्मदेशनाम् ॥२९॥
देशनान्ते क्षमयित्वा सीतेन्द्रेण प्रणम्य च।
सौमित्रिरावणगतिं पृष्टो रामर्षिरभ्यधात् ॥३०॥

अधुना नरके तुर्य्ये सशम्बूको दशाननः ।
लक्ष्मणश्चास्ति गतयः कर्म्माधीना हि देहिनाम् ॥३१॥
नरकायुश्चानुभूय तौ दशानन लक्ष्मणौ ।
नगर्य्यां विजयावत्यां प्राग्विदेहे विभूषणे ॥३२॥
सुनन्दरोहिणीपुत्रौ जिनदास सुदर्शनौ ।
भविष्यतोऽर्हद्धर्मञ्च सततं पालयिष्यतः ॥३३॥
ततो विपद्य सौधर्म्मे त्रिदशौ तौ भविष्यतः ।
च्युत्वा च विजयापुर्य्यां श्रावकौ भाविनौ पुनः ॥३४॥
ततोऽपि मृत्वा पुरुषौ हरिवर्षे भविष्यतः ।
तौ चावसानमासाद्य देवलोकं गमिष्यतः ॥३५॥
च्युत्वा च विजयापुर्य्यां जयकान्त जयप्रभौ ।
कुमारवार्त्तराट् लक्ष्म्या स्तौ कुमारौ भविष्यतः ॥३६॥
जिनोक्तं संयमं तत्र पालयित्वा विपद्य च ।
गीर्वाणौ लान्तके कल्पे भविष्येत उभावपि ॥३७॥
तदा त्वमच्युता च्युत्वा क्षेत्रे चात्रैव भारते ।
सर्व्वरत्नमतिर्न्नाम चक्रवर्त्ती भविष्यसि ॥३८॥
च्युत्वा तौ भाविनाविन्द्रायुधमेघरथाभिधौ ।
सुतौ ते त्वं परिव्रज्य वैजयन्ते व्रजिष्यसि ॥३९॥
इन्द्रायुधः स तु जीवो रावणस्य भव त्रयम् ।
शुभं भ्रान्त्वा तीर्थकरगोत्रकर्म्मा जयिष्यति ॥४०॥

ततो रावणजीवः स तीर्थनाथो भविष्यति ।
वैजयन्ताच्युतस्तस्य भावी गणधरो भवान् ॥४१॥
ततस्तौ यास्यतो मोक्षं स जीवो लक्ष्मणस्य तु ।
भवत्सूनुर्मेघरथो भ्रमिष्यति गतीः शुभाः ॥४२॥
ततश्च पुष्करद्वीपे प्राग्विदेहविभूषणे ।
नगर्यां रत्नचित्रायां चक्रवर्त्ती भविष्यति ॥४३॥
चक्रवर्त्तिश्रियं भुक्त्वा परिव्रज्य क्रमेण च ।
स तीर्थनाथो भविता निर्वाणञ्च प्रपत्स्यते ॥४४॥
एवमाकर्ण्य सीतेन्द्रो रामभद्रं प्रणम्य च ।
ययौ प्राक् स्नेहवशतो दुःखभाग् यत्र लक्ष्मणः ॥४५॥
सिंहादिरूपे विकृति स्तत्र शंबूकरावणौ ।
लक्ष्मणेन समं क्रुद्धौ युद्ध्यमानौ ददर्श सः ॥४६॥
नैवं वो युद्ध्यमानानां दुःखं भावीतिवादिनः ।
परमा धार्मिकाः क्रुद्धा अग्निकुण्डेषु तान्यधुः ॥४७॥
दह्यमाना स्त्रयोऽप्युच्चैः रटन्तो गलिताङ्गकाः ।
ततः कृष्ट्वा तप्ततैलकुम्भ्यां निदधिरे बलात् ॥४८॥
विलीनदेहा स्तत्रापि भ्राष्ट्रे चिक्षिपिरे चिरम् ।
तडत्तडिति शब्देन स्फुटन्तो दुद्रुवुः पुनः ॥८॥
इत्यादि दुःखं तेषां स प्रेक्ष्योवाचासुरानिति ।
किं रे न वित्थ यदमी आसन् पुरुषपुङ्गवाः ॥५०॥

अपयाता सुरा दूरं मुञ्चातें तान्महात्मनः ।
निषिध्येत्यसुरानूचे सोऽथ शम्बूकरावणौ ॥ ५१॥
युवाभ्यां तत्कृतं पूर्व्वं येनेमं नरकं गतौ ।
पूर्व्ववैरं किमद्यापि हृष्ट्वे इत्थं न मुञ्चतम् ॥ ५२॥
तावप्येवं निषिध्येन्द्रः सौमित्रे रावणस्य च ।
रामकेवलिनाख्यातमाचख्यौ बोधहेतवे ॥ ५३॥
तावप्यथ बभाषाते स्वाध्वशार्षीः कृपानिधेः ।
भवच्छुभोपदेशेन जाता नो दुःखविस्मृतिः ॥ ५४॥
प्राग्जन्मोपार्ज्जितै स्तै स्तैः क्रूरैः कर्मभिरर्पितः ।
दीर्घो नौ नरकावास स्तद्दुःखं कोऽपनेष्यति ॥ ५५॥
इत्युक्तया करुणापूर्णः सीतेन्द्रः प्रत्यवोचत् ।
नेष्यामि सुरलोकेषौनपि वो नरकादितः ॥ ५६॥
इत्युक्त्वा पाणिनो दध्रे सीता स्त्रीनपि ते पुनः ।
विशीर्य्य कणशः पेतुः पाणेः पारद्वत्क्षणात् ॥ ५७॥
भूयोपि मिलितां यां स्तानुद्दध्रे स यथा यथा ।
पुनरेव पतन्तिस्म पूर्व्ववत्ते तथा तथा ॥ ५८॥
ततः सीतेन्द्रमूचु स्ते भवत्यधिकमेव नः ।
दुःखं विलीयमानानां तन्मुञ्चास्मान्दिवं व्रज ॥ ५९॥
तान्मुक्त्वायात् स सीतेन्द्रो रामं नत्वा ततोऽगमत् ।
शाश्वतार्हत्तीर्थयात्राकृते नन्दीश्वरादिषु ॥ ६०॥

गच्छन्नथो देवकुरुप्रदेशे
निरीक्ष्य भामण्डलराजजीवम् ।
प्राक्स्नेहयोगात्प्रतिबोध्य सम्यग्
निजं स सीतेन्द्र इयाय कल्पम् ॥६१॥

उत्पन्ने सति केवले स शरदां पञ्चाधिकां विंशतिं
मेदिन्यां भविकान् प्रबोध्य भगवान् श्रीरामभट्टारकः
आयुश्च व्यतिलंघ्य पञ्चदश चाब्दानां सहस्रान् कृती
शैलेशीं प्रतिपद्य शाश्वतसुखानन्दं प्रपेदे पदम् ॥२६२॥

इत्याचार्य्यश्रीहेमचन्द्रविरचिते त्रिषष्ठिशलाका
पुरुषचरिते महाकाव्ये सप्तमे पर्वणि
रामनिर्वाणगमनो नाम
दशमः सर्गः ॥१०॥

समाप्तश्चायं ग्रन्थः ।